अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

चतुर्थवर्षे प्रथमोऽङ्कः

१५ जनवरी १९८२

प्रधानसम्पादकः

डा० रमाकान्तशुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः,

सांख्ययोगाचार्यः

प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

विषयसूची

क्रम:	लेख:	लेखक:	पृष्ठाङ्क
१.	सम्पादकीयम्	सम्पादक:	१
२.	*Editorial*	*Editor*	२
३.	देववाणी-परिषत्समाचारा:		३–४
४.	'सुगमरामायण'-समीक्षा	डा० रमाकान्त शुक्ल:	५–३६
५.	'सुगमरामायण'-विमर्श:	डा० रमेशकुमार लौ	३६–४४
६.	अर्वाचीनसंस्कृत-रचनानामध्ययना-ध्यापनयो: प्रासंगिकता	डा० (श्रीमती) शशि तिवारी	४५–४८
७.	शिवराजविजये राष्ट्रियभावना	डा० हरिनारायण दीक्षित:	४९–५५
८.	अर्वाचीनसंस्कृतस्य तृतीय-वर्षपूर्तिः (समाचार:)		५६

सम्पादकीयम्

अनेनाङ्केन अर्वाचीनसंस्कृतम् चतुर्थं वर्षं प्रविशति। अद्यावधि अनेन अर्वाचीनसंस्कृतरचनानां विषये विश्लेषणात्मिका सामग्री यथाशक्ति स्वपाठकेभ्यः प्रदत्ता।

अस्मिन्नङ्के उत्तरप्रदेशसंस्कृताकादम्या एकसहस्ररूप्यकात्मकपुरस्कारेण हरियाणासाहित्याकादम्याश्च अखिलभारतीयगीतापुरस्कारेण सम्मानितस्य आचार्यरमेशचन्द्रशुक्लप्रणीतस्य १९७८ तमेशवीयेऽब्दे प्रकाशितस्य च 'सुगमरामायणम्'—इत्येतदाख्यस्य महाकाव्यस्य विषये प्रकृतपंक्तिलेखकेन डा० रमेशकुमारलौमहाभागेन च लिखितं लेखद्वयं प्रकाश्यते यत्रालोचनादृष्टिर्वैविध्यं भजते।

देववाणी-परिषदो द्वितीयवार्षिकाधिवेशनावसरे समायोजितायां विचारगोष्ठ्यां डा० (श्रीमती) शशि तिवारी—महाभागया पठितः **'अर्वाचीनसंस्कृतरचनानामध्ययनाध्यापनयोः प्रासंगिकता'** इति शीर्षको लेखोऽप्यत्र प्रकाश्यते येनार्वाचीनसंस्कृतसाहित्यस्य वैभवेन पाठकाः परिचिता भवेयुः।

'शिवराजविजये राष्ट्रियभावना'—शीषके लेखे डा० हरिनारायणदीक्षितमहाभागेन पं० अम्बिकादत्तव्याससम्मतं राष्ट्रियभावनायाः प्रकाशनमालोचितम्।

अर्वाचीनसंस्कृतस्य चतुर्थवर्षे ग्राहकसूची, मन्ये, कृपालुपाठकानां प्रयासैर्वृद्धिं गमिष्यति।

सर्वेभ्यस्तत्रभवद्भ्यो नूतनवर्षाभिनन्दनं व्याहरन् विदुषामाश्रवः

रमाकान्तशुक्लः

१५.१.१९८२ ई० प्रधानसम्पादकः

EDITORIAL

With this number *Arvācīnasaṁskṛtam* is entering IVth volume. In this number we are publishing two articles with different approach one by the author of these lines and the other by Dr. Ramesh Kumar Law on '*Sugamarāmāyaṇam*', an epic composed by Acharya Ramesh Chandra Shukla in 1978, published in 1978 and honoured by Uttar Pradesh Sanskrit Akadami and Haryana Sahitya Akadami with award of Rs. 1000 each.

The article "*Arvācīnasaṁskṛtaracanānāmadhyayanādhyāpanayoḥ Prāsaṅgikata*" was read in the seminar organised by Devavani Parishad, Delhi on its second Annual function in 1979. In this article, the author, Dr. Shashi Tiwari has put emphasis on the study and teaching of modern works of Sanskrit as well as the ancient ones to maintain the unbroken chain of Sanskirt learning.

In the article entitied '*Śivarājavijaye Raṣṭriyabhāvanā*' Dr. Hari Narayan Dixit has tried to reveal the national element with his own angle of vision in the *Śivarājavijayam*'—a Sanskirt novel written by Pandit Ambikadatta Vyas in 1893.

In the beginning of its fourth year *Arvācīnasaṁskṛitam* hopes better cooperation from its readers and consequent increase in the number of Subscribers.

(Dr.) Rama Kant Shukla
Chief Editor

15-1-1982

(१) **देववाणीपरिषदः संकल्पनादिवसः**—२१-८-१९-७६ तारिकायां परिषत्संविधानस्य समितिपञ्जीयककार्यालये प्रस्तुतिर्जातेति कृत्वा नवदिल्ल्यां २१-८-१९८२ ई० तारिकायामस्याः सङ्कल्पनादिवसः 'संस्कृतदिवसरूपेण सम्मानितोऽभूत् । समारोहाध्यक्षै र्डाक्टरमण्डनमिश्रमहाभागैर्भणित यत्संस्कृतविदुषां प्रयत्नैरस्माकं संस्कृतिः रक्षिता । तैर्धनप्राप्तिमलक्ष्यीकृत्यापि सस्कृतं रक्षितम् । तेषां मार्गानुसरणं संस्कृतदिवसस्यान्वर्थत्वं विद्यते । तैर्माध्यमिककक्षासु संस्कृताध्ययनस्य समुचितप्रावधानस्यावश्यकता रेखाङ्किता । समारोहमुख्यातिथिभिः डा०सी०आर०स्वामिनाथन्महाभागैर्भणितं यत्केवलं सर्वकारोपलब्धद्रव्यमात्रेणैव संस्कृतस्य रक्षा भवितुं न शक्या अपि तु तदर्थं विदुषां तपस्यैव कारणभूता । तै संस्कृतभाषामाध्ययेन संस्कृताध्ययनस्यौपयिकत्वं संसाधितम् । अस्मिन्नवसरे परिषत्सदस्यस्य डा० सुलेखचन्द्रशर्मणः 'पीएच०डी०प्राप्त्यर्थमभिनन्दनमपिअभूत् ।

(२) **षष्ठस्थापनादिवससमारोहः**—१३-१२-१९८१ ई० तारिकायां परिषदा स्वषष्ठस्थापनादिवसः सम्मानितः(स्मरणीयं विद्यते१३-१२-१३७६ई०तारिकायां परिषदः पञ्जीकरणं संवृत्तम्) । अस्मिन्नवसरे मुख्यातिथिपदमलंकुर्वाणैः वाराणसीस्थसम्पूर्णानन्दसंस्कृतविश्वविद्यालयकुलपतिभिः श्रीगौरीनाथशास्त्रिमहाभागैः परिषदा १९८१ तमवर्षे प्रकाशितानां **'श्रीमदप्पयदीक्षितचरितम्'**, **'आभाणकमञ्जरी'**, **'सदाशयसमुच्चयः'**, **'भारतस्वातन्त्र्यसंग्रामेतिहासः'**, **'कालिदास की कला और संस्कृति (भाग२)'**, **'अर्वाचीनसंस्कृतमहाकाव्यविमर्शः (तृतीयखण्डः)'** इत्याख्यानां षण्णां ग्रन्थानां विमोचनं विहितम्, वेदाध्ययनं प्रोत्साहयितुं च परिषत् प्रेरिता । अस्मिन्नवसरे परिषदस्त्रयः सदस्याः डा० रमेशचन्द्रशुक्ल-डा०कृष्णकान्तशुक्ल-डा०जगदीशदीक्षिताः स्वकृ-

तिषु हरियाणासाहित्याकादम्युत्तरप्रदेशसंस्कृताकादमीभ्यां विशेषपुरस्कारलाभार्थमभिनन्दिता अभूवन् । समारोहेऽस्मिन् शिशुश्लोकपाठोऽपि समायोज्यत यस्मिन् अभिनव-शुक्ल - सुभद्रा-सम्पूर्णा-हेम-दिव्येशझा—कैलाशपतिप्रभृतिभिः श्लोकपाठः कृतः । समारोहस्यास्य प्रमुखमाकर्षणमासीद् अन्त्यश्लोकम् यस्मिन् डा० सी० आर० स्वामिनाथन्-श्री के० पी० ए० मेनन-पं विष्णुकान्तशुक्ल-डा० उमेशचन्द्रपाण्डेय-श्रीवेदानन्दझा-श्रीरवीन्द्रनागर-श्रीबलदेवानन्दसागर - प्रभृतिभिः सस्वरं श्लोकाः प्रस्तुताः । समारोहाध्यक्षैः सर्वोच्च-न्यायालयन्यायमूर्तिश्रीबालकृष्णएराडिमहाभागैरुक्तं यद्भारतीयासंस्कृतिः संस्कृताश्रितास्ति; अतः संस्कृतमवश्यं पठनीयम् ।

(३) ग्रन्थविमोचनम्—२४ - १२ - १९८१ तारिकायां नवदिल्ल्यां 'मेघदूत : एक विश्लेषण' इत्याख्य ग्रन्थं विमोचयता प्रयागस्थडाक्टरगंगानाथझाकेन्द्रीयसंस्कृतविद्यापीठ-प्राचार्यैर्डाक्टरगयाचरणत्रिपाठिभिरुक्तं यत्संस्कृतभाषानिबद्धग्रन्थानां पाण्डुलिपीनां प्रकाशनेन साकं संस्कृतविषयकाणां तत्तद्भाषानिबद्धानामद्यावधि अप्रकाशितानां च ग्रन्थानामपि प्रकाशन संस्कृतवाङ्मयस्य पूर्णपरिज्ञानार्थमावश्यकम् ।

(४) विद्यावाचस्पतिपण्डितपरमानन्दशास्त्रिस्मारक—व्याख्यानमाला—२-१-१९८२ तारिकायां नवदिल्ल्यां परिषदायोजितायामस्यां व्याख्यानमालायां डा० रामसुरेशपाण्डेयमहाभागेन 'संस्कृतव्याकरणस्य वैशिष्ट्यम्' इति विषयमवलम्ब्य सारगर्भितं भाषणं कृतम् । समारोहस्याध्यक्षता प्रसिद्धंतिह्यविदा डा०गोविन्दप्रसादोपाध्यायेन कृता ।

स्मरणीयं विद्यते यद्देववाणी—परिषदा विंशशताब्द्याः मौखिकपरम्परायाः प्रख्यातवैयाकरणगुरोर्विद्यावाचस्पति-पण्डितपरमान्दशास्त्रिणः किं च सुप्रथितसंस्कृतसाहित्या-चार्यस्य कविरत्नश्रीब्रह्मानन्दशुक्लस्य स्मृतावस्माद् वर्षाद् व्याख्यानमाले प्रवर्तिते स्तः, ययोः प्रतिवर्षं संस्कृतव्याकरणं साहित्यं चावलम्ब्य विदुषां व्याख्यानान्यायोजयिष्यन्ते । ✻

'सुगमरामायण'-समीक्षा

(डा० रमाकान्त शुक्ल:)

आचार्यश्रीरमेशचन्द्रशुक्लप्रणीतं चतुर्दशसर्गात्मकं सुगमरामायणाख्यं महाकाव्यं (उत्तरप्रदेशसंस्कृताकादमी-पुरस्कृतं) १८-८-१९७८ तारिकायां प्रकाशितमस्ति ।[1] इत: पूर्वं श्रीशुक्लमहोदयेनानेका गद्यपद्यात्मिका संस्कृतकृतय: प्रणीता यासु मुख्या इमा: सन्ति—१. प्रबन्धरत्नाकर:, २. नाट्यसंस्कृतिसुधा, ३. गान्धिगौरवम् (उत्तरप्रदेशशासन-पुरस्कृतम्), ४. लालबहादुरशास्त्रिचरितम्, ५. भरत-चरितामृतम् (उत्तरप्रदेशशासनपुरस्कृतम्) ६. विभावनम्, ७. बंगलादेश:, ८. गीतमहावीरम् (उत्तरप्रदेशशासन-पुरस्कृतम्) ९. संस्कृत-वैभवम्, १०. चारुचरितचर्चा (उत्तर-प्रदेशसंस्कृताकादमीपुरस्कृता) च। सुगमरामायणानन्तरं कविना द्वौ ग्रन्थावन्यावपि प्रणीतौ—श्रीकृष्णचरितम् (उत्तरप्रदेशसंस्कृताकादमीपुरस्कृतं महाकाव्यम्) भारत-स्वातन्त्र्यसंग्रामेतिहासश्च। इहास्माभि: सुगमरामायणमव-लम्ब्य किञ्चिल्लिख्यते ।[2]

---

१. प्रकाशिका-देववाणी-परिषद्, दिल्ली, ६ वाणी विहार:, नयी दिल्ली-११००५९ । १९७८। मूल्यम् रु० ३५-०० ।

२. सुगमरामायणकारस्य परिचयार्थं विलोकनीयम् सुगम-रामायणम्, पृ० २१४ ।

चतुर्दशसर्गात्मकमिदं 'सुगमरामायण'ख्यं महाकाव्यं संस्कृत-रामकाव्य-परम्पराया अनुपमं रत्नं कवेर्व्यापकानुभवस्य सफलमभिव्यञ्जनं, भारतीयसंस्कृतेश्चारुचित्राणां मञ्जूषा, सद्विचाराणां संघातस्थलम्, चारुकल्पनानामावासभूमिः, कवेर्नवनवोन्मेषशालिन्याः शेमुष्याः क्रीडांगणम्, भगवत्या गीर्वाणवाण्याः समुल्लासश्चेति निश्चप्रचं वक्तुं शक्यते। महाकाव्येऽस्मिन् कविना यथा रामकथाया आबालबुद्धिग्राह्यं मनोज्ञमाख्यानं विहितम्, यथा च श्रीरामादीनां चरित्राणि प्रस्तुतानि, यथा च गम्भीरव्यापकजीवनानुभवोऽभिव्यक्तः, यथा च स्वविचारौदात्त्यसूचकानि सूक्तिरत्नानि जगते उपायनीकृतानि, यथा च महाकाव्यरचनायां परम्पराप्रयोगौ समाश्रितौ, यथा च मानवीयसम्बन्धानामादर्शनिर्वाहः प्रस्तुतः, यथा च शासकस्यादर्शः संकल्पितः, यथा च लोकाराधनं सर्वोच्चत्वेन स्वीकृतम्, यथा च लोकजीवनस्य संस्कृतेश्चांकनं व्यधायि, यथा च सभक्तिभावं भगवान् स्तुतः, यथा च शब्दार्थगतं रचनागतञ्च तत्तद्वैशिष्ट्यमाविष्कृतम्, यथा च लोकोपकाराय सद्यःपरनिर्वृतिकान्तासम्मितोपदेशावभिव्यक्तौ तदेतत्सर्वमपि सचेतसां मोदायैवावतिष्ठते। सन्तिष्ठमानेष्वपि बहुषु रामकाव्येषु सुगमरामायणोपनिबन्धनं कवेः स्वोत्तरदायित्वनिर्वाहकत्वं स्वधर्मपरिपालकत्वं च सूचयति।

महाकाव्येऽस्मिन् प्रथमः सर्गः प्रस्तावनाभूतः। तत्र रामकथाया संक्षिप्त उल्लेखोऽस्ति। कविः सर्वप्रथमं श्रीरामं स्तौति—

"श्रीरामं शरणं भजे रघुपतिं तं जानकीवल्लभं
धर्मं स्थापयितुं कृपामयमना यो मेदिनीमण्डले

मर्यादां परिपातुमत्र विलसं ज्ञानञ्च मुक्तिप्रदं
शीलाब्धिर्जनुदरग्रहीतसुचरितः श्रुत्युक्तवर्त्मश्रितः[1]

तदनु रामकथामवतारयति—

"जातः सूर्यकुले ह्यसौ सुविदिते वीरत्वज्ञानार्चिते
सन्नीतिप्रथिते सुतो दशरथक्षोणीपतेः शीलवान् ।
ज्येष्ठः शिष्ट ऋजुस्वभावरुचिरः शूरः सतामग्रणीः
आसीत् सोऽखिलमानवेष्वनुपमो विद्वान् सदाचारवान्
आसंस्तस्य विनीतचारुचरिता वीरा गुणद्योतिताः
आज्ञापालनतत्पराः सहृदयोपास्यास्त्रयश्चानुजाः ।
शत्रुघ्नो भरतश्च कीर्तिकलितो धर्मस्थितो लक्ष्मण[2]-
श्चत्वारोऽपि मनस्विनः प्रियतमा भूमण्डलस्याभवन् ।।

प्रायो वाल्मीकिकृता रामकथैव कविना आधारभूततया स्वीकृता, तद्यथा–

"सूर्यकुले अयोध्याधिपतेः राज्ञो दशरथस्य कौशल्या-कैकेयी-सुमित्राख्यास्तिस्रः पत्न्यो बभूवुः यासु कौसल्यायां श्रीरामचन्द्रः, कैकेयां भरतः सुमित्रायाञ्च लक्ष्मणशत्रुघ्नौ जनिं लेभिरे। समयानुसारं रामेण शम्भुधनुर्भङ्क्त्वा विदेहाधिपतेर्जनकस्य दुहिता सीता परिणीता। कैकेयीवरयाचनाप्रस्तावे सति रामश्चतुर्दशवर्षेभ्यो वनं गतो, दशरथश्च दिवं गतः। रामेण वने कष्टानि सोढानि। तेन लोकाराधनाय स्वदयिता जानकी अपि त्यक्ता।"[3]

इयमेव कथा यथासौविध्यं द्वितीयसर्गतश्चतुर्दशसर्गं यावत्कविना प्रस्तारिता। द्वितीयसर्गे रामगुणानुवर्णनम्, तृतीयसर्गे रामस्य विद्याध्ययनम्, चतुर्थसर्गे विश्वामित्राय रामोपलब्धिः, पञ्चमसर्गे शरच्छोभावर्णनम्, षष्ठसर्गे

१. सुगमरामायणम् १/१

२. तदेव १/२-३

३. द्रष्टव्यम्—सुगमरामायणम् १।२—१६

विश्वामित्रयज्ञरक्षा ताटकासुबाहुवधश्च, सप्तमसर्गे रामादिशुभोद्वाहः, अष्टमसर्गे रामवनगमनम्, नवमसर्गे रामवनवासः सीताहरणं च, दशमसर्गे सुग्रीवसौहृदम्, एकादशसर्गे लङ्कादहनम्, द्वादशसर्गे रावणवधः, त्रयोदशसर्गे रामाभिषेकः चतुर्दशसर्गे सीतानिर्वासनं, रामस्वर्गारोहणं रामराज्यमाहात्म्यं च वर्णितानि। अस्यां प्रख्यातकथायां कविना यत्र क्वचिन्नवीनोद्भावनापि कृता। उदाहरणार्थं शूर्पनखाया विरूपीकरणप्रसंगः प्रस्तूयते। कविः मर्यादापुरुषोत्तमश्रीरामस्य समक्षे बलप्रयोगपुरस्सरं नार्याः नासिकाकर्तनं समुचितं न मन्यते। केवलं लक्षणया नासिकाकर्तनं स्वीकरोति। शूर्पनखा रामं लक्ष्मणं च समुपैति। सा राममनुरणद्धि किन्तु रामस्तस्या वचनं नानुमन्यते। तदा सा कोपाकुलमानसा भवति :—

'प्रभावपूर्णां बलशालिनीं मा—
मवेहि लङ्काधिपतेः स्वसारम्
वसामि नाहं परतन्त्रतायां
पुष्णामि नैजञ्च विचारराशिम्
न चेच्छ्रुतं मद्वचनं त्वयाद्य
विनशयिष्यामि तवानुजेन
समं शठ त्वां शृणु मत्प्रतिज्ञां
वसन्ति मद्बन्धुजना वनेऽस्मिन् ।।[1]

रामस्तद्वचनं श्रुत्वा भणति—'स्वैरिणि, त्वं तु विना नासिकां विना च श्रवणे प्रतिभासि, यतो हि न त्वं कस्यचिद्विचारं जिघ्रसि नापि त्वं कस्यचिद् वचः शृणोसि'—

निशम्य तस्या वचनं कठोर—
मुवाच रामः प्रतिभासि मे त्वम्
विना च नासा श्रवणे स्वतन्त्रे
प्रयाहि न त्वां तरसा दिदृक्षुः[2]।

१. सुगमरामायणम् ६।६०-६१
२. सुगमरामायणम् ६।६२

एवमेव सीतापरित्यागप्रसंगेऽपि काचिन्मौलिकता लक्ष्यते। सीता देवरवधूभिः साकं काव्यगोष्ठ्यास्वादं गृह्णाति। देवरवध्वो निदाघकालं वर्णयन्ति, प्रातःकाले सरित्तटविहारस्य चर्चां च कुर्वन्ति। काव्यगोष्ठ्यनन्तरं सीता सद्य एव गुप्तचराच्छ्रुतसीतापवादोदन्तं राममुपयाति। रामस्तस्या अभिलाषं पृच्छति। सा ऋषिमुनियुतं तपःपूतं गंगातटसुविमलं सौम्यहरिणं कुसुमफलभाजां तरूणां छायाभिः प्रियतरं पुण्यविपिनं द्रष्टुं स्वाभिलाषं कथयति (उत्तररामचरितवत्)। रामस्तस्या अभिलाषपूर्ति प्रतिजानीते। स शासनसम्बन्धिस्वनियोगपालनं तु करोति किन्तु तस्य स्वान्तं निबिडतमशोकाकुलं भवति। किंकर्तव्यविमूढः सन् स स्वभ्रातृणां पुरतः सीतापवादोदन्तं निदधाति तत्प्रशमनार्थं च सीतात्यागं प्रस्तौति, ते च इदं निष्ठुरं कृत्यमघजलधिपाति प्रतिपादयन्ति। तदा रामो लक्ष्मणं सीतां वाल्मीकेराश्रमं नेतुं निगदति :—

वने त्यागस्तस्या अघजलधिपाती कुगतिकृ-
न्मतः सर्वैर्बन्धुप्रथितनयमार्गैः सुकृतिभिः
नयन् रामो वेश्म प्रियमनुजसौमित्रिमथ तं
न्यगादीन्नेतुं तामृषिसुरनदीदर्शनरुचिम्
तपःक्षोणीविद्वदृषिसुरनदीदर्शनरुचिम्
अवादीत् सीता मामनुज निजकांक्षां बहुफलाम्
अनेन व्याजेन त्वमतिशयपुण्यां जनकजां
वनं नेतुं योग्यः प्रवरमुनिवाल्मीकिवसतिम्॥[1]

लक्ष्मणो दुःखक्लान्तोऽपि तथा करोति। उपवाल्मीकाश्रमपदं स परिमितपदैः सीतात्यागोद्देश्यमपि सीतायै निवेदयति। मूर्च्छिता सीता चेतनां लब्ध्वा नयनजलधारां मुञ्चन्ती स्वभाग्यं च निन्दन्ती कतिपयपदां वाचं वदति—

---

१. सुगमरामायणम् १४।७८-७९

विशुद्धां लब्ध्वाग्नाववनिरमणो मामतितरां
समक्षं सर्वेषां जनविहितवादं श्रुतिगतं
विधायामुञ्चन्मां रविकुलमतो वा श्रुतिमतो
भवांस्त्यागो राजन् ! मम वदतु मां साम्प्रतमयम्
न सन्ति प्राणा मे कथमपि च रक्ष्याः प्रियतराः
समोपेक्षायोग्या मयि यदि भवेन्नो स्थितिगतं
तदीयं मे रक्ष्यं परमशुभतेजः शुचितमम्
इदं दुःखात्यन्ताद् व्यथितहृदयोवत्स शुचमयात् ।।
नृपस्योक्तो धर्मो मनुभगवता रक्षणपरः
समेषां वर्णानामृषिमुनितपोलीनमनसाम्
अहं त्यक्ता भार्यापि न किमिह रक्ष्या नृपतिना
वद त्वं मद्वाक्यादवनिरमणं देवर मम
मम श्वश्र्वः सर्वाः मम च सकला देवृदयिताः
भवत्यो नारीत्वाद्व्यथितजनपीडां मम भृशम्
अहो जानन्तीमां न च किमपि वाच्यं हि वचनम्
अनुक्रोशं यूयं त्यजत मयि सर्वाः न सदयाः ।।[1]

लक्ष्मणस्तस्या वचो गृहीत्वा अयोध्यां प्रति प्रस्थितः। तदैव महर्षिर्वाल्मीकिरायाति, स च भणति–

स्थितिर्ज्ञाता ध्यात्वा न तु गमय चिन्तां स्वहृदयं
पतिः खिन्नो भूत्वानृतकथनमाकर्ण्य तनये !
कृता त्वं सन्त्यक्ता त्वयि न कुपितं तस्य हृदयम्
अदेह्यायाता त्वं जनकसदने सम्प्रति सुते।

वाल्मीकिः सीतां स्वाश्रमं नयति। इत्थमस्मिन् प्रसंगे कविना करुणापि रक्षिता,। सुखान्ततापि च। तेन रामस्य चित्तस्य दयामयत्वं लोकरक्षकत्वं चोभयमपि रक्षितम्। वातावरणं सीतात्यागाय रामायण अनुरूपं व्यवस्थापितम् प्रारम्भ एव काव्यगोष्टीप्रसंगात्। यद्यपि रामस्य स्वर्गा-

१. सुगमरामायणम् १४।८३-८६

रोहणमपि कविना कीर्तितं किन्तु काव्यस्य सुखान्तता अक्षुण्णा वर्तते। कथायामनवाश्यको विस्तारो नैव विहितः।

महाकाव्येऽस्मिन् प्रायः सर्वाण्यपि रामकथाप्रसिद्धानि पात्राणि सन्ति येषां चरित्राणि कथानकोपयुक्तान्येव कविना प्रस्तुतानि। रामस्य चरित्रे मर्यादापुरुषोत्तमयोग्या सर्वेऽपि गुणा दर्शिताः। स धर्मं स्थापयितुं मर्यादां पातुञ्च स्वजीवनमर्पयति। स मनुजेषु प्रगाढं स्नेहं निदधाति। स पितरि तिसृष्वपि च मातृषु समां भक्तिं निदधाति। स मधुरवाक् सेवाव्रतश्चास्ति। सर्वा अपि मातरस्तं विलोक्यातुलं प्रमोदं प्राप्नुवन्ति। स लोकोदयार्थमनिशं पवित्रभावं बिभर्ति। स भ्रातृषु स्नेहं दधाति—

द्रष्टुं क्षमो न भवति स्म विषण्णचित्तं
प्रह्वः स्वकीयमतिकोमलमानसः सः
स्निग्धोऽनुजं कमपि राम उदात्तभाव-
स्तेषां हिताय सततं महतेऽयतिष्ट।

क्रीडास्वथो गुरुमना अनुजं स्वकीयं
प्रीत्या भवन्नपि जयी स्वयमेव मत्वा
बन्धुर्जयी स इति घोषयति स्म रामः
स्नेही भवेत् स इव बन्धुषु कोऽन्यबन्धुः॥[1]

रामो गुरुसेवनव्रतोऽस्ति। सः स्वगुरुं वसिष्ठं मनसा, वाचा कर्मणा च भजन् प्रीणाति—

"गुरुं वसिष्ठं सह बन्धुभिः प्रियै—
हृदापि वाचा क्रिययानुवासरं
भजंश्च भक्त्या विनयेन सादरं
गुरुं प्रसन्नं कृतवांस्तपस्विनम्

१. सुगमरामायणम् २।१४-१५

गुरोर्विनेयश्चरणौ निपीडयन्
सदा तदाज्ञां परिपालयन् मुदा
गुरोर्हि सेवां करवाणि कामहं
नतो भवन् सम्प्रति स न्यवेदयत् ।।[1]

स आदर्शश्छात्रोऽस्ति । स गुरोः गामुपास्ते, पूजावसरे गुरवे पयः प्रसूनानि फलानि सदर्भाः समिधश्च समर्पयति; स गुरोराज्ञां प्रतिपालयति, प्रातःकाले गुरोः प्रागुत्तिष्ठति रात्रौ च गुरोरनन्तरं स्वपिति; गुरुपत्नीमरुन्धतीं मातरमिव सेवते। स स्वल्पेनैवानेहसा धनुर्विद्यां सकलाः कलाः, वेदान्, दर्शनानि न्यायांश्च अधिगृह्णाति। गुरोराश्रमे यदा विशेषशास्त्रार्थ-सभायोज्यते तदा स अनुजैः साकं तत्र भागं गृह्णाति। सः प्रतियोगिनां गणे विजेता भवति प्रशंसां च प्राप्नोति। स निबन्धपाठादिषु प्रथमं स्थानं लभते। तस्य साम्यं कोऽपि छात्रो न लभते—

बभूव शिक्षालयजीवनेऽनिशं
प्रशंसितश्लाघितवन्दितो भृशं
न तस्य साम्यं लभते स्म कोऽपि च
बभावसौ स्नातकमौलिभूषणम् ।।[2]

सः विद्या अधीत्य गुरोरनुज्ञां प्राप्य अनुजैः साकं राज-गृहमायाति। विश्वामित्रस्तमेव यज्ञरक्षार्थं समर्थं ज्ञात्वा दशरथं याचते—

सुतोऽस्ति रामस्तव सर्वथैव
संरक्षणे यज्ञविधेः समर्थः—
स्तमद्य याचे क्षितिपं भवन्तं
कृपामय त्वं मम देहि राजन् ।।[3]

---

१. सुगमरामायणम् ३।३-४
२. सुगमरामायणम् ३।१८
३. सुगमरामायणम् ४।१८

रामो गुरोर्विश्वामित्रस्य यज्ञविघ्नकरं राक्षसवृन्दं समाप्नोति, नवतारुण्य एव च स्वप्रतापं सूचयति। मिथिलापुर्यां च शिवधनुर्भङ्गेन सः स्वबलं सूचयति। एवमेव रामे सर्वेऽपि मानवीया आदर्शगुणाः सन्ति। सीतापरित्यागप्रसंगे तस्मिन् कर्तव्यपालनस्य एकपत्नीव्रतत्वस्य अपारकरुणामयत्वस्य च समुन्मीलनं दृश्यते। तस्मिन् कवित्वमपि विलसति; सहृदयतापि वर्तते। किं बहुना, रामो हि समेषामादर्शगुणानां संघातरूपेण अवतारितः कविनास्मिन्काव्ये।

दशरथो न मोहाविष्टोऽपि तु दृढचित्तोऽस्ति। विश्वामित्रस्य यज्ञरक्षायै स रामं निर्विचिकित्सं प्रेषयति। स विश्वामित्रं प्रति कथयति—

मदीयसूनुं यदि नाथ रामं
जानाति विद्वानुचितं समर्थं
तपोवनस्याखिलकार्यहेतोः
सप्रश्रयं तेऽद्य समर्प्यते सः

× × ×

सुनोऽस्ति रामः परमप्रियोऽस्ति
प्राणानपि स्वान् नितरां हि तुच्छान्
अवैमि विद्वन् मतिमंस्तदग्रे
यज्ञात् परो नास्त्यपि सः परन्तु[1]

एवमेवान्येषां पात्राणामपि समुचितव्यक्तित्वविकासः कृतः।

सुगमरामायणस्य सीता विनीता वधूः, पतिव्रता पत्नी, परदुःखकातरा दयामयी निर्भीका सुशिक्षिता च नारी, अथ च परमा सती अस्ति। तस्या मातृरूपं नाधिकमस्मिन् काव्ये विकसितम्। केवलं तस्य संकेत एवास्ति।

चित्रकूटे सीताया विनीतवधूरूपं समभिव्यक्तम्—

---

१. सुगमरामायणम् ४।२०, २३

सर्वश्वश्रूचरणकमलेष्वादरेण प्रणामं
सीता चक्रे पदसरसिजेषु स्वकीयां नमस्यां
प्रीतिश्रद्धासरसहृदया मातरश्चापि तस्या-
श्चक्रुश्चाशीः प्रियशुचिगिरा साप्यमेलीच्च तासु[1]

दशरथमरणं ज्ञात्वा सीता परमं शोकमवाप्नोति। सा निजश्वश्रूणां वैधव्येन पीडिता भवति—

दृष्ट्वा सर्वा मलिनवदनाः पीड्यमाना भृशं ताः
सीता भूत्वा व्यथितहृदया सादरं नम्रवाचा
पप्रच्छ स्वां दयितजननीं मातरं लक्ष्मणस्य
अम्बाः प्रेक्षे न तु च भवतीष्वद्य सौभाग्यचिह्नम्

पूज्यस्तातः क्षितिपतिरपि क्षेमवान् वर्ततेऽद्य
श्वश्र्वः श्रुत्वा रुरुदुरधिकं तां गिरां स्वस्नुषाया-
स्तूष्णीं जाता भरतदयिता माण्डवी तां तदानीं
पूज्यो भर्ता भगिनि भवतीं सूचयेत् स्वञ्च बन्धुम्

वध्वः सर्वा हृतमुखविभा व्यक्तशोका विलेपू
रामो ज्ञात्वा भरतवचनात् स्वर्गवासं पितुश्च
सीता जाता व्यथितहृदया लक्ष्मणो दुःखितोऽभूद्
दुःखं जग्मुः सकलमनुजा मन्त्रिणः श्रीमहर्षिः[2]

सा आतिथेयी अस्ति—

सीता श्वश्रूचरणकमलेष्वादरेण प्रणम्य
स्वैराशीभिर्विमलमनसा यातृवर्गं कृतार्थं
कृत्वा सद्यः प्रणतहृदयो लक्ष्मणश्चापि तत्र
पूर्णौचित्यैर्भृशमभिमिलन् मातरं ह्याचचक्षे[3]

---

१. सुगमरामायणम् ८।५४
२. सुगमरामायणम् ८।५६, ५७, ५८
३. सुगमरामायणम् ८।७६

रावणं प्रति तया यदुक्तं तत्र तस्या निर्भीकता स्फुटं चकास्ति—

तृणं विधायान्तरतः शुचिस्मिता
गिरां हि सीता परुषां परं हितां
जगाद लङ्काधिपतिं शनैस्ततो
मनो निवर्तस्व पथोऽघदारुणात्

गृहाण मार्गं शुभवर्त्मगामिना-
मवेहि धर्मं कुरु धर्मपालनं
यथा स्वकीयाः परिपासि योषित-
स्तथैव लङ्केश परस्य पाहि ताः

सदा स्वदारेषु रमस्व रावण !
न जायते यः परितुष्टमानसः
स्वकीयदारेषु स याति भर्त्सना-
मवाप्नुतेऽकीर्तिमुपैति सङ्कटम्

अनीतिलीनो नृपतिः कुमार्गगो
निपात्य देशं परमार्तिसागरे
समस्तराष्ट्रं नयतेऽपि चापदम्
अतो भवेयुः क्षितिपाः सुमार्गगाः

परस्य चौरो हरते यथा धनं
तथैव मां त्वं हृतवान् न लज्जसे
विलोक्य शून्यं गतरामलक्ष्मण-
मेकान्तशून्यं ह्युटजं भवंश्छली

न लज्जसे त्वं परकीयदारहृत्
नृपोऽपि संस्त्वं कुपथे प्रवर्तसे
महाधमस्त्वं न बिभेषि कल्मषात्
अपेहि धिक् त्वां ! मतिमन्दरावण[1]

१. सुगमरामायणम् ११।७६–८०

अन्ते च सा रागद्वेषहीना तपस्विनीव दृश्यते । सा निर्विकार-भावेन मातरं भुवं प्रविशति—

महर्षेर्वाल्मीकेः स्वशिरसि तदाज्ञां निदधती
यदा मञ्चं सीता सह लवकुशाभ्यामकुरुत
सनाथं दृष्ट्वा तां रघुपतिमनोऽत्यन्तमधिनोत्
अहो सीतेयं मे हृदयदयिता जीवनसुधा

यदौत्सुक्यं चैतत् विततमभवत् तत्र मुनिना
सतीत्व सिद्धं त्वं कुरु मम सुते व्याहृतमिति
भवन्ती सा ग्लाना निगदितवती मातृवसुधे
भव त्वं दीर्णा मां कुरु सपदि चोत्सङ्गनिहिताम्

सति प्रोक्ते चैवं परमविमलज्योतिरुदगात्
क्षितेः रन्ध्रात् सीता विहितविवरोत्सङ्गसुखदे
ममौ रामो हा हा व्यथितहृदयो व्याहरदिति
इदं दृश्यं भूत्वा परमचकितं प्रैक्षत जगत्[2]

प्रतिनायके रावणे कविना उदात्तगुणानामपि दर्शनं कृतम् । तस्य स्वाभिमानपरता-नीतिज्ञता-वीरता-इष्टदेव-परताप्रभृतयो गुणाः कवेश्चारु-चरितविकासनक्षमतां समुद्-घोषयन्ति । तस्य परनारीहर्तृत्वं स निन्दति किन्तु तस्य सद्गुणानपि स्वीकरोति । पश्यन्तु रावणस्य राजनीति-वैशारद्यम्—

प्रोचे स नीतिज्ञवरान् स्वमन्त्रिणो
लङ्काधिराजो विजयोऽस्ति कोविदाः
मन्त्रप्रधानो निगदन्ति मन्त्रिणा-
मादित्सुरस्मीति वदन्तु साम्प्रतम्

---

१. सुगमरामायणम् १४।१०२-१०४

मन्त्रोऽस्ति पञ्चाङ्ग इति प्रधीश्वरा:
वदन्ति तं ते सहतेऽत्यनेहसं
नोऽतस्तमुद्दिश्य भवद्भिरुच्यतां
नीतिं परज्यानिनिजोदयां च ताम्

रामः प्रपन्नो जलधेस्तटेऽधुना
सैन्यान्वितोऽसौ तरसा पुरीमिमां
संरोत्स्यतेऽतो भवतां हि सम्मति-
र्ग्राह्यास्ति काले समरोन्मुखे बुधाः[1]

रावणो राम इव योद्धास्ति—
तौ युध्यमानौ समरे परस्परं
सम्मोदयन्तौ भृशमर्दने रतौ
शस्त्रास्त्रसञ्चालनदक्षतागतौ
संवीक्षितौ विस्मितमानसैर्भटैः[2]

रावणस्य प्रशंसां स्वयं रामोऽहि करोति—

हनुमतश्चरित्रमपि किञ्चिन्नावीन्यं बिभर्ति। एतदतिरिक्तं कौशल्या–कैकेयी–सुमित्रा–भरत–लक्ष्मण–शत्रुघ्न–मन्थरा–शतानन्द – विश्वामित्र – जनक– वसिष्ठ–भरद्वाज–उर्मिला–माण्डवी – श्रुतकीर्ति – विभीषण – इन्द्रजित्सुग्रीव–अंगद–जाम्बवद्–द्विविद–नल–नील–त्रिजटा– प्रभृतिपात्राणां पारम्परिकं रूप तु कविना रक्षितमेव सहैव तत्र काश्चिद्विशेषता अपि समुद्भाविताः। सीतादेवरवध्वः सुपठिता नार्योऽत्र काव्ये समुपस्थापिताः। अत्रास्माभिः स्थानानुरोधात्सर्वेषां पात्राणां चरित्राणामुद्घाटनं कर्तुं नैव शक्यते; सत्यवसरेऽन्यत्रैतच्चर्चा विधास्यते।

---

१. सुगमरामायणम् ११।३४—३६
२. सुगमरामायणम् १२।६५

अत्र केवलं महाकाव्यस्यास्य द्वित्राणां विशेषतानामेवोल्लेखो विधीयते। कविना सुगमरामायणव्याजेन स्वकीयाः सामाजिकविचाराः प्रकटीकृताः। अद्यत्वे शासनस्य लोकोपकारकर्तृत्वं सिसाधयिषुः कविः स्वनिबद्धवक्तृद्वारेण यदपि कथयति तत्खलु कवेश्चिन्तनस्य परिचायकम्। चित्रकूटे भरतं प्रति रामो यदपि भणति तत्र कवेः राज्यसम्बन्धिनो विचाराः प्रस्फुटिताः। तदनुसारं शासकस्य प्रमुखं कर्तव्यमिदमस्ति यत्सः प्रजां सुतनिर्विशेषं पालयेत्। यस्मिन् शासने प्रजाः पीडिता भवति, यत्र च शिक्षा-स्वास्थ्य-सुरक्षाश्च नागरिकेभ्यः सुलभा न भवन्ति, यत्र च सामाजिकन्यायस्य विलोप इव दृश्यते, न तच्छासनमभिवन्द्यम्।

सुगमरामायणे प्रधानरसोऽस्ति धर्मवीरः। रामः स्वशैशवात्प्रभृति दिवंगमनं यावत् स्वधर्मं पालयति। सः स्वसुखनिरभिलाषः सन् लोकहेतोः खिद्यते। स व्यक्तिगतं सुखं लोकसेवायै परित्यजति। कविना तस्य धर्मवीरत्वं सम्यक् प्रतिपादितम्। तदनुसारमेव लालित्ययोजना कृता। धर्मवीरस्याङ्गित्वमन्येषां रसानां चाङ्गतात्र चकास्ति।

कविनास्मिन् काव्ये लोकसेवा सर्वप्रामुख्येन स्वीकृता। मन्ये, कविरेतत्कथयितुमिच्छति यन्मानवेन प्रत्येकं स्थितौ लोकहिताराधनं कर्तव्यमेव। कविना स्वकाव्यस्य नायके श्रीरामचन्द्रे लोकसेवैव सर्वोच्चत्वेन प्रतिष्ठापिता। लोकापवादाद् रामेण सीता परित्यक्ता, अतः तत्त्यागशोकसन्तप्तेनापि तेन लोकसेवा नैव त्यज्यते—

असह्यं स्वं शोकं कथमपि च कृत्वा हतबलं
शशास स्वं राज्यं कृतवशरजाः सन् रघुपति-
र्जनानां रक्षायामवहितमना लोचनगतो
ह्यभूल्लोके रामो भवजनहितस्वान्तनृपतिः[1]

---

१. सुगमरामायणम् १४।६४

सुगमरामायणे भक्तानां कृतेऽपि प्रभूता सामग्री विद्यते। ये श्रीरामं स्तोतुमिच्छन्ति तेऽत्र स्तुतिपरकाणि पद्यानि लब्धुं शक्नुवन्ति। क्वचित् कविमुखेन, क्वचित् कविनिबद्धवक्तृ-मुखेन[1] च श्रीरामः स्तूयते। सर्गारम्भेषु महाकाव्यान्ते च कविर्यैः पद्यैः श्रीरामं स्तौति तेषां मेलनेन श्रीरामस्तोत्रं निर्मातुं शक्यते यथा—

श्रीरामं शरणं भजे रघुपतिं तं जानकीवल्लभं
धर्मं स्थापयितुं कृपामयमना यो मेदिनीमण्डले
मर्यादां परिपातुमत्र विमलं ज्ञानञ्च मुक्तिप्रदं
शीलाब्धिर्जनुरग्रहीत् सुचरितः श्रुत्युक्तवर्त्माश्रितः[2]

रामं नमामि तमहं नतमस्तकः सन्
स्नेहं प्रगाढमनुजेष्वनिशं न्यधाद् यो
भक्तिं स्वपूज्यपितरि प्रबलां पवित्रां
स्वाम्बासु किञ्च महतीं नितरां प्रशस्ताम्[3]

नमामि रामं गुरुसेवनव्रतं
चरित्रचारु — प्रियसद्गुणरतं
पितुश्च मातुर्हृदये सुखप्रदं
दृढं तदाज्ञापरिपालने रतम्[4]

अनन्तभक्तिं निदधौ गुरौ यो
भूत्वा तदादेशपरः सदैव
पपाठ विद्याः सकला विनीतो
रामं नमामि प्रणतो भवंस्तम्[5]

---

१. द्रष्टव्यम् सुगमरामायणम् १३।५३-६१
२. सुगमरामायणम् १।१
३. सुगमरामायणम् २।१
४. सुगमरामायणम् ३।१
५. सुगमरामायणम् ४।१

दशरथात्मजराममृपामयं
रघुकुलोद्भववीरशिरोमणिम्
भवहितैकधियं बुधभूषणम्
अमितशक्तिनिधिं शरणं श्रये[1]

यः स्वभारतमहीमहिमानं
संररक्ष निजबाहुबलेन
धर्मकर्मविमुखाधमपुंभ्य-
स्तं नमामि रघुनन्दनरामम्[2]

दशरथसुतं रामं ज्ञानार्णवं बलसागरम्
ऋषिमुनिसुधीमान्यं दीनप्रियं करुणास्पदं
सुकृतिकुलसेव्यं पापध्वंसनोचितपौरुषं
सकलजगतीमर्यादारक्षणक्षममाश्रये[3]

लोकाराध्यं दशरथसुतं दीनबन्धुं शरण्यं
मर्यादाया जगति सततं पालकं न्यायनिष्ठम्
भक्तोद्धारोचितबलजुषं मातृपित्रोरनुज्ञा-
रक्षालग्नं सदयहृदयं रामचन्द्रं नमामि[4]

समा उषित्वा हि चतुर्दशाज्ञां
वने पितुर्यः परिरक्षति स्म
सुखं च दुःखं सममेव योऽवेत्
प्रणम्यतेऽसौ विनयेन रामः[5]

---

१. तदेव ५।१
२. तदेव ६।१
३. तदेव ७।१
४. तदेव ८।१
५. तदेव ९।१

बाहोर्बलाद् यस्य तपश्च विद्याः
धर्मश्च शुभ्राः शुभमार्गनीतयो
न्यायश्चरित्रं जगतीह रक्षां
सम्प्राप्नुवंस्तं प्रणमामि रामम्[1]

नमामि रामं विपदां निबर्हणं
सदार्तपुंसामवलम्बमङ्गलम्
निवासवृक्षं मुनिसाधुपक्षिणां
परार्घ्यपात्रं यशसामरिन्दमम्[2]

भक्तार्तिविध्वंसकपौरुषास्पदम्
आर्पात्तमग्नोद्धरणोचितप्रभुं
साधुस्वभावर्षिमहर्षिरक्षकं
रामं भजे दीनदयालुमानसम्[3]
रामं दयालुमनसं शरणं समेषा-
मुद्धारकर्तृ परिपालकदीनबन्धुं
धर्मात्मसाधुसुजनर्षिमहर्षिवृन्द-
त्रातारमोड्यचरितं प्रणमामि भक्त्या[4]
भजेऽहं श्रीरामं धवलचरितं साधुहृदयम्
ऋषीणां सेवायां बुधवरजनानां च नितरां
दधानं स्वं चित्तं दुरितदलने चापि सततं
प्रजानां रक्षायां सुकृतधृतबुद्धिसविनयम्[5]
कल्याणानां निधानं गुणबलसदनं धाम चरित्र्यलक्ष्म्याः
विद्यानामेकतीर्थं दुरितदलनकृज्ज्ञानतेजोऽवदातं
धर्मारूढं पवित्रं मुनिजनजगतः पालकं पुण्यवन्तं
दीनोद्धारप्रसिद्धं गुरुजनवचनस्वान्तरामं नमामि[6]

---

१. तदेव १०।१
२. तदेव ११।१
३. तदेव १२।१
४. तदेव १३।१
५. तदेव १४।१, १०९

अस्मिन् स्तोत्रे इष्टदेवस्य गुणकीर्तनं, महत्त्वप्रतिपादनं स्वरूपोद्घाटनं च कविना साधु विहितम्, तत्र च स्वभक्तिरभिव्यञ्जना। यः कोऽपि रामभक्तोऽनेन स्तुतिरसायनेन मानसं स्वास्थ्यं लब्धुं पारयति।

महाकाव्येऽस्मिन् कवेः राष्ट्रियभावना सुतरामभिव्यक्ता। सुगमरामायणकारो राष्ट्रियभावान् यथेतः पूर्वं स्वकृतिषु अभिव्यञ्जयामास तथैवात्रापि अभिव्यनक्ति। महाकाव्यस्यास्योद्देश्यं स्वराष्ट्रे सद्गुणानां प्रसारणमस्ति। कविर्वाञ्छति यद्भ्रष्टशासनस्य समाप्तिर्व्रजेत् स्वच्छशासनं चात्र प्रचलेत्, अत्रत्या युवानः सत्कर्मपथारूढा भवेयुः, सर्वेऽप्यत्रत्यवासिनो राष्ट्रसेवासक्ता भवेयुर्यन पुनरपि तद् रामराज्यं प्रतिष्ठितं स्याद्यत्र दारिद्र्यदुर्व्यसन-मलिनता-दुराचार–कपट-कुचरित–भयग्रस्तता–अज्ञान-प्रभृतीनामस्तित्वं न स्यात्। कविः सर्गान्तेषु याः कामनाः करोति तत्र तस्य राष्ट्रियचिन्तनं सम्यक् प्रतिफलितम्। पुनश्च रामराज्यवर्णनेनापि कवेरादर्शभूतराष्ट्रस्य स्वरूपं व्यञ्जनया समुन्मील्यते। यथा—

भूयात्पुनर्भारतभूमिरेषा
भव्या स्वकीये वचनेऽनुरक्ता
सा पालयेत्तत्कठिनेऽपि काले
कृच्छ्रेऽपि जह्यान्न च सा स्वसन्धाम्[1]

भवेत् या भारतभूः पुनश्च
स्वबन्धुषु स्नेहमयी जगत्याम्
स्पृहं हवात्सल्य इव क्षमावान्
प्रख्यातसूर्यान्वयजातरामः[2]

---

१. तदेव १।१८
२. तदेव २।१६

पवित्रवृत्तो गुरुभक्तियुक्तः
शिक्षाजगद्गीतगुणप्रकर्षः
भवन्तु विद्याव्यसनीव राम-
श्छात्रा युवानः प्रियभारतस्य[1]

शासनधिष्ठिता नायका भारते
स्युर्जनानां हिते तत्पराः सादरं
जीवनं देशसेवार्थमेवानिशं
योजयन्तु स्वकीयं मुदा सर्वथा[2]

भारतस्य तरुणाः शुभार्थिनो
रामचन्द्र इव सादरं गुरो-
रर्चने विदधतु स्वजीवनं
व्यापृतं भृशसुखेन सन्ततम्[3]

उत्साहश्रितमनसः सदैव भूत्वा
सन्मान्यान् स्वगुरुजनान् प्रमोदयन्तः
प्रत्यूहान् नवतरुणाः प्रणाशयन्तो
भूत्वा राम इवाऽनिशं जयन्तु[4]

जायेरन् देशे युवानोऽस्मदीये
तेजः सम्पन्ना महाशक्तिमन्तो
जेतारोऽन्येषां च यूनां समेषां
तुल्याः श्रीरामेण लोके समस्ते[5]

---

१. तदेव ३।२१
२. तदेव ४।२६
३. तदेव ५।१६
४. तदेव ६।२८
५. तदेव ७।३३

प्रियभारतभूमिरियं महती
यततां सततं मनसा नितरां
चरिते ह्यभिवादनयोग्यगुणान्
अवतारयितुञ्च पुनर्मधुरान्[1]

अवतु सतां निकरं सततं
भरतधरा रघुवंशरवेः
हृदि विमला सुदृढा वचने
भवतु च सा शुभकर्मरता[2]

भूयासुर्देशे तरुणा भारतवर्षे
धर्मज्ञा वीराः शरणायातजनानां
रक्षायां लग्नाः कुपथारूढशठानां
हन्तारोऽजस्रं सुजना राघवभक्ताः[3]

भवन्तु भरतक्षितौ युवजनाः स्वधमस्थिताः
पुनश्च चरितामलां जगति कार्यकार्यप्रिया
नितान्तकुशलप्रकृष्टमतिकार्यसम्पादकाः
समीरतनयप्रसन्नचरितार्चकाः सन्ततम्[4]

ईश्वर भारतं सुखमयं दयित सुखनिधे
विश्वपते हरे गुणमयं ललितगुणनिधे
आर्तदयामते बलमय रुचिरबलनिधे
सन्ततमेव नाथ कुरुतां हितकर मम हे[5]

---

१. तदेव ८।८३
२. तदेव ६।१०६
३. तदेव १०।१३५
४. तदेव ११।१४७
५. तदेव १२।१६०

अस्माकं देशे नवतरुणाः कर्त्तव्यस्थाः
कुर्वन्तो रामं शुचिचरितं नैजं लक्ष्यं
साधूनां सेवां जगदखिले कुर्वाणास्ते
एतं देहं स्वं भृशसफलं कुर्युः सर्वे[1]

एभिरुदाहरणैः स्पष्टं भवति यत् कवेः राष्ट्रभक्तिर्विश्वबन्धुताया साधिकास्ति। अत एव कविः स्वतरुणान् रामवत् अखिलजगति साधूनां सेवां कर्तुं दिदृक्षति। किन्तु तस्य चेतसि स्वदेशे आदर्शराज्यस्थितिं द्रष्टुमपि बलवती इच्छास्ति; तदैव तु स रामराज्यस्य चर्चां करोति व्यञ्जनया च अभिव्यनक्ति यद् 'यदि नाम रामराज्यवत् सुव्यवस्था नास्ति तर्हि शासनं न अन्वर्थम्'—

न चासंस्तद्राज्ये क्वचिदपि रुजाचौरविपदो
दुराचारी नासीन्न च कपटरागी कुचरितो
धरा धान्यं नित्यं प्रचुरमददाद् वृक्षलतिकाः
फलाढ्याः सम्पन्नः सततमभवल्लोकसकलः
अभूदिष्टा वृष्टिस्तपसि यशसि प्रीतिमवहन्
जना ज्ञानोद्दीप्ता हरिचरणरक्ताः सुरुचयो
न भीतिश्चेतिभ्यः क्वचिदपि न नाधिर्मलिनता
न दारिद्र्यं वा दुर्व्यसनमभवत् तस्य विषये[2]

कवेर्जीवनदर्शनस्याप्यस्मिन् काव्ये प्रतिफलनं संजातम्। रामः स्व बन्धूनां प्रश्नानामुत्तरं ददत् जगतो जीवस्य परमात्मनश्च विषये यान् विचारान् प्रस्तौति ते वस्तुतः कवेरेतद्विषयकामास्थां प्रकटयन्ति। अयं प्रसंगोऽविकलरूपेणाधस्ताद् दीयते—

कदापि श्रीरामं सुमतिभरतस्तं सविनयम्
अपृच्छद् यद् बन्धो कथमयमगादत्र पुरुष-

---

१. तदेव १३।८२
२. तदेव १४।१०७–१०८

स्त्रुटिं चेमामात्मा ननु वपुरिदं वक्तु भगवं-
स्तदावादीद्रामो मुदितहृदयः स्वीयमनुजम्
जडा अर्था सर्वे विगतनिभोगा अधिगताः
न तेषां स्वार्थोऽल्पोऽपि च भवति भुक्ता इतरयै-
कया शक्त्या आत्मा पुरुष इति वा सिद्ध्यति ततः
प्रमादान्नो ध्यानं तदियमभवत् सङ्कटकरी
जगद् भोग्यं सर्वं भवति तदिदं भोक्तृ न च तत्
प्रयोक्ता वा भोक्तास्ति तदितर उक्तः स पुरुषो
विवेकाभावाद् हा स्ववपुरिदमात्मेत्यवगतम्
अयं देहो यानं भवति न च सूतः स्वयमपि
इयं मुक्तेरिच्छा सपदि कुरुते न स्फुटतया
सुविज्ञातानात्मा हृदयमतिदेहेन्द्रियपरो
गुणेभ्यो भिन्नोऽसौ प्रकृतिविकृती नो स्पृशति सः
इदं चोक्त्वा तूष्णीं रघुकुलमणिः क्षिप्रमभवत्
अथोद्दिश्यात्मानं वदतु भगवन् किं निगदितं
जगत्कल्याणार्थं परमहितवेदान्तनिगमे
इदं नम्रोऽपृच्छद् रघुपतिमथो लक्ष्मण इति
कृते ज्ञानोद्दामोत्तमविमलमेधाधरनृणाम्
न चेशाद् भिन्नोऽसौ य इति कथितो जीव इह च
न जीवाद् ब्रह्मेदं कथमपि च भिन्नं निगदितं
तदेकं ब्रह्मैव श्रुतिषु बहुधा गीतमधिकं
जगन् मिथ्या सत्यं त्रिगुणरहितं ब्रह्मविदितम्
असूयं तन्नित्यं विकृतिरहितं कालगगन-
दिशाभेदाच्छेद्यं हृदयवचनातीतमहिम
स्वमायाहेतोस्तद् विलसति च नामाकृतिमटन्
मतं सच्चित्तद वै निरवधिकमानन्दमतुलम्
अवोचच्छत्रुघ्नः प्रकृतिसरलं बन्धुसदयं
कथ ज्ञानं श्रेष्ठं न च तदिव किञ्चिद् गुरुतमं

पवित्रं तज्ज्योतिर्मतमखिलशास्त्रेष्वतिशयं
प्रिय रम्यं प्राप्यं स्फुटमिह मतं स्व विकिरतु
इदं नूनं ज्ञानं हरति धिषणाया मलिनतां
निरस्तं सर्वेषां झटिति कुरुते संशयतम:
इवादित्यो लोके मनुजहृदि चेदं जनयति
प्रकाशं श्रेयस्कृद् भवति मतमेतद् गुरुतमम्
विना ज्ञानं कर्म प्रभवति न दातुं किमपि च
हितात्लब्धो ज्ञानात् क्रतुजनितनाकोऽपि भवति
मनुष्यो निष्कामो भवति विमलज्ञानकृपया
प्रदत्ते यत् कर्म क्षयमयमथानित्यमपि तत्
इदं पुण्यं ज्ञानं हितकरपथं दर्शयति च
इदं सत्यं ज्ञानं जनयति सुखं नित्यमपि च
इदं शान्तिं दत्ते क्षयविगलितां शर्मबलदा-
मतो ज्ञानं ज्यायस्तदिव न हि किञ्चिच्चरुचितमम्[1]

कविनास्मिन् काव्ये सुभाषितविधानमपि साधु विहितम् । कानिचिदुदाहरणानि स्थालीपुलाकन्यायेन सहृदयानां मनोमोदाय प्रस्तूयन्ते—

(१) पत्नी वियोगोऽपि न तद्विधो मतो
बन्धोर्वियोगो हि यथा महान् मत: ।
(१२।१४०)

(२) सन्तो निरागःसु भवन्ति नाहिता: ।
(१२।१६०)

(३) ये युद्ध्यमाना निहता भवन्ति ते
स्वर्गं लभन्ते च यशोऽविनश्वरम् ।
(१२।१७२)

---

१. तदेव १४।३९-४९

(४) जातस्य मृत्युर्ह्यसुधारिणो ध्रुवो
जन्मापि नूनं मृततां गतस्य च।
(१२।१७३)

(५) सः शोचनीयो न कदापि भूतले
यस्यास्ति शौर्यं प्रथितं सदाभवत्।
(१४।१७४)

(६) जगन्मिथ्या सत्यं त्रिगुणरहितं ब्रह्मविदितम्।
(१४।४४)

(७) मनुष्यो निष्कामो भवति विमलज्ञानकृपया।
(१४।४८)

वस्तुतः सर्गान्तेषु स्थापितानि पद्यान्यपि सुभाषितान्येव सन्ति यत्र कविना काश्चित् कामना कृताः सन्ति। एतेषु मुक्तत्वमपि संसाधयितुं शक्यते प्रबन्धाशंतापि। एभिः पद्यैः कवेश्चिन्तनस्य परिचयो लभ्यते।

महाकाव्येषु कवयोविविध वर्णनान्यपि कुर्वन्ति। एतेनैतेषां सूक्ष्मनिरीक्षणशक्तेरनुमानं भवति, पुनश्च तेषां रुचेरपि ज्ञानं भवति। वर्णनानां वैशिष्ट्यं तावदेव स्वीक्रियते यावत्तानि कथागतिं न घ्नन्ति। कथायां भारभूतानि वर्णनानि नाभिनन्दनीयानि। सुगमरामयणकारेण विविधवर्णनानां कथाङ्गभूतता कथोपस्कारकता च सम्यग् रक्षिते। शरच्छोभा - जाह्नवी - युद्ध - स्वागतसमरोह-वर्षा - निदाघ - चन्द्र - सुराज्यव्यवस्था - प्रभृतीनां वर्णनेषु कथासूत्रं न खण्ड्यते। शरच्छोभावर्णनप्रसङ्गे वयं पश्यामो यच्छरदा साकं रामस्य सम्बन्धो वर्तते। वनं रामं नन्दयाति—

मृग - सुशोभित - शाद्वलपेशलं
शिखि - समूह - कृतध्वनिगुञ्जितं
विविध - पुष्कल - पक्षि - गणाकुलं
वृषभबन्धुर - धेनु - मनोरमम् (२२।४)

प्रकृतिसौम्यकृषीवलमण्डितं
श्रमरत - प्रमदावलिभूषितं
रुचिरनूतन - सस्यधरार्चितं
लघुलघूटज - पंक्तिसुसेवितम्
पृथुकराजि - निनादसमावृतं
गुरुवटुस्थिति - वर्धितगौरवं
नवलताधरणीरुह - पूजितं
वनमदो बहु राममनन्दयत्[1]

अत्र कवेः सूक्ष्मनिरीक्षणशक्तिरपि प्रतिफलिता। कृषीवल-श्रमरतप्रमदा - लघुलघूटज – पृथुकनाद–गुरुवटुस्थिति-प्रभृतीनां नियोजनेन वर्णनेऽस्मिन् यथार्थता नवीनता च समायाते। पुनश्च कथायां भारभूतं नास्तीदं वर्णनम्।

रामवनगमनप्रसङ्गे कविर्गङ्गां वर्णयति। किन्त्वत्रापि सः वर्णनस्यातिदीर्घतामुपेक्षते। केवलं सार्धत्रिभिरेव पद्यैः गंगामुपवर्ण्य रामस्य गंगार्चनं वर्णयति कथां चाग्रे नयति। अस्मिन् जाह्नवीवर्णने भाषाया भावानुरूपत्वं कवेः सूक्ष्मनिरीक्षणं चावलोकनीये स्तः। पश्यन्तु सहृदयाः—

मर्यादाभृन्नयपथगतो जाह्नवीमाजगाम
ताम्भार्चीत् सः प्रणतनिटिलः स्नातगात्रो हि भूत्वा
पापौघानां पटुतमबलां ध्वंसने सेव्यसेव्यां
विद्याबुद्धिप्रदशुभजलां पावनीं पावनानाम्
विद्वद्वंद्यव्रजमुनिमहात्मर्षिसिद्धप्रबुद्ध-
योगिस्तोमोत्तममतितपस्तीव्रतेजः प्रशस्त-
च्छात्रव्राताद्रिकजननुतस्तुत्यनीरप्रवाहां
पूजापाठस्थितजनतटामाश्रमाराध्यतीराम्
प्रालेयाद्रयुद्भवभवशिरःशोभितस्वच्छकच्छ-
श्वेतोदात्तोर्मिविहितरवापूर्णदिग्गह्वरालि-
ध्वस्तानेकापरिमितमहाग्रावखण्डप्रचण्ड-
नृत्यासक्तप्रथितसलिलब्रह्मपात्रप्रतिष्ठाम्

---

१. तदेव ५।४-६

नव्यानव्यैर्विविधबहुलैर्मन्दिरैश्चन्द्रमौले-
इचारुक्षोणीं प्रियपरिमलैः गन्धपुष्पप्रभूतां
घण्टारावाकुलसमदिशां वेदपाठिप्रवीणां
गङ्गे गङ्गे शिव शिव जयेत्यादिनादप्रवृत्ताम्[1]

चन्द्रवर्णनप्रसङ्गे कविना प्रकृतेरुपदेशदातृ रूपं समुन्मीलितम्। एकस्यां रात्रौ रामश्चन्द्रं वीक्ष्य तस्य सर्वेषां जनानां कृते उपकारित्वमनुभवन् कथयति—

अयं पुण्यात्मा ना न च परमयं तादृशजनो
विचिन्त्यैतन्नोऽयं दिशि दिशि शशी चित्तसुखदां
मनोज्ञां स्वां ज्योत्स्नां विमलसलिले कच्चरजले
विषे पीयूषेऽपि प्रथितकरुणो वर्षति भृशम्
अयं चन्द्रोदारः किरणनिचयैः पावनशुभैः
सुधावृष्टिं कृत्वा जगति सकलं भेषजगणं
प्रदत्ते प्राणौजः प्रतिभवति कल्याणजनकः
कृतेऽयं जीवानामुपकृतिपरो धन्यशशभृत्
परिप्रीणात्येषः प्रियकुमुदिनीस्ताः सुहसितः
करोति स्वांश्वग्रै रमृतधरचन्द्रः प्रियतमः
समुद्रं कल्लोलैस्तरलबहुलैः प्रीतमनसं
चकोरान् सानन्दान् जननयनचित्ते च मुदिते
द्विजत्वाच्चन्द्रोऽयं भुवि च कुरुते धर्ममनिशं
स्वकीयैरेकैकैः किरणनिचयैः शीतविमलैः
सुराणां तृप्त्यर्थं सदयहृदयो यच्छति सुधाम्
अमायां तेभ्यः स्वं ह्युपकृतिपरो विग्रहमपि[2]

अत्रापि वर्णनं कथान्तर्गङ्गभूतं नास्ति। एवमेव निदाघवर्णनं कथाङ्गभूतं संवृत्तम्। एकदा सीता स्वदेवरवधूः निदाघकालमुपवर्णयितुमादिशति, तिस्रश्च ताः स्व-स्वमत्यनुरूपं ग्रीष्मं वर्णयन्ति। अस्मिन् वर्णने स्वाभाविकता दर्शनीया—

निदाघर्तुः प्रातर्भ्रमणरुचिशीलान् सुखयति
लतानां वृक्षाणां कुसुमसुरभिं चाददसौ

१. तदेव १४।३४-३७ २. तदेव ८।४२

नितान्तं प्रीणाति प्रियशुभगुणो मानवजगद्
वधूः सौमित्रेः प्रागचकथदिदं तत्र सुभगा
मनुष्याः सानन्दं सरसि सरिति स्नान्ति च चिरं
विहारं सुन्दर्यः प्रमुदिततरा नीरसुखदे
वयस्याभिः सार्धं विदधति च शुक्रे समुचितं
भृशं क्रीडन्त्यस्ताश्चरमसुखमायान्ति सुभगाः
युवानः सुन्दर्यो मुदितमनसा पुष्पविविधैः
बहु प्रीत्या हृद्यं चिकुरनिकरं नैकविधिना
निजग्रीवां वक्षः स्वकरयुगलं प्रेमबहुना
ह्यलङ्कुर्वन्तीह प्रियतरनिदाघे प्रतिदिनम्
उदीर्यैतत् प्रीत्या भरतदयिता मौनमगमत्
ततः शत्रुघ्नस्य प्रियसहचरी प्रीतमनसा
जगादैतत् तत्राधिकमधुरवाक्यं सविनयम्
अयं ग्रीष्मः कालोऽनुपमसुषमां पोषयति च
जनाञ्च्छीतं पेयं मधुरमधुरं प्रीणयति च
सितायुक्तं क्षीरं हिमसुरभिशुभ्रं मधुरसं
रसालं नादेयीं प्रचुरगुणजम्बीरसरसं
गृहीत्वा ते ग्रीष्मे किमपि बहु विन्दन्ति च सुखम्
निशाज्योत्स्नाकान्ता सितहरितकौशेयवसनं
तरुच्छाया सान्द्रा हिमलयतमः सेविसदनं
नदीकूले सायं कुसुमललितोद्यानविमले
भृशं चित्तं प्रीणात्यवनिमनुजानां विचरणम्[1]

अस्य वर्णनस्य कथायां यद्योगदानं विद्यते तदस्माभिः कथानकविवेचनायां दर्शितमेव ।

प्रकृतेर्भयङ्कररूपस्य दर्शनं रामकृत-वर्षावर्णनस्य पूर्वभागे रमणीयरूपस्य दर्शनं च तत्रैवोत्तरभागे कर्तुं शक्यते । कविना जलप्लावनस्य यानि दृश्याणि दृष्टानि श्रुतानि वा तेषां प्रतिफलनमत्र सम्प्राप्यते । यद्यप्येतस्य वर्णनस्य कवि-

---

१. तदेव १४।५२-५७

निबद्धवस्तुप्रौढोक्तत्वापेक्षया कविप्रोक्तत्वमेवाधिक्येन सिद्ध्यति तथापि वर्णनस्य वैशिष्ट्यमस्त्येव ।

कविना यथावसरं संवादसौष्ठवमपि प्रदर्शितम् । अस्मिन् प्रसङ्गे ऽस्माकं स्मृतिपथे हिन्दीकविराचार्यकेशवदासः समायाति । यथा केशवकृत रामचन्द्रिकायामंगदरावणसंवादे पाठकस्य मनो रमते तथैव सुगमरामायणेऽपि । संवादेऽस्मिन् 'नहले पर दहला' इति भाषोक्त्यायेन अङ्गदो रावणं प्रति भाषते । तद्यथा—

पृष्टः स नक्तञ्चरनाथमब्रवीद्
दूतोऽस्मि रामस्य महायशस्विनः
श्रीकोशलेशस्य सतां महीयसो
धर्माभिरक्षैकमतेर्गरीयसः
पित्रा समं मे भवति स्म मित्रता
तस्माद्धितार्थं भवतः समागतो
वंशे पुलस्त्यस्य भवानजायत
ह्याराधकः शङ्करणार्वतीपतेः
प्राप्तो वरो भूपतयो जिताः क्षितौ
सर्वेऽपि लङ्केश च लोकपालकाः
ख्याता जगत्यां भवतोऽत्र शूरता
तेजोनिधे रावण राक्षसेश्वर
दर्पाच्च मोहाज्जनकात्मजा हृता
रामस्य पत्नी भवतास्ति जानकी
भाषे शुभं स्वीकुरुतां निवेदनम
आगांसि मृष्येद् भवतश्च राघवः
सीतां पुरस्कृत्य सबन्धुबान्धवो
वक्त्रे तृणं त्वं निदधच्चलाभयं
त्रायस्व मां त्वामिति सः करिष्यति
सम्भाषमाणं प्रणतार्तिनाशकः
रे पोत भाषस्व भवन् समाहितो
जनासि नो मां जगतीजयिप्रभुं

पित्रा समं ते मम सौहृदं कथं
ब्रूहि स्फुटं प्रत्ययकारकं वचः
बाहूटजे त्वां विदधौ पिता मम
त्वां वन्दिनं किं स्मरसि स्वकीये
श्रुत्वेति सङ्कोचमियाय रावणो
जातोऽस्ति बालोति जगाद चाङ्गदम्
तस्यासि पुत्रस्त्रपसे न पामर
जातो मृतस्त्व न कथं कुलाधम
यत् स्वेन वक्त्रेण हि दूततां वदेः
स्वस्याधुना तापसकाननौकसः
त्वं साम्प्रतं ब्रूहि तदीयमङ्गलं
श्रुत्वेति स व्याहरति स्म सस्मितं
यातैर्दिनैस्त्वं दशभिर्दिवं गतः
पृच्छ स्वमित्रं कुशलं मिलन् मुदा
आकर्ण्य वाणीं परुषां स रावणो
जानामि नीतिं ह्यत एव पामर
वाणीं सहे तेऽनुचितां च गर्हितां
तूष्णीं भव त्वं न च वेत्सि रावणम्
जानामि धर्मप्रियतां नयज्ञतां
त्वां वेत्ति लोकः शुभमार्गगामिनं
ज्ञात्वैव धर्मं हृतवांश्च जानकीं
धन्यं हि धर्माचरणं तवेदृशम्
जागर्ति लोके तव धर्मभीरुता
धन्योऽस्मि लब्ध्वा तव पुण्यदर्शनम्
आकर्ण्य रोषं व्रजति स्म रावणो
व्यङ्ग्यार्थपूर्णातिकठोरतद्वचः[1]

एवं संवादसौष्ठवमन्यत्रापि द्रष्टुं शक्यते ।

इदानीं सुगमरामायणस्य रचनाशिल्पमाश्रित्य किञ्चि-

---

१. तदेव १२।९५-१०६

ल्लिख्यते। कविना छन्दोयोजनायां चतुर्णां पादानां मध्ये क्वापि पूर्णविरामोऽर्धविरामो वा न स्वीकृतः। इत्थं तस्य पद्यरचना केषाञ्चित् परम्परावादिनां कृते उद्वेगमपि जनयितुं प्रभवति किन्त्वियमेव रीतिः कदाचिद् केषाञ्चन नावीन्यान्वेषिणां दृष्टिमप्याकर्षयितुं शक्नोति। कविना उपेन्द्रवज्रा – स्रग्विणी - उपजाति – रथोद्धता - तोटक - पृथ्वी-द्रुतविलम्बित - शार्दूलविक्रीडित - स्रग्धरा–प्रभृति - छन्दसां प्रयोगः कृतः।

कवेर्भाषा प्रायः सरला प्रसादगुणोपेता चास्ति। सरलतया सुगमतया च रामकथायाः प्रत्ययनार्थं कविवरेण सरला सुगमा च भाषैव प्रायोऽङ्गीकृता यद्यपि क्वचित्क्वचिद्दूरान्वयसत्त्वादर्थस्य प्रतीतौ आयास इवापेक्ष्यते। अवसरानुसारमियं भाषा माधुर्यमोजश्चापि गृह्णाति किन्तु तत्रापि प्रसादो द्रष्टुं शक्यते। समस्ता स्यादसमस्ता वा स्यात्, प्रायः काव्यभाषा प्रासादिकतां न जहाति। उदाहरणार्थम्—

गेहा भवन्तु सकला सितवर्णरम्याः
आभूषिताः प्रचुरसुन्दरकान्तिकान्ता
उच्चध्वजारुचिरमञ्जुलसर्वभागाः
रम्भाप्रवालललितैश्च मनोज्ञरूपाः
बालाः किरन्तु सुमनोऽञ्चितपुण्यलाजान्
नक्तं भवेद् बहुलदीपकपंक्तिशुभ्रं
सर्वाणि राजभवनानि च मन्दिराणि
कार्यालयाश्च सकलाः परिभूषिताः स्युः[1]

अत्र समस्तायामसमस्तायां च भाषायां झटित्यर्थसमर्पकता सुतरामनुभूयते सहृदयैः। यथा वा—

न चास्त्यधर्मेण कदापि मङ्गलम्
अपायुक्तो जडनाशकश्च सः

१. तदेव १३।१०-११

भवद्विधा बुद्धिजुषो विपश्चितो
जना रमन्ते न कदापि तत्र हि[1]

अत्रापि भाषा प्रसादमयी, वाक्यरचना च सरला। एवमेव प्रायः सारल्योपेता वाक्यावली कविना स्वीकृता। शरच्छोभावर्णनप्रसंगे दीर्घसमासयुक्तापि भाषा माधुर्यं प्रसादं च न जहाति—

मधुर — सौरभवारिजवन्दिता
भ्रमर - गुञ्जित —चित्तहररतुता
सलिल - निर्मल - शुभ्रतरङ्गिणी
प्रियतमं रघुनाथमतोषयत्[2]

अत्र कविना नकारदकारयोः, ञकारजकारयोः, ङकारगकारयोः संयोगेन, लकारस्य च चतुर्वारं प्रयोगेण भाषायां माधुर्यमुत्पादितम्। आनुपूर्वीतः विशेषणपूर्वं कर्तृपदं कर्मपदं क्रियापदञ्च संयोजयता कविना स्व सरलवाक्ययोजनायाः परिचयो दत्तः। यथेदं वाक्यं गद्ये तथैव पद्येऽपि तिष्ठति, अर्थावगमे नात्र कापि बाधा। छन्दोगत्यनुरूपं शब्दानां प्रयोगो न क्वापि उच्चारणसम्बन्धिनमायासं जनयति।

अलंकारयोजनायाश्चर्चा क्रियेत चेत्तर्हि वयं पश्यामो यत्कविना शास्त्रस्थितिसम्पादनेच्छयैव सायासमलङ्कारा न संयोजिताः। सुगमतया रामायणकथने स्वाभाविकरूपेण ये शब्दार्थालंकाराः समायातास्त एव कवेरभिमताः। अत्र तेषां नामग्राहेण उदाहरणदानेन वा स्थानानुरोधो न रक्ष्येत इति कृत्वा तत्परिहरामः। सत्यवसरे विस्तरशस्तद्विषयेऽन्यत्र चर्चा कृता स्यात्।

संक्षेपत इदं भणितुं शक्यते यत्सुगमरामायणे कविना सुगममार्गेण संक्षिप्तरीत्या च रामकथा कथिता। प्रसि-

१. तदेव ११।१३०
२. तदेव ५।७

द्वायामपि रामकथायां तेन राष्ट्रियतादितत्त्वाधानेन काचित्प्रत्यग्रता समुत्पादिता। नून हीदं महाकाव्यं राष्ट्रनिर्माणरूपमहदुद्देश्यप्रेरितं, महत्पात्रसहितं मानसोल्लासक्षमं महत्कथानकयुतं चास्ति। कवेः शैली प्रायः प्रसाद–गुणोपेतास्ति या चाद्यत्वे विद्यमानानां ग्रन्थग्रन्थिसमुद्घाटनेऽसमर्थानां सुकुमारमतिपाठकानामपि महाकाव्यस्य चेतसि पदं कर्तुं क्षमा। अर्वाचीनसंस्कृतमहाकाव्येष्वस्य भावपक्षकलापक्षदृशा नूनं महत्त्वं विद्यते।

*

'सुगमरामायण'-विमर्शः

(डा०रमेशकुमार लौ, एम० ए०, पीएच० डी०, संस्कृत-विभागाध्यक्षः, एस०डी० कालेजः, मुजफ्फरनगरम्)

आदिकाव्यं रामायणं सुदीर्घकालाद् भारतीयभाषासु काव्यरचनानामुपजीव्यमस्तीति सुविदितमेव सुधियाम्। न केवलं संस्कृते एव एतदधिकृत्य काव्यानामविच्छिन्ना परम्परा वरीवर्ति, अन्यभाषास्वपि इदानीं यावत् काव्यानि विरच्यन्त एव। अतः सुगमरामायणमवलोक्य मम चेतसि कश्चिदौत्सुक्योन्मेषः समजायत कथमत्र कथानिर्वाहः कृतः, का चात्र नवीनता, का च नाम सुगमता वा इति।

डा० रमेशचन्द्रशुक्लमहाभागेन स्वकीयविविधरचनाभिः सुरभारत्या या महती सेवा क्रियते सा न परोक्षं संस्कृताध्येतॄणाम्। अत्रभवतां 'गान्धि-गौरव'-'भरतचरितामृत'-'गीत-महावीर'-'श्रीकृष्णचरित' प्रभृतिग्रन्था उत्तरप्रदेशशासनेन पुरस्कृताः। साहित्यसर्जनतपस्सम्पूतमिवाभात्येतेषां वार्द्धकम्। अस्मिन्वयस्यपि तेषां काव्यलाघवमनेनैव सिद्ध्यति प्रकृतमहाकाव्यं मासत्रय एव पूर्तिमगादिति।

सुगमरामायणम् (महाकाव्यम्)
प्रणेता—डा० रमेशचन्द्र शुक्लः
प्रकाशिका—देववाणी-परिषद्, दिल्ली
आर-६ वाणी विहारः, नयी दिल्ली-११००५९
संस्करणम्—प्रथमम्, अगस्त १९७८ ई०
पृष्ठसंख्या—२१६, मूल्यम्—रु० ३५.००

नैतच्चित्रं तादृशः काव्याभ्यासो मुनिमनुजवृन्दवृन्दारकवन्दनीयपादारविन्दस्य रामस्य लोकपावनचरितोपन्यासश्चात्र सङ्गतौ इति। प्रयोजनञ्चात्र निवेदनायां कविना स्वयमेवावेदितम् "इइमेव त्रिवार्गनेन मङ्गलतिना सुगमरामायणप्रणयनव्याजेन धर्मरक्षकस्य जनहितैकव्रतस्य भगवतोऽधिपार्थिपस्य श्रीरामस्य चरणारविन्दयोः सेवने भक्तिपूर्वकं समुदं मनो नियोजितम्।" इति। अतः प्रतिसर्गमादिमे पद्ये रामप्रणतिमातनोति कविः।

एतत्काव्यव्याजेन कविर्वस्तुतः रामस्तुतिना भक्तशिरोमणिं वायुपुत्रं हनूमन्तमेव प्रसादयितुं समीहते इति "गीतो भक्त्या महत्यानिलसुतकरयोरर्पयामि प्रकाम" मिति समर्पणपद्यत्रय्या विभाव्यते। प्रबला राष्ट्रभक्तिभावनाप्यतितरामधिशेते कविमनःस्थलीम् इति प्रतिसर्गमन्तिमं पद्यं विशदीकरोति। एतेषु पद्येषु भारतभुवः समुन्नतिः कल्याणं वैभवञ्चाकाङ्क्षापदवीमधिरोहन्ति। एतत्पद्यसरणिस्तु स्वतन्त्रमेव राष्ट्रभक्तिगीतिख्यातिमवाप्तुमलं स्यादिति निश्चप्रचमेव।

चतुर्दशसु सर्गेषु विभक्तमेतत् महाकाव्यं रामस्य वनवासकालमेव सम्भावयतीति दिक्। सर्गेषु न्यूनाधिकं १६-१६० श्लोका विलसन्ति। श्लोकानां पूर्णा संख्या तु १०१६ इति। विभिन्नच्छन्दसां प्रयोगे कुशलः खलु कविः। महाकाव्यरीत्या विभिन्नसर्गेषु पृथक् छन्दसां शार्दूलविक्रीडितवंशस्थ-उपजाति-द्रुत-विलम्बित-हरिण्यादीनां प्रयोगः कृतः, सर्गान्तपद्ये तु भिन्नं छन्दः। छन्दसां प्रयोगे द्वितीयपादान्ते विरामपरित्यागेन अत एव तृतीयपादादिपदसन्धिविधानेन किं नाम वैचित्र्यमातन्यते इति नैवावधार्यते मया।

"मनोजरूपस्तरुणोऽस्ति कोऽग्र-
मिचञ्च का रूपवती मृगाक्षी" (६।८३)
वास्ति प्रभावो भवदीयदिव्य-

स्तेजो ऽतिदीप्ताद् भवतो हि भीतिं" (१०।५१)
एवं विधानावश्यकाग्रहदूषिते प्रयोगे, मन्ये मुद्रणदोषात्, सन्धिदोषोऽपि प्राप्यते—

"ज्येष्ठं स्वकीयं धृतभक्तिभावो
तौ द्वौ ... ..." (१०।६८)

चतुर्दश सर्गेषु रामायणकथानिर्वाहः एवं विधीयते। तद्यथा **प्रथमसर्ग**-प्रस्तावनारूपेण कथाया सङ्केतः। **द्वितीयसर्गे**—रामगुणानुवर्णनम्। **तृतीयेसर्गे** रामविद्याध्ययनम्। अत्र वसिष्ठाश्रमे शिक्षालय इव विद्याध्ययनं वर्णितम्। श्लोकद्वयान्तरे एव समिधामाहरणोल्लेखोऽसकृत्(५,८)कृतः। **चतुर्थसर्गे**-विश्वमित्राय रामोपलब्धिः (अत्र **चतुर्थीप्रयोगश्चिन्त्यः**) **पञ्चमे सर्गे**—शरच्छोभावर्णनम्। कौशिकाश्रममार्गवर्णनेऽनुप्रासालङ्कारयुतं प्रकृतिशोभावर्णनम्। **षष्ठे सर्गे**—विश्वामित्रयज्ञरक्षा ताटकासुबाहुवधः, काननशोभाविनाशहेतुरूपेण ताटकायाः तत्पुत्रयोश्च साहसवर्णनम्। **सप्तमे सर्गे**—रामादिशुभोद्वाहः। सीतास्वयंवरवर्णनम्। परशुराम प्रसङ्गस्तु एकस्मिन्नेव पद्ये निर्व्यूढः। **अष्टमे सर्गे**—रामवनगमनम्, वधूभिः सह कुमाराणामभिनन्दनम्। कैकेय्या वरप्रदानव्यतिकरदारुणविपाकस्य कविना स्पर्शमात्रमेव कृतम्। एकस्मिन्नेव पद्ये दशरथस्य प्रतिज्ञापालनं विपिनगमनानुज्ञा प्राणत्यागश्च वर्णितः। एतदपेक्षया भरतस्य यात्राप्रसङ्गे जाह्नवीवर्णने पञ्च श्लोकाः प्रयुक्ताः। गौडीरीत्या जाह्नवीवर्णनमत्रोदाह्रियते—

"प्रालेयाद्र्युद्भवभवशिरःशोभितस्वच्छकच्छ-
श्वेतोदात्तोर्मिविहितरवापूर्णदिग्गह्वरालि-
ध्वस्तानेकापरिमितमहाग्रावखण्डप्रचण्ड-
नृत्यासक्तप्रथितसलिलब्रह्मपात्रप्रतिष्ठाम् ।।(८८)

अस्मिन्नेव सर्गेऽग्रे भरतस्य मातृणां च विलापः कवि

प्रतिभाया उत्तमं निदर्शनम्, भरतमुद्दिश्य रामेण कृतं राजधर्मवर्णनम् आदर्शराज्यस्य चित्रणमस्ति।

नवमे सर्गे—रामवनवासः। विराधवधः, शरभङ्गसेवा, सुतीक्ष्णादर्शनम्, वनशोभावर्णनम्, मुनीनां विविधा उपदेशाः, हेमन्तवर्णनम्, शूर्पणखाया प्रताडना न तु नासाच्छेदः, खरदूषणवधः, सीताहरणम्।

दशमे सर्गे—सुग्रीवसौहृदम्, पम्पावर्णनम्। (अत्र १०, ११ श्लोकयोः कवेरभिप्रायः स्फुटो न प्रतिभाति।) वसन्तर्तुवर्णनम्। हनूमत्संवादे ६३ पद्ये 'उत्साहसम्पन्नम्' इत्यत्र द्वितीया 'शुभमार्गगामी…प्राप्नोति…फलम्' इत्यत्र प्रथमया न संगच्छते। एवंविधशिथिलप्रयोगोदाहरणानि भूयांसि दृश्यन्ते। बालिवधः।

एकादशे सर्गे—लङ्कादहनम्। वर्षावर्णनम्, समुद्रवर्णनम्। (अत्र समुद्रस्य आधुनिका लाभा अपि निर्दिश्यन्ते यथा 'अनेकयन्त्राद्युपयोगिसाधनं तैलं प्रदाय' 'रसं प्रकृष्टं लवणं' प्रसूते इति (२८, २९)। लङ्कावर्णनम्। अशोकवाटिकावर्णनम्। सीतारावणसंवादः। लङ्कादहनम्। रावणसभायां हनुमद्व्यवहारः सम्यक् सजीवतामुपनीतः।

द्वादशे सर्गे—रावणवधः। अत्र सुग्रीवेण रामस्याग्रे लंकायां हनुमतः पराक्रमवर्णनं पौनरुक्त्येन केवलं काव्यस्याकारमेव पुष्णाति। सैन्यप्रयाणम्। रामेश्वरपूजनम्। विभीषणशरणम्, अङ्गददौत्यम्। अत्र रावणाङ्गदयोः सम्भाषणं कवेः संवादकौशलं व्यनक्ति। लक्ष्मणस्य मूर्छया कृतः रामस्य करुणविलापः भावचित्रणस्य दुर्लभमुत्तमञ्च निदर्शनमस्मिन् काव्ये। रावणवधानन्तरमयोध्यां प्रति प्रस्थानम्।

त्रयोदशे सर्गे—रामाभिषेकः। रामस्य अभिनन्दनम्। रामस्तुतिः। राज्याभिषेकवर्णनम्।

चतुर्दशे सर्गे—सीतानिर्वासनम्। रामराज्यवर्णनम् अस्मिन् व्यतिकरे उर्मिलादिवधूनां व्यवहारोऽपि वर्णितः।

भरतमुद्दिश्य रामोपदेशेऽध्यात्मज्ञानमत्र उपन्यस्तम्। सीतापरित्यागमधिकृत्य रामस्य अन्तर्द्वन्द्वविभावनं सम्यक् सम्पन्नम्। अन्ते संक्षेपतया सीताया भूमिप्रवेशं रामस्य च बन्धुभिः सह स्वर्लोकगमनं, रामराज्यस्य गुणानुवादं च वर्णयित्वा महाकाव्यमिदं समाप्तिमधिगमयति कविः। एवमिह कथावस्तुनो विहङ्गमावलोकः।

अनेनाभिज्ञायते कवेः इतिवृत्तशंसनमात्रमेव मुख्यमुद्दिष्टम्। वाच्यार्थ एव सर्वत्र प्रधानः जातः। अर्थालङ्काराणां प्रयोगः विरलः। उपमायाः प्रयोगो यथा,

'सकलवसुधाधीशाः क्षोणीपराजकुमारकाः
दशरथसुतज्येष्ठं रामं विलोक्य रवेः पुरः
मलिनरुचिमन्तो जायन्ते यथाखिलतारकाः
झटिति मलिना जाताः सौमित्रिबन्धुयुतं तथा' (७.१९)

दशमे सर्गे पम्पासरोवर्णने तोयस्य ब्रह्मणा (१२), मीनानां च सौम्यसतां वासेन (१३) सादृश्यं रुचिकरमाभाति। रूपकस्योदाहरणं रामस्तुतौ (१३.२९) यथा

"दौर्जन्यशाठ्यकपटच्छलकाष्ठवह्निः"।

काश्चन सूक्तयोऽपि यत्र तत्र दृष्टिपथमायान्ति, तद्यथा-

"तपो न सत्यात् परमस्ति किञ्चित्
तदेव सत्यं परमेश्वरोऽस्ति" (९.६१.)

"सख्यं सतां ज्ञानिजना जगत्यां
भूयः प्रशंसन्ति हि धीरवर्याः"। (१०.५९)

"श्रेयो हि धत्ते सुजनस्य सख्यम्" (१०.६५)

सत्स्वप्येतेषु गुणेषु काव्यमिदं सुगमं वा सरसं वाऽभिधातुं नैव शक्यते। एतदपेक्षया तु वाल्मीकिरामायणभाषा एव बालानामपि सुखेन बोधगम्याभाति। लिट्-लुङ्-यङन्तक्रियाप्रयोगेषु कवेः भूयानादरः। ('ऊचे' इत्येकपदस्य तु प्रयोगो दरीदृश्यते।) वाक्यरचनायां हि भाषाया एव बलवान् प्रभावो व्यज्यते, तद् यथा–

"राक्षसी गतवती परलोकम्" (६.१५)
"सति प्रोक्ते चेवं" (१४.१०४)
"चेद् हन्यते धमपथो जगत्यां" (४.१६)
"विनाशयिष्यामि तवानुजेन समं शठ त्वां"
(६.६१)

पदक्रमविषये कवे: सुतरामवहेलनया अन्वयाववोध: प्रायेण दुष्करो भवति। तद्यथा—

"कौशिकस्तत उपेत्य महर्षि:
स्वाश्रमं कथितवांश्च जिघृक्षु,
लक्ष्मणं रघुपतिं प्रियदीक्षा-
मस्मि साम्प्रतमहं यजनाय" (६.१७)

अथवा

प्रमुदितमना विश्वामित्रस्तथास्त्विति चाबदत्
नृपजनकचेत: संलेभे मुदं महतीं गत:
स्वगुरुवचसा च श्रीराम: पुरीमनुजान्वित:
इव जगति ना कोऽन्यो द्रष्टुं स्थिता भवति स्म या"
(७.१२)

"इति प्रभाषेत च 'राम' शब्दम्" (६.१०२)

अथवा ६.२७ श्लोक:।

पादपूर्त्यर्थमेव अनावश्यकविशेषणविन्यास: समासबन्धो वाऽपि क्लिश्नात्येव प्राय:। तद्यथा–

"दृष्टा: सर्वा मनुजमहिला म्लानवक्त्राश्च तेन' (८.३१)
"वसिष्ठपूज्यस्य गुरोरनुज्ञां" (६.४)
"ब्रवीतु धन्विन्! जलजाक्ष! वीर! (६.८३)
"रामद्वितीयाहरणाघकारी" (१०.५)
"नो कोपमाप्नोत् प्रचुरं हतोऽधम:" (१२.१५६)

अभिधानपदं विभज्य पृथक् प्रयोगस्य उदाहरणद्वयं प्राप्यते, तद्यथा–

"सूनू रथान्तस्य दशस्य राज्ञ:" (१०.६१)

"शैलादिदृश्यमथ पूज्यभराद्यशब्द—
द्वाजाख्यदर्शनकृतेऽवततार रामो" (१३.४)

आलङ्कारिका एवंविधप्रयोगेऽवाच्यवचनदोषम् आहुः। तुलनीयमत्र "देवपूर्वं गिरिं ते" (मेघ० १.४५), "मुनिरिति मुहुः केवलं राजपूर्वः" (अभिज्ञान० २.१४), "हिरण्यपूर्वं कशिपुं प्रचक्षते" (शिशु० १.४२) भाषादृष्ट्या केचन प्रयोगाः चिन्त्याः। तद्यथा—

अप्रथमान्तेन सामानाधिकरण्ये एव व्याकरणे शतुर्नियोगः क्वचित् तु प्रथमासामानाधिकरण्येऽपि भवति। अत्र त्वयं प्रयोगोऽतिशयेन दृश्यते—

"नतो भवन्...सः" (३.४), विलोकयन् सः" (३.६), "स...वसन्" (३.६) "क्षिप्रमेव कथयन्" (६.१२), "पश्यन् ययौ" (७.६)।"स्मरंश्च" (१०४) इत्यादि।

"माञ्चाधिकं कौशिक" (४.२१) इत्यत्र 'आत्मानम्' इत्यस्य स्थाने 'माम्' इति प्रयोगः न स्फुटः। पुरुषव्यत्ययोऽपि दृश्यते। (६.१००–१०३)

पद्येषु मध्यमपुरुषे सम्बोध्यमानस्य मारीचस्य कृते "प्रयातु, हरेत्, कुरुतात्, प्रभाषेत", इत्यादयः प्रथमपुरुषप्रयोगाः कथं सम्भाव्यन्ते। तथा हि १०.६८ श्लोके उत्तमपुरुषे वर्ण्यमानः सुग्रीवव्यापारः "तौ द्वौ" इति प्रथमपुरुषेण कथं समायोजितः।

कदाचित् समासे पूर्वापरभावश्चिन्त्यः, यथा

"मारीचमहाप्रवीणं" (६.१०१)

"लक्ष्मणशोकमग्नं" (६.१०६)

"सौमित्रिरामौ" (१०.७)

"बालिदुरात्मना" (१०.४३)

द्रुतगतया रचितेषु काव्येषु एतादृशा प्रयोगाः सम्भाव्यन्त एव। न तु तत्र कवेः कश्चित् प्रमाद आशङ्कनीयः।

महार्घोऽभिरामावरणयुतोऽप्ययं ग्रन्थः मुद्रणाशुद्धि-बाहुल्यकल्माषयितो दुनोति सचेतसां चेतांसि। दीर्घा 'शुद्धिका' अपि पर्याप्ता न प्रतिभाति। अतो भाविनि संस्करणे बलवत्याशा निबध्यते। आशासे महाकाव्यमेतत् संस्कृतानुरागिणां रामकथामकरन्दषट्पदानां सम्मतं भविष्यति इति।

***

अर्वाचीनसंस्कृतरचनानामध्ययना-ध्यापनयोः प्रासङ्गिकता

(डा० श्रीमती शशि तिवारी, संस्कृत-विभागाध्यक्षा,
मैत्रेयी कालेजः (दिल्ली वि० वि०)नई दिल्ली)

न विस्मरणीयमिदं तथ्यं यत् स्वसंस्कृतेर्दर्शनस्य, धर्मस्य, इतिहासस्य च स्वरूपज्ञानाय संस्कृतस्याध्ययनमध्यापनञ्च सर्वथापेक्षणीयमस्ति। संस्कृतस्य वेदपुराणदर्शनशास्त्रादिसमन्वितं पुरातनं साहित्यमेव नास्ति केवलं 'संस्कृतसाहित्यम्'। संस्कृतं प्राचीनैव भाषेति, संस्कृतं तु मृतभाषेति मिथ्या धारणा। प्राणमयोयं भाषा। अस्या जीवनं शाश्वतम्। संस्कृतमस्ति भारतस्यात्मा। संस्कृतभाषैव राष्ट्रस्योन्नत्यै अतिशयरूपेणाऽश्रयणीया विद्यते। अत एव त्रिसहस्राधिकवर्षेभ्योऽपि प्राक्तनकालात् प्रवहमाना संस्कृतसाहित्यस्याजस्रधाराद्यापि भारतखण्डे सर्वत्र यथापूर्वमेव प्रवहति। इदानीमपि संस्कृतभाषायां साहित्यं विरच्यते। संस्कृतज्ञलेखका अधुनापि संस्कृतानुरागेण लिखन्त्येव।

साम्प्रतं विचारणीयं किमभिप्रेतं संस्कृतरचनानामर्वाचीनतया। कीथमहोदयेन संस्कृतसाहित्येतिहासे त्रयोदशशतकपर्यन्तं विरचिता ग्रन्था एव समालोचिताः। प्रायो योरोपीयविद्वद्भिः सप्तदशशतकपर्यन्तमेव संस्कृतसाहित्यमितिहासग्रन्थेषु पर्यालोचितम्। नूनमेव अतः परमपि सहस्रशः संस्कृतग्रन्था विरचिताः। इदानीमपि यथा भारतस्य प्रान्तीयभाषासु ग्रन्थविरचनं जायते, तथैव संस्कृतेऽपि प्राचीननवीनविविधविषयानवलम्ब्य ग्रन्थसर्जनं भवति। अत एव मम मत्या अनुसारेण सप्तदशशतकात् समारभ्य वर्तमानकालं यावत् संस्कृते यत्साहित्यं विद्यते तदेवास्ति 'अर्वाचीनसंस्कृतसाहित्यम्'।

अस्याध्ययनस्याध्यापनस्य च प्रासङ्गिकतायां विचार-विमर्शात् प्रागेव पर्यवेक्षणीयम्—एतासाम् अर्वाचीनसंस्कृत-रचनानां विशदस्वरूपं महत्त्वञ्च। आधुनिकसंस्कृतसाहित्य-स्य वैशिष्ट्यानि कानिचन ध्रुवं स्वीकरणीयानि। संस्कृते नवं बहुविधं भावपूर्णं साहित्यं विविधासु प्राचीनासु नव्यासु च विधासु उपलभ्यते। अतश्च कालेऽस्मिन् विरचितं साहित्यं वर्तमानकालस्य सर्वान् प्रश्नान्, सर्वाः समस्याः, सर्वान् विषयान् विषयीकरोति। अस्मिन् साहित्ये विद्यते महा-काव्यस्य सर्वोत्कृष्टं स्थानम्। महाकाव्यरचनायाः प्राचीना परम्पराऽद्याप्यविच्छिन्नैव। भगवदाचार्यविरचितं 'महात्मा-गान्धिचरितम्', द्विजेन्द्रनाथविरचितं 'स्वराज्यविजयम्', विष्णुदत्तविरचितं 'गङ्गासागरीयम्' आचार्यब्रह्मानन्दशुक्ल-विरचितं 'नेहरूचरितम्', आचार्यरमेशचन्द्रशुक्लप्रणीतं 'सुग-मरामायणम्' इत्येवमादीनि महाकाव्यानि अर्वाचीनसंस्कृत-महाकाव्यानां सन्ति निदर्शनानि। पण्डिताक्षमारावविरचिता 'सत्याग्रहगीता', प्रो० इन्द्रमहोदयानाम् अमृतमन्थनमित्या-दीनि खण्डकाव्यानि वर्तमानयुगे विरचितानि। अनेके गीति-संग्रहा अपि प्रकाशिताः। गद्यविधानामपि प्रभूतो विकासः सञ्जातः। अनेके मौलिका उपन्यासाः, कथाः, कथासंग्रहाः, प्रबन्धाः, निबन्धसंग्रहाः, यात्रावर्णनानि, जीवनचरितानि अर्वाचीनसंस्कृतगद्यरचनास्वेवायान्ति। नाट्यसाहित्यस्य सर्जनमप्युल्लेखनीयम्। नाटककारेषु यतीन्द्रविमलचौधरी—डा० वी० राघवन्—श्रीमहालिङ्गशास्त्रिमहाभागा—विशेष-स्थानं भजन्ते। अर्वाचीनसंस्कृतरचनानामेको विशेषो विभागो विविधविषयिणीष्वाधुनिकसंस्कृतपत्रपत्रिकासु प्राप्यते, यासु प्रकाशिता महत्त्वाधायका अनेके लेखा, नाटकानि गीतकानि च संस्कृतस्याजस्रधारायाः सूचकानि सन्ति। अधुना संस्कृतपत्राणां महत्त्वमाकलनीयं भवति। प्रान्तीयभाषासु, आङ्गलभाषायाञ्च लिखितानां महत्त्व-

पूर्णानां ग्रन्थानां रचनानां वा संस्कृतज्ञलेखकाः संस्कृतभाषायामनुवादान् कुर्वन्ति। अधुनासंस्कृते विविधभाषाग्रन्थानामनुवादा लभ्यन्ते, यैः प्रथमं तु संस्कृतसाहित्ये एका नवीना विधा स्थानं प्राप्नोति, अपरञ्च साहित्यस्य वृद्धिरपि जायते। अस्मिन् युगे नूतनाध्यात्मिकवेदभाष्यस्य प्रेरणाप्रणयनप्रवर्त्तनद्वारा महर्षिदयानन्दमहाभागैः श्रीअरविन्दमहोदयैः संस्कृतक्षेत्रे याऽधुनिकतमा महती क्रान्तिः कृता, तया न केवलं वेदस्य कीर्त्तिरजरामरा स्थास्यति, अपितु वेदानुसन्धानमपि अद्यतने युगे नवां सरणीमनुसरति। एवं श्रावं श्रावमेतद्विवरणं सर्वेषामेव मनसि दृढोऽयं प्रत्ययो भवेत्, यदिदंयुगीनं साहित्यमपि वैपुल्येन विषयवैविध्येन नव्यमार्गाश्रयणेन च विशेषतो महत्त्वं भजते।

अत्र विचारणीयमस्याधुनिकसंस्कृतसाहित्यस्याध्ययनमध्यापनं च प्रति का स्थितिर्वर्तते? अधुना सन्ति कवयः, परं न तेषां पाठकाः। आधुनिकैः संस्कृतरचना अनेकाः प्रणीयन्ते, ज्ञायत एव सर्वैर्बहवो ग्रन्था अपि प्रकाश्यन्ते, परं न तेषां पठनपाठनयोः काचिद् व्यवस्था विद्यते। प्राचीना ग्रन्था एव सर्वैरधीयन्ते, न तु नवीनाः। न केवलं प्राचीनमार्गानुयायिनः संस्कृतपण्डिता अपितु नवीनमार्गावलम्बिनः संस्कृतज्ञा अपि वर्तमानकालिकसंस्कृतग्रन्थानामध्ययने प्रायो रुचिहीना लक्ष्यन्ते। जानन्त्येव भवन्तो यत् कस्यचित् संवृद्धिर्गतिमपेक्षते। संस्कृतोन्नत्यै नव्यसर्जनमावश्यकम्। नव्यसर्जनस्य प्रोत्साहनाय तस्याध्ययनाध्यापनेऽनिवार्ये। एतद् विना संस्कृतस्य शाश्वती धारा दृष्टिगता न भवति। तथ्यमेतत् परिलक्ष्य संस्कृतस्याविच्छिन्नतायाः परिचयाय, परम्परायाः संरक्षणाय, अर्वाचीनरचनानां प्रतिष्ठायै, संस्कृतस्य युगानुसारं विकासाय परिवर्तनाय च शिक्षणसंस्थासु नियमपूर्वकं नवीनसंस्कृतरचनानां पाठनव्यवस्था कर्त्तव्या। एतदर्थं सङ्कलितेषु ग्रन्थेषु नव्यरचनानां कति-

पद्यांशाः छात्राणां कृते कक्षापाठ्यक्रमे पाठ्यत्वेन निर्धारिता भवेयुः विश्वविद्यालयीयछात्राणां कृते कतिपया अर्वाचीनरचना अपि पठनीया भवेयुः अनिवार्यरूपेण, यतस्तदानीमेव छात्रा मनोयोगेन तेषामध्ययने संलग्ना भविष्यन्ति। अन्यच्च शोधार्थं गवेषणार्थञ्च नवीनविषयाणां ग्रहणमपि संस्कृतस्य पूर्णाङ्गविकासायावश्यकम्। इदानीमनेकगवेषकैराधुनिकसंस्कृतरचनानां विषयेषु गवेषणाकर्माणि विधीयन्ते, निःसंशयमिदं हर्षप्रदं तथ्यम्।

मन्येऽहं प्राचीनसंस्कृतसाहित्यमस्माकमपूर्वो निधिर्वर्तते, अतो हि तस्याध्ययनस्य माहात्म्यं प्रकामं स्वीकरणीयम्। निस्सन्देहं परम्परा न हेया। आधुनिकसंस्कृतरचनाः परम्पराया एव पल्लवनं सम्वर्धनम्। पुनरपि वर्तमान एव कालः खलु प्रतिष्ठाभूमिरतीतस्य कालस्य। यदतीतं वर्तमानविरहितं तत्तु निर्बीजत्वाद् निष्फलम्। एष एव प्रमुखो हेतुरर्वाचीनसंस्कृतरचनानामध्ययनाध्यापनयोरौचित्यस्य। विचारोऽयमतीतविरोधीति तु नैव मन्तव्यम्। को हि नाम वेददर्शनधर्मशास्त्राणां गौरवं न स्वीकुर्यात्, कालिदासस्य भारवेः बाणस्य वा महत्वं नाङ्गीकुर्यात्? परं तत एवाभिनवानां कृतयो नोपेक्षणीयाः। पाठकं विना साहित्यम्, अभिनयं विना नाट्यं तथैव न सम्भाव्यते यथा विद्यार्थिभिर्विना विद्यालयः, जलेन विना जलाशयः। वर्तमानस्योपेक्षा वस्तुतः प्राचीनस्य परित्यागे हेतुर्भवति। अतः समुचितानुपातेनार्वाचीनरचना अध्ययनद्वारा समादरणीयाः। यदि प्राचीनकाले कदाचिदपि समकालीनरचनानामध्ययनाध्यापनयोः प्रसङ्गिकतां प्रति विपक्षः सबलो भविष्यत्, तर्हि इदानीं संस्कृतसाहित्यस्य यो विपुलो विविधरससमन्वितः सागरो दृश्यते, स तु स्वल्पजलसरोवररूपेणैव प्राप्स्यत्, इत्यस्ति मे दृढ मतम्। अतोऽर्वाचीनसंस्कृतरचनानामध्ययनाध्यापनयोः प्रासङ्गिकता ध्रुवमेव सिध्यति।

❋

शिवराजविजये राष्ट्रियभावना

(डा० हरिनारायण दीक्षितः, संस्कृतविभागाध्यक्षः, कुमायूं विश्वविद्यालयः, नैनीतालः, उ० प्र०)

शिवराजविजयं नाम संस्कृतसाहित्यस्य एकोऽत्यूर्जस्वी तथा ऐतिहासिक उपन्यासोऽस्ति। अस्य प्रणेता श्रीमदम्बिकादत्तव्यासो विद्यते। तेनास्य सर्जना ईशवीये १८८८ तमेऽब्दे प्रारब्धा, समापनं चास्य पञ्चवर्षानन्तरम् ईशवीये १८९३ तमे वत्सरे विहितम्। अस्य लोकप्रियस्य उपन्यासस्य प्रकाशनं प्रणेतुः प्रपौत्रेण श्रीकृष्णकुमारव्यासेन कृतमस्ति।

अस्मिन्नुपन्यासे देशभक्तिभावनया राष्ट्रियभावनया च सम्भृतस्य श्रीशिवाजिमहाराजस्य राष्ट्रकल्याणात्मकानां राजनीतिककार्यकलापानां भृशं सजीवं वर्णनं वर्तते। लेखकमतेन भारतीयताविरोधिनो प्रजापीडकस्य मुगलसम्राजोऽवरंगजेबस्य तथा तदधीनानामफजलखान-शाइस्ताखान-प्रभृतियवनकुलकलङ्कानां मुगलसेनापतीनां घोरैरत्याचारैः सम्पीडितायाः भारतीयजनतायाः रक्षाकरणे स्वप्राणानपि अविगणयित्रा महावीरेण शिवाजिना स्वदेशाय भारतवर्षाय, स्वसंस्कृत्यै निरन्तरं ये भगीरथप्रयासाः कृतास्सन्ति, ये च भारतीयेतिहासे स्वर्णाक्षरैः लेखनीयाः सन्ति, तेषु अनेकेषां कार्यकलापानाम् अस्मिन्नुपन्यासे अतिरोचकं सहृदयहृदयस्पर्शविधायकं च वर्णनं जातमस्ति। भारतदेशस्य भारतीयधर्मस्य च मानमर्यादारक्षायै भारतीयजनेषु स्वतनुमनोधनसमर्पणरूपां राष्ट्रियभावनां सततं प्रोद्दीपयितुम् एष उपन्यासोऽद्यावधि अनुपम एव प्रतीयते।

व्यासस्य लेखनमस्ति यत्तेषु दिनेषु भारतवर्षस्य जना

आक्रमणशीलानां यवनानां नृशंसत्याचारैः पीड्यमाना आसन्; अत्रत्या सनातनी संस्कृतिः सभ्यता च संकटापन्ने आस्ताम्; कन्याः महिलाश्च अपहृता अपमानिता अप्रतिष्ठिताश्च क्रियमाणा आसन्; देवालयेषु देवतानां जयघोषस्य निषेधो विधीयमान आसीत्; क्वचित्क्वचित्तु देवालयाः भग्ना अपि क्रियमाणाः आसन्; उताहो ते अश्वशालारूपे परिणतीक्रियमाणा आसन्; वेदग्रन्थाः विपाटं विपाटं वीथीषु विक्षिप्यमाणा आसन्; धर्मशास्त्राणि वह्निसात् क्रियमाणानि आसन्; पुराणानि पिष्ट्वा पानीये प्रवाह्यमाणानि आसन्; तुलसीवृक्षा उत्पाट्यमाना आसन्; सम्पत्तयो लुण्ठ्यमाना आसन्; मनुष्याणां हत्या विधीयमानासीत्; गृहाणि दाह्यमानानि आसन् अथवा पात्यमानानि आसन्; गावो मृत्युमुखे प्रेष्यमाणा आसन्; सन्तः सन्ताप्यमाना आसन्; प्रसिद्धा **देवप्रतिमा** योजनापूर्वकं सर्वेषां समक्षं भग्नाः क्रियमाणा आसन्; तीर्थानां पावनमर्यादायाः विनाशो विधीयमान आसीत्; आर्याणां बलाद् धर्मपरिवर्तनं क्रियमाणमासीत्; अनेन प्रकारेण च हिन्दूधर्ममहोन्महोपरि प्रत्यक्षमेव कुठाराघातो विधीयमान आसीत्[1]।

लेखकेन आक्रामकाणां यवनानाम् अत्याचारविरोधे शिवाजि-गौरसिंह-रघुवीरसिंह-श्यामसिंह–वीरेन्द्रसिंह–माल्यश्रीक-मुरेश्वरादयोऽनेके समर्पितभावाः कथानेतारः प्रस्तुताः सन्ति। वयं पश्यामो यद् उपन्यासस्य चरितनायकेन श्रीशिवाजिना देशभक्तानां शूराणाम् अदम्यसेनायाः संगठनं सचालनं च स्वीयया प्रतिभाशालिन्या राजनीतिनैपुण्या कृत्वा भारतीयगरिमा सुरक्षितोऽस्ति। एतदर्थं राष्ट्रविरोधिभि-

(१) शिवराजविजयः (सम्पूर्णः), पृ० सं० १४-२०, २४-३३, १०७, १२०-१२१, १३७, १८८-१९१, २२८-२३१, २४२, २४४-२४६, ३८६, ४२५, ५६४

यवनैः सह हिंसापूर्णाः संघर्षा अपि कृताः सन्ति; द्वन्द्वात्मकेषु असियुद्धेषु देशद्रोहिणो मृत्युमुखे प्रेषिताः सन्ति; आश्रमाणां तपोवनानां वा व्याजेन सैनिकनिवेशानां स्थापनाः कृताः सन्ति; राजनीतेः आकरग्रन्थेषु अनुमोदिता कूटनीतिः सार्था कृतास्ति; गुप्तचराणां चर्यायै महत्त्वं प्रदत्तमस्ति तथाम्याः कार्यान्वयने गौरसिंह–रघुवीरसिंहसदृशौ सुयोग्यौ वीरवरौ नियोजितौ स्तः; राष्ट्रस्य छलिनं रिपुं छलेन जेतुम् असाम्प्रतं नैव सम्मतमस्ति; प्रायेण सफलताप्रदं निशायुद्धं योजनापुरस्सरम् उररीकृतमस्ति; देशद्रोहिणां द्विगुणितां चतुर्गुणितां वापि सेनामपसारयितुं सफलोऽभ्यासो विहितोऽस्ति; राष्ट्राक्रामकाणां सहायकेभ्यो यशवन्तसिंह-जयसिंह-सदृशेभ्यो भारतीयनरेशेभ्यो भारतीयतायाः राष्ट्रियतायाः देशभक्तेर्वा प्रभावकरं सदुपदेशं दत्वा तेषु राष्ट्रियभावनायाः पुनः संचारः कृतोऽस्ति; तथा असह्येन प्रत्याक्रमणेन देशद्रोहिणः परास्ताः कृताः सन्ति[2] ।

पाठकेषु राष्ट्रद्रोहिणः प्रति घृणाभावं निन्दाभावं चोत्पादयितुं लेखकोऽनारतं जागरूकोऽस्ति । एतादृशानां जनानां कृष्णकार्यकाणि सोद्देश्यं प्रकटितानि सन्ति तथा गुरु-गुरुतरपद-भाग्भ्योऽपि तेभ्यो भारतीयताविरोधि-नृशंस-क्रूर-कार्य-कारकत्वात् कलङ्क इति, अंगार इति, कलियुग इति, दानव इति, राक्षस इति विविधाः संज्ञाः दत्त्वा तान् प्रति हार्दिकी घृणा प्रकटीकृतास्ति[3] । नितान्तं च एतद् विपरीतं ये राष्ट्रभक्ताः सन्ति; भारतं, भारतीयनां, भारतीयधर्मं, भारतीयसंस्कृतिं भारतीयसभ्यतां च प्रति ये निष्ठावन्तः सन्ति; एषां समेषां संरक्षकाः, रक्षकाः पोषकाश्च सन्ति;

(२) स एव, पृ० सं० ३८-४७, ६८-७०, ७३-११८, १९१-१९३, २०२-२१८, २३१-२५०, ३२२-३२६, ४९९-५२१

(३) स एव, पृ० सं० २७-३४, ४१-४२, २२८-२३२, ४३७-४३८, ४४०-४४२, ४८५

स्वदेशस्य मानमर्यादाहेतवे मर्त्तुमपि सदोद्यता भवन्ति; स्वदेशस्य गरिमाणं सर्वथा समर्पितभावेन संरक्षितुं स्वीयानां व्यक्तिगतसुखानाम् उपेक्षां कुर्वन्तः सदैव बद्धपरिकरा वसन्ति; एतादृशान् राष्ट्रियवीरपुरुषान् प्रति लेखकेन अवसरे लब्धे सत्येव स्नेहसौरभसंपृक्तानि श्रद्धाकुसुमानि समर्पितानि सन्ति। ते वीरतासीमन्तिनीपतयो मताः सन्ति; देशस्य ते रत्नभूताः मताः सन्ति; भारतवर्षस्य आशावितानस्य सुदृढाः स्तम्भाः मताः सन्ति; भारतीयधर्मरक्षकाः मताः सन्ति; कर्त्तव्य परायणाश्च ते मताः सन्ति। राष्ट्रहिताय तैः सह्यमानानां क्लेशानां मुक्तकण्ठं प्रशंसा कृतास्ति; तेषामेव जन्म सार्थकं कथितमस्ति; देशस्य रक्षायज्ञे स्वप्राणान् हुतवतां तेषां स्मृत्या चक्षूंषि आर्द्राणि कृतानि सन्ति; ते राष्ट्रसर्जनाया ब्रह्माणः मताः सन्ति; तैरेव भारतभूमेः राजन्वतीतिविशेषणस्य सार्थकता मतास्ति; ते एव भारतीयगरिम्णः स्वतन्त्रतायाश्च आश्रयभूताः मताः सन्ति; ते एव भारतमातुः सुपुत्राः मताः सन्ति; महिलाभिः तदीययशोगीतानि गीतानि सन्ति; जनैस्ते स्वप्राणेभ्योऽप्यधिकमभिमताः सन्ति; तेषां क्षेमाय अभिषेकेण भगवतः शङ्करस्य अर्चनाः कृताः सन्ति; सहस्रचण्डीपाठेन शत्रुनाशिन्याः भगवत्या दुर्गाया आराधनाः कृताः सन्ति; विधिपूर्वकं च विविधा यज्ञाः विहिताः सन्ति [4]।

व्यासेन स्वीयेऽस्मिन्नुपन्यासे भारतराष्ट्रं भारतराष्ट्रियस्वतन्त्रतां च प्रति जनतामनसि आत्मीयतायाः जागरूकतायाश्च भावान् भर्त्तुं भृशं प्रयत्नाः कृताः सन्ति। एतदर्थं लब्धे सत्येव अवसरे तेन भारतस्य अतीते आकर्षकः प्रकाशः पातितोऽस्ति; देशद्रोहिभिः आक्रामकैश्च सम्पीडितस्यास्य

---

(४) स एव, पृ० सं० ३५-३६, ५७, ६२, ६९-७०, ९८-९९, १२५-१२८, २५०, ३८२, ३९०, ४७५-४७६

देशस्य दुर्दशां मूर्त्तिमतीं विधाय अश्रूणि पातितानि सन्ति; पाठकानां मनसि भारतीयतायाः प्रभावः पातितोऽस्ति; भारतीयधर्मस्य भारतीयायाः संस्कृतेः सभ्यतायाश्च प्रशंसा कृतास्ति; अत्रत्यानां तीर्थानां नगराणां च गौरवं गीतमस्ति; अत्रत्यायां प्राकृतिकसम्पत्तौ स्वाभिमानो दर्शितोऽस्ति; आक्रमणकारिभिः स्थापितायाः भारतदेशस्य राजनीतिक्याः सामाजिक्याः सांस्कृतिक्याः धार्मिक्याश्च परतन्त्रतायाः पीडां प्रति आक्रोशः प्रकटितोऽस्ति; भारतीयानां देवालय-व्रतदिवस-पर्वदिन-यात्रामहोत्सवादीनां दीनायां दुर्दशायां क्षोभः प्रकटितोऽस्ति; भारतीयतायाः विलोपे उच्छ्वासाः प्रक्षिप्ताः सन्ति; हिन्दुत्वस्य भग्नोन्मुखमेरुदण्डरक्षाहेतवे विचाराणामुपायानां च तन्तवः स्यूताः सन्ति; स्वप्नाः दृष्टाः सन्ति; देवी-देवानां मान्यताः मताः सन्ति; तान् निष्क्रियान् आलोक्य तेभ्यः उपालम्भा अपि दत्ताः सन्ति; स्वदेशस्य, स्वधर्मस्य, स्वजातेः, स्वसंस्कृतेः स्वसभ्यतायाश्च रक्षाहेतवे प्रार्थनाः कृताः सन्ति; समये दोषा आरोपिताः सन्ति; युगस्य निन्दा कृतास्ति; देशस्य भाग्यविपर्यये खेदः प्रकटितोऽस्ति; स्वकीयासफलतायां स्वीय आत्मा धिक्कृतोऽस्ति; देशद्रुहां जनानां दासताङ्गीकारकारणे ग्लानिः प्रकटितास्ति; अनुतापः कृतोऽस्ति; अश्रूणि च प्रवाहितानि सन्ति। देशस्य स्वतन्त्रतायै पारस्परिकमतभेदान् विस्मर्त्तुमुपदेशा दत्ताः सन्ति; भारतीयमानमर्यादारक्षणहेतवे सर्वञ्चित्कर्त्तुं बद्धपरिकराः भवितुं सन्देशो दत्तोऽस्ति; युद्धे गमनात्पूर्वं स्वमृत्युसंभावनां विधाय राष्ट्रियस्वातन्त्र्यसमराग्निं प्रज्ज्वलितं रक्षितुं स्वसुयोग्यानामुत्तराधिकारिणां चयनं कारितमस्ति; देशद्रोहिदमनकारकस्य अदम्यस्य सफलस्य च साहसस्य प्रशंसा कृतास्ति; समग्रभारतवर्षीयस्वतन्त्रताप्राप्तेः आशाः कृताः सन्ति; भारतीयवीरैः क्रियमाणस्य भारतीयवीरविनाशस्य निन्दा कृतास्ति; एतादृश्याः परि-

स्थित्या: यथाशक्ति वारणमेव श्रेयस्करं कथितमस्ति; दिल्ल्यां क्रूरस्यावरङ्गजेबस्य शासनसत्तामालोक्य युधिष्ठिर-पृथ्वीराजयो: स्मरणं विधाय शीतोच्छ्वासा गृहीता सन्ति; भारतीयकीर्तिभेरीनादं च दिग्दिगन्तेषु श्रोतुं कामना: कृता: सन्ति[5]।

अस्यां कृतौ व्यासेन स्वदेशद्रोहिणां विनाशाय दुर्गा-शङ्कर-विष्णु-वरुण-इन्द्र-बलरामादीन् देवी-देवान् निष्क्रिया-नालोक्य विस्मय: प्रकटितोऽस्ति; दैत्यारि: विष्णुरेतदर्थमु-पालब्धोऽस्ति यत्स भारतस्य दीनां दशामुपेक्ष्य शयानोऽस्ति; विविधाभि: व्याजस्तुतिभि: भारतस्य दशापरिष्काराय स उत्तेजितोऽस्ति; भगवान् शङ्करोऽपि यवनै: कृताया: विश्व-नाथमन्दिरस्य दुर्दशां विषये उद्बोधितोऽस्ति; अनेनैव प्रका-रेण श्रीकृष्णोऽपि यवनै: दुर्दशां प्रापितस्य वृन्दावनस्य गोविन्ददेवमन्दिरस्य विषये समुद्बोधितोऽस्ति; स्वप्ने च नयनगोचरीभूता सिंहवाहिनी भगवती दुर्गापि भारतवर्षं शत्रुभ्यस्त्रातुं प्रार्थितास्ति[6]।

अस्योपन्यासस्य एका प्रशंसनीया विशेषता इयमपि विद्यते यदस्मिन् सर्वेषामेव यवनानां कृते घृणाभावो विरोध-भावश्च नैव प्रकटितौ स्त:। यतो हि यवनोऽपि यदि कश्चित् भारतीयताविरोधिषु गतिविधिषु भागं न गृह्णाति, तर्हि तेन सह सदैव सद्भाव एव प्रदर्शितोऽस्ति। महाराजशिवाजि-राज्ये भारतं भारतीयतां च प्रति आस्थावन्तो यवना ईषदपि कष्टं नानुभूतवन्त: सन्ति। तै: सह न कोऽपि अन्यायो विहि-तोऽस्ति; न ते अपमानिता: कृता: सन्ति; न तेषामुचिते

---

(५) स एव, पृ० सं० १९-२१, ६९-७०, ९०-९२, १०५-१०८, २०७-२१७, २२८-२३१, २३८-२४२, २८६, ३२३-३२६, ३८३, ३८७-३९०, ४४९-४५०, ५६१-५६८, ५९०-५९७।

(६) स एव, पृ० सं० ११९-१२०, २१३-२१७, ५६१-५६५

सम्माने कश्चिदाघातः कृतोऽस्ति; तैरपि च साकं देशभक्त-हिन्दुभिः साकमिव रम्यो व्यवहारो विहितोऽस्ति[7]। न केवलन्तावदेतावदेव, अपितु भारतीयतानुरागिणीनां यवन-कन्यानां प्रणयभावनाया अपि समादरः कृतोऽस्ति। अस्मिन् सन्दर्भे रसनारीशिवराजयोः परस्परं स्नेहपूर्णमाकर्षणं निदर्शनरूपेण उपलक्षणरूपेण च प्रस्तोतुं शक्यते[8]।

लेखकेन स्वकीयायामेतस्यां कृतौ देशभक्तेः प्रचार-प्रसारानुरूपमेव भूषणसदृशः कविः महता प्रभावशालिना प्रकारेण प्रस्तुतोऽस्ति। अस्मिन कोऽपि सन्देहो नास्ति यद् भूषणकविना समये समये स्वीयया वीररसपूर्णया काव्य-सर्जनया महाराजशिवाजिसभायां तथा तदीयसेनायामोतप्रोते भारतानुरागरूपकाञ्चने अभीष्टः क्रियाशीलतासुगन्धः सम्भृतोऽस्ति[9]।

स्वीये भारतदेशे क्रियमाणान् राष्ट्रियतात्रिरोधिनः एनान् नृशंसान् जघन्यांश्चात्याचारान् प्रति लेखकेन श्रीमद-म्बिकादत्तव्यासेन स्वीया गम्भीरवेदना सफलतापूर्वकमभि-व्यक्तास्ति। फलस्वरूपेण तदीया सम्वेदना समस्तभारतीयानां मर्मस्थानानि संस्पृशति, येन तेषु राष्ट्रियभावना पुनः समुद्वेलिता बोभूयते इत्यत्र न कापि संशीतिरित्यलं भुत्सु पल्लवितेन।

---

(७) स एव, पृ० सं० ३१०-३१२, ३४८-३५३, ५८४-५८५

(८) स एव, पृ० सं० ३५७-३७२, ३९३-३९७, ४५१-४५४, ४८६-४९१

(९) स एव, पृ० सं० १७८-१८६, ३७७-३७८, ३८१, ४४३-४४४, ४५७-४५८

अर्वाचीनसंस्कृतस्य

तृतीयवर्षपूर्तिः

१५-१०-१९८१ तारिकायाम् अर्वाचीनसंस्कृतस्य तृतीय-वर्षपूर्तिर्जाता। अस्मिन्नवसरे राजधान्या अनेकैर्विद्वद्भिः शुभकामनाः प्रदत्ताः। एतत्पत्रस्य तृतीयवर्षीयं चतुर्थांकं विमोचयता केन्द्रीयशिक्षामन्त्रालये संस्कृतसहपरामर्शदात्रा डा० शास्त्रपुरम् रामकृष्ण स्वामिनाथन् - महाभागेनोक्तं यदेतादृशे काले, यदा अर्थाभावात् सम्पूर्णग्रन्थानां प्रकाशनं सुशकं नास्ति, अर्वाचीनसंस्कृतनिभानां सावधिकपत्राणां महती उपादेयतास्ति। एभिः पत्रैः संस्कृतजगते संस्कृतसाहित्यस्य विषये नियमितरूपेण महत्त्वपूर्णाः सूचना दीयन्ते। पत्रस्य प्रधानसम्पादकेन डा० रमाकान्तशुक्लेन विज्ञापितं यदर्वाचीनसंस्कृतस्य माध्यमेन अद्यावधि नव मौलिकरचनाः, विंशशताब्द्याउत्तरार्धे रचितानां विंशतिप्रायाणां महाकाव्यानां विषये अनेके लेखाः, समसामयिकसंस्कृतसाहित्य-सम्बन्धिनी प्रभूता च सामग्री विदुषां पुरतः सम्प्रस्तुताः। अर्वाचीनसंस्कृतपत्राय दीयमानस्यानुदानस्य कृते भारत-सर्वकारं प्रति आभारोऽपि व्यक्तः।

पत्रस्य परामर्शदातृभिः डा० रामसुरेशपाण्डेय - डा० कृष्णकान्तशुक्ल - प्रो० उमाकान्तशुक्लैरर्वाचीनसंस्कृतस्य स्वरूपपरिष्काराय अनेके सत्परामर्शाः दत्ताः।

उत्तर प्रदेश संस्कृत अकादमी के
बढ़ते चरण

प्रमुख योजनाएं

१. वृद्ध विपन्न संस्कृत विद्वानों को सहायता,

२. पुस्तकालयों को संस्कृत पालि-प्राकृत ग्रंथों के क्रयार्थ अनुदान,

३. संस्कृत विद्यालयों को पुस्तकीय अनुदान,

४. संस्कृत पत्र पत्रिकाओं को अनुदान,

५. ग्रंथ प्रकाशनार्थ अनुदान,

६. पाण्डुलिपि-सर्वेक्षण,

७. संस्कृत सेवियों तथा रचनाकारों को प्रतिवर्ष १५०००, ५०००, ३००० तथा १००० रुपये के नामित, विशिष्ट तथा विभिन्न पुरस्कार

८. प्रतिवर्ष वेदपंडितों को १,१११ रुपये के अनेक पुरस्कार,

९. सांस्कृतिक समारोहों का समायोजन।

उक्त योजनाओं के कार्यान्वयन से भारत की अनुपम निधि संस्कृत की रक्षा, प्रचार तथा प्रसार के लिए समर्पित अकादमी अपने लक्ष्यों की पूर्ति के लिए दृढ़ संकल्प है।

उपलब्धियाँ :—

१. उत्तर प्रदेश संस्कृत अकादमी से संस्कृत के वृद्ध एवं विपन्न विद्वानों को रु० १४८०००-०० धनराशि अनावर्तक अनुदान के रूप में प्रदान की गई।

२. संस्कृत के विद्वानों, वेद पण्डितों और उत्कृष्ट

पुस्तकों के लेखकों को रु० २,८४,४००-०० धनराशि के पुरस्कार वितरित किये गये।

३. सस्कृत की श्रेष्ठ पुस्तकों के प्रकाशन के लिए रु० ७५,७६१-०० धनराशि लेखकों को प्रदान की गई।

४. सार्वजनिक पुस्तकालयों को संस्कृत, प्राकृत, पालि की पुस्तकें क्रय करने हेतु रु० ५५,७५०-०० धनराशि की सहायता प्रदान की गई।

५. संस्कृत पाठशालाओं को रु० १,०२,४३९-२९ धनराशि को सहायता प्रदान की गई।

६. संस्कृत की पत्र-पत्रिकाओं को रु० २८,५००-०० धनराशि की सहायता प्रदान की गई।

७. अनेक महत्त्वपूर्ण सांस्कृतिक कार्यक्रम किए गये।

संस्कृत के प्रचार-प्रसार से सम्बन्धित आपके सत्परामर्शों का सहर्ष स्वागत करने के लिए सदैव उत्सुक

अकादमी की कार्यकारिणी-समिति

अध्यक्ष प्रो० कल्याणपति त्रिपाठी, औरंगाबाद, वाराणसी

उपाध्यक्ष डा० शिवशेखर मिश्र, आचार्य एवं अध्यक्ष संस्कृत-विभाग, लखनऊ विश्वविद्यालय, लखनऊ।

आवासीय पता : कुमार सदन, बाबूगंज, लखनऊ।

" प० रुद्रप्रसाद अवस्थी, राजगोपाल, संस्कृत महाविद्यालय, अयोध्या।

सदस्य आयुक्त एवं सचिव शिक्षा–विभाग, उत्तर प्रदेश शासन, लखनऊ।

" आयुक्त एवं सचिव सांस्कृतिक विभाग, उत्तर प्रदेश शासन, लखनऊ।

सदस्य पं० ओंकारनाथ द्विवेदी, नारी शिक्षा निकेतन, लखनऊ।

आवासीय पता : ११७, नजीराबाद रोड, लखनऊ

" श्री शिवशंकर त्रिवेदी, प्रमुख महामंत्री, उ० प्र० संस्कृत संरक्षण समिति, लखनऊ

आवासीय पता—३८, सुन्दरबाग, लखनऊ।

" पं० जगन्नाथ तिवारी, प्रो० एवं अध्यक्ष (अवकाश प्राप्त) जम्मू एवं कश्मीर विश्वविद्यालय

आवासीय पता

२/२६, स्वदेशी बीमानगर, आगरा।

" डा० हरिनारायण दीक्षित, आचार्य एव अध्यक्ष (संस्कृत विभाग) कुमायूं विश्वविद्यालय, नैनीताल

" श्री शिव राम शर्मा कोषाध्यक्ष, उ० प्र० संस्कृत अकादमी

" श्री विनोद चन्द्र पाण्डेय निदेशक, उ० प्र० संस्कृत अकादमी

आवासीय पता : सी १२, राजकीय आवास, निरालानगर, लखनऊ।

अधिक जानकारी के लिए सम्पर्क सूत्र :

निदेशक,

उत्तर प्रदेश संस्कृत अकादमी,

१२५, रायल होटल लखनऊ (उ० प्र०)।

(उत्तर प्रदेश संस्कृत अकादमी, लखनऊ द्वारा प्रसारित)

अर्वाचीनसंस्कृतम्

(*R.N. 34554/79*)

(त्रैमासिक पत्रिका)

※

१. प्रकाशन का स्थान : नयी दिल्ली

२. प्रकाशन की आवधिकता : त्रैमासिक

३. मुद्रक तथा प्रकाशक का
नाम, राष्ट्रीयता तथा पता : डॉ० रमाकान्त शुक्ल
(देववाणी-परिषद्, दिल्ली-कृते)
भारतीय
६, वाणी-विहार, नयी दिल्ली-११००५९

४. सम्पादक का नाम,
राष्ट्रीयता तथा पता : डॉ० रमाकान्त शुक्ल
भारतीय
६, वाणी-विहार, नयी दिल्ली-११००५९

५. उन व्यक्तियों के नाम और पता
जो इस पत्रिका के मालिक या
साझदार हैं अथवा जो इसकी
सारी पूँजी के एक प्रतिशत से
अधिक के हिस्सेदार हैं। : देववाणी-परिषद् दिल्ली
६, वाणी-विहार, नयी दिल्ली-११००५९

मैं डॉ० रमाकान्त शुक्ल, यह घोषणा करता हूँ कि उपर्युक्त विवरण मेरी पूरी जानकारी और विश्वास के अनुसार सही है।

डॉ० रमाकान्त शुक्ल
महासचिव, देववाणी-परिषद्, दिल्ली
प्रकाशक

परामर्शदातृमण्डलम्

(१) डॉ० रामसुरेशपाण्डेय:
एम०ए०, पीएच० डी०, व्याकरणाचार्य:
(२) डॉ० कृष्णकान्त शुक्ल:
एम०ए०, पीएच० डी०, साहित्याचार्य:
(३) प्रो० उमाकान्त शुक्ल:
एम० ए०, साहित्याचार्य:, सांख्ययोगाचार्य:,

वार्षिकग्राहकशुल्कम्
विंशतिरूप्यकात्मकम् *Rs. 20:00*
Annual Subscription
Rs. 20.00 (In India)
5 Dollars or 2 Pounds (Abroad)

ग्राहकाणां कृते सूचना

अनेनाङ्केन 'अर्वाचीनसंस्कृत'स्य चतुर्थवर्षप्रारम्भो भवति। ग्राहका: चतुर्थ (१९८२)-वर्षीय स्वग्राहकताशुल्कं साक्षाद्रूपेण 'देववाणी-परिषद्, दिल्ली' इति नामांकितबैंक-ड्राफ्टरूपेण वा शीघ्रमेवाधोदत्ते संकेते पुन: प्रेषयितुं सादरमभ्यर्थ्यन्ते:

महासचिव:, देववाणी-परिषद्, दिल्ली
६-वाणी-विहार:, नयी दिल्ली-११००५९

To Our Subscribers

With this Number '*Arvācīnasaṁskṛtam*' is entering IVth Volume

The subscribers are requested to please send their subscription for 1982 in cash or by BanK Draft issued in the name of 'DEVAVANI PARISHAD, DELHI', to.

The General Secretary
DEVAVANI PARISHAD, DELHI
6 Vani Vihar, New Delhi-110059

देववाणी-परिषदा प्रकाशिताः संग्रहणीया ग्रन्थाः

१. अर्वाचीनसंस्कृतमहाकाव्यविमर्शः (प्रथमखण्डः) रु० १५.००
(सं० : डा० रमाकान्तशुक्लः)
२. ,, ,, ,, (द्वितीयखण्डः) रु० ३०.००
३. ,, ,, ,, (तृतीयखण्डः) रु० ३०.००
४. कर्णभूषणम् (डा० सी०आर० स्वामिनाथन्) रु० ५.००
५. भाति मे भारतम् (डा०रमाकान्तशुक्लः) रु० ४०.००
६. श्रीकृष्णचरितम् (डा० रमेशचन्द्रशुक्लः) रु० ३०.००
७. सुगमरामायणम् ,, ,, रु० ३५.००
८. हरविजयस्य साहित्यिकमध्ययनम् रु० ६०.००
(डा० कृष्णकान्तशुक्लः)
९. श्रीमदप्पयदीक्षितचरितम् रु० २०.००
(डा०हरिनारायणदीक्षितः)
१०. भारतस्वातन्त्र्यसंग्रामेतिहासः (डा०र०च०शु०) रु० ३५.००
११. सदाशयसमुच्चयः (टी०वी०परमेश्वरअय्यर) रु० १५.००
१२. आभाणकमञ्जरी (,, ,,) रु० १५.००
१३. मेघदूत : एक विश्लेषण (डा० देवीदत्त शर्मा) रु० २०.००
१४. रघुवंश : एक विश्लेषण (,, ,,) रु० २०.००
१५. अभिज्ञानशाकुन्तल : एक विश्लेषण (,,) रु० २०.००
१६. कालिदास की कला और संस्कृति (भाग २) रु० ६०.००
(लेखकः डा० देवीदत्त शर्मा)

प्राप्तिस्थानम्
देववाणी-परिषद्, दिल्ली'
६ वाणी-विहारः, नयी दिल्ली-११००५९.

'देववाणी-परिषद्, दिल्ली'—कृते डा० रमाकान्तशुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नई दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा '६, वाणी-विहार, नयी दिल्ली ११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (४/१)। सम्पादकः डा० रमाकान्त शुक्लः। प्रकाशनतिथिः १५-१-१९८२।

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

चतुर्थवर्षे द्वितीयोऽङ्कः

१५ अप्रैल १९८२

प्रधानसम्पादकः

डा० रमाकान्तशुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः,

सांख्ययोगाचार्यः

प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

विषयसूची

क्रमः	लेखः/रचना	लेखकः	पृष्ठाङ्कः
१.	सम्पदकोयम्	सम्पादकः	६१-६२
२.	*Editorial*	*Editor*	६३-६४
३.	मुनिश्रीज्ञानसागर-कृतिषु समाजो राजनीतिरर्थश्च	डा० किरण टण्डनः	६५-७४
४.	'भाति मे भारत'मिति काव्ये राष्ट्रियभावना	डा० हरिनारायण दीक्षितः	५-८०
५.	अर्वाचीनगद्यसमीक्षणम्	डा० कैलाशनाथ द्विवेदी	८१-९२
६.	कतिपया उल्लेखनीया अर्वाचीनसंस्कृतरचनाः	डा० रमाकान्त शुक्लः	९३-१०६
७.	अन्योक्तिस्तबकम्	श्री श्रीकृष्णसेमवालः	१०७-११२
८.	जीवनं सारभूतम्	डा० कृष्णकान्त शुक्लः	११३-११४
९.	सम्वेदनं निवेदनञ्च	श्री मथुरादत्त जोशी	११५-११६
१०.	'देववाणी-परिषद्, दिल्ली'-वार्ता:	परिषन्महासचिवः	११७-१२१
११.	अन्धकारः	श्री हर्षदेवमाधवः	१२२
१२.	अर्वाचीनसंस्कतनियमाः		१२३

सम्पादकीयम्

अर्वाचीनसंस्कृतस्य चतुर्थवर्षे द्वितीयोऽङ्को पाठकानां करकमलेषु समर्प्यते। अस्मिन्नङ्के चत्वारि शोधपत्राणि, कतिपयाः कविताः, देववाणी-परिषदो विगतमासत्रये घटितानां कार्यकलापानां विहङ्गावलोकनञ्च प्रकाश्यन्ते।

'मुनिश्रीज्ञानसागरकृतिषु समाजो राजनीतिरर्थश्चे'ति शीर्षक लेखे विंशशताब्दोयस्य जैनकवेः मुनिश्रीज्ञानसागरस्य पञ्च काव्यान्याश्रित्य डा० किरणटण्डनमहाभागया कवेः सामाजिकी, राजनीतिकी आर्थिकी च विचारधाराः संशोधिताः। 'भाति मे भारतमितिकाव्ये राष्ट्रियभावना' इति शीर्षके लेखे डा० हरिनारायणदीक्षितमहाभागेन प्रस्तुतपंक्तिलेखकस्योक्तरचनामवलम्ब्य स्वविचाराः प्रदत्ताः।

'अर्वाचीतसंस्कृतगद्यसमीक्षणम्' इति शीषके शोधलेखे डा० कैलाशनाथद्विवेदिमहाभागेन विंशशताब्द्यां रचितानां कतिपयसंस्कृतगद्यकृतीनां सर्वेक्षणात्मकः परिचयो दत्तः। यद्यपि अस्मिन् लेखे सर्वासामेवार्वाचीनसंस्कृतगद्यरचनानां चर्चा नैव जाता, तथाप्ययं लेखः शोधार्थिनां कृते महत्त्वं बिभर्ति।

'कतिपया उल्लेखनीया अर्वाचीनसंस्कृतरचनाः'–इति शीर्षके लेखे प्रस्तुतपंक्तिलेखकेन १९८०-८१ वर्षयोः प्रकाशितानामष्टरचनानां विषये संक्षिप्तसूचनात्मकं विवरणं दत्तम्। एतासां विषये विद्वांसः संशोधकाश्च विस्तरेण स्व-

विचारान् प्रकटीकरिष्यन्तीति आशा करणीया ।

अङ्केऽस्मिन् काश्चन पद्यात्मिका रचना अपि दीयन्ते येन पाठकैर्वर्तमानेऽनेहसि संस्कृते क्रियमाणस्य रचनात्मक-लेखनस्यापि मनाक् परिचयो लभ्येत ।

'**देववाणी-परिषद्, दिल्ली**'-वार्तायां परिषदायोजित-कार्यकलापानां संक्षिप्तं विवरणं प्रस्तुतमस्ति ।

अर्वाचीनसंस्कृते प्रकाशनार्थं लेखकैः प्रभूता सामग्री प्रेष्यते । यद्यप्यधिकाधिकसामग्र्याः प्रकाशनं कर्तुमस्माभिर्यत्यते तथापि कदाचित् स्थानानुरोधात् कस्यचिल्लेखस्य समावेशो यदि न भवति तर्हि कृपालुलेखकैः वयं क्षन्तव्याः स्मः । समयानुसारं स्थानानुरोधात् लब्धसामग्र्या उपयोगस्य पूर्णचेष्टा क्रियते ।

कृपालवः पाठकाः क्वचित् त्रुटितान् शब्दान् संशोधयितुं सादरं प्रार्थ्यन्ते ।

विदुषां वशंवदः
रमाकान्तशुक्लः
प्रधानसम्पादकः

१५.४.१९८२ ई०

Editorial

The second number of the IVth Volume of *Arvācīnasaṁskṛtam* is ready to see the light. This consists four papers, some Sanskrit poems and a birds eye view on the activities of Devavani Parishad, Delhi during the past three months.

The first article entitled '*Muniśrī Jñānasāgarakṛtiṣu samājo, rājanītirarthaśca*' is a research-paper by Dr. (Km.) Kiran Tandon. Herein, she has treated the social, political and econmic viewpoints of a Jain poet Muni Shri Jnanasagara contained in his five works.

In the second article entitled '*Bhāti me Bhāratām iti kāvye rāṣṭriyabhāvanā*' Dr. Hari Narayan Dixit has shown the national elements in *Bhāti me Bhāratam*, The poetical work composed by the writer of the present lines.

The third paper is '*Arvācīnasaṁskṛtagadyasamīkṣaṇam*' by Dr. Kailash Nath Dvivedi. Here he has taken into account some of the modern Sanskrit prose works composed and published in the 20th century. Thus naturally, this cannot comprehend all the main modern prose works, nevertheless, it will surely benefit the researchers dealing with modern Sanskrit prose.

In the fourth article entitled '*Katipayā ullekhanīyā Arvācīnasaṁskṛtaracanāḥ*' the writer of these lines has briefly reviewed eight Sanskrit creative

works published during 1980 and 1981 with a hope that the scholars would make proper appreciation of these works.

The Sanskirt poems included in this issue are intended to show the incessant current of Sanskrt creative writing.

Finally a brief report of the activities organised by 'Devavani Parishad, Delhi' in past three months is given under the heading *'Devavānī Pariṣad Vārtā'*

The space at our disposal is too inadequate to contain all the matters received for publication. But at the same time, we assurc the revered contributors that we will try our best to publish their valuable articles as and when it will be possible.

In view of our various limitations the journal cannot be immune from printing mistakes. Hence, our readers are humbly requested to kindly correet the same.

(Dr.) Rama Kant Shukla
Chief Editor

मुनिश्रीज्ञानसागरकृतिषु समाजो राजनीतिरर्थश्च

(ले० डॉ० किरण टण्डन:, प्राध्यापका, संस्कृत-विभाग:, कुमायूँ विश्वविद्यालय:, नैनीताल: (उ०प्र०))

महाकवि: मुनिश्रीज्ञानसागर: दिगम्बरजैनधर्मावलम्बी हिन्दी-संस्कृत-पालि-प्राकृतभाषासु समानाधिकारं धाता, महान् दार्शनिक:, साहित्यकारश्चासीत्। अयं संस्कृतमाश्रित्य जयोदय-वीरोदय-सुदर्शनोदय-समुद्रदत्तचरितानि चत्वारि महाकाव्यानि, 'दयोदयचम्पू:' इत्यभिधानमेकं चम्पूकाव्यम्, 'मुनिमनोरञ्जनशतक'नाम्ना प्रसिद्धमेकं शतककाव्यञ्च विरचितवान्। मुनिमनोरञ्जनशतकं विहाय उपर्युक्तानि पञ्चकाव्यानि प्रकाशितानि सन्ति। प्रस्तुत: शोधलेख: इमान्येव पञ्चकाव्यानि आश्रित्य प्रस्तूयते।

संसारेऽस्मिन् यावन्तोऽपि प्राणिन: जीवनं धारयन्ति ते सर्वे पूर्णतया आत्मनिर्भरा: न भवन्ति। तेषां जीवने समाज-राजनीत्यर्थव्यवस्थासंस्कृतिधर्मदर्शनादीनां संसारे उपलब्धानां तत्त्वानां प्रभाव: अवश्यमेव पतति। अत: तै: एषां नियन्त्रणे स्वक्रियाकलापा: क्रियन्ते। एषां तत्त्वानां कानिचित् अनुकूलानि भवन्ति कानिचित् प्रतिकूलानि। जना:

स्वकीयं जीवनं सफलयितुं वाञ्छन्ति । ते विशिष्टं समाजं, विशिष्टां राजनीतिं, विशिष्टामर्थव्यवस्थां, विशिष्टां संस्कृतिं, विशिष्टं धर्मं च वाञ्छन्ति । जीवनस्य प्रभावयितृणां समाजराजनीत्यादीनां तत्त्वानां विषये व्यक्तेः एतादृशी धारणा एव जीवनदर्शनमुच्यते । कः कीदृशं जीवनमिच्छति, एतदेव तस्य जीवनदर्शनमस्ति । कस्यापि कवेः जीवनं प्रति किं दृष्टिकोणं वर्तते ? कीदृशी धारणा वर्तते ? सर्वमिदं तत्काव्यानुशीलनेन सुष्ठु ज्ञातुं शक्यते । अत्र महाकवेः मुनिश्रीज्ञानसागरस्य समाजराजनीत्यर्थसम्बद्धं दृष्टिकोणं तस्य काव्यानि आश्रित्य प्रस्तूयते :–

कवेः सामाजिकी विचारधारा

मुनिश्रीज्ञानसागरस्य काव्यानामनुशीलनेन ज्ञायते यत् तस्मै एतादृशः समाजो रोचते यस्मिन् जनाः धर्मं मानवतां च प्रति आस्थावन्तो भवन्तु, भारतीयसंस्कृतेश्च मूलतत्त्वानि अतिशयेन सन्तु । जनेषु धर्मं प्रति जागरणानयनं मुनीनां कर्त्तव्यं स्यात्; शासकाः प्रजारञ्जनेन सह शासनं कुर्वन्तु; वणिग्जनाः अर्थव्यवस्थां संरक्षन्तु; सेवकाश्चोपर्युक्तान् जनान् सेवन्ताम् । स्पष्टमस्ति यत् मुनिश्रीज्ञानसागरः भारतवर्षे प्रचलितां वर्णव्यवस्थां स्वीकरोति[1] । परन्तु सः वर्णव्यवस्थां जन्मानुसारिणीं नैव, अपितु कर्मानुसारिणीं स्वीकरोति । अतएव तस्य मते ब्राह्मणानां कानिचिद्

---

१. वीक्ष्येदृशीमङ्गभृतामवस्थां
तेषां महात्मा कृतवान् व्यवस्थाम् ।
विभज्य तान् क्षत्रिय-वैश्य-शूद्र-
भेदेन मेधा-सरितां समुद्रः ।।

आवश्यकानि लक्षणानि अधोलिखितानि सन्ति–

ब्राह्मण सत्याहिंसास्तेयब्रह्मचर्यापरिग्रहान् पालयेत्; तपश्चरणेन्द्रियसंयमशोकराहित्येषु प्रवर्तेत; छलप्रपञ्चादिभ्यः दूरे वर्तेत; तस्मिन् शान्तिसंयमशुद्धतानाम् आधिक्यं भवेत्; प्राणिमात्रं प्रति दया भवेत्; सः आत्मचिन्तनं कुर्यात्; परनिन्दां च न कुर्यात्। निस्पृहमनोवाक्कायैः शुद्धाद्वैतभावं प्रापयिता, रात्रिभोजनं त्यक्ता, दिने एकवारं खादिता निर्जन्तुकं जलं पाता पुरुष एव ब्राह्मणः कथ्यते। समाजे ये ब्राह्मणाः कथ्यन्ते वस्तुतस्ते ब्राह्मणाः न सन्ति। वास्तविकब्राह्मणस्तु उपर्युक्तगुणसम्पन्नो मानव एव भवति[2]।

कविमतानुसारेण जनैः साधुषु विश्वसितव्यम्, तेषु श्रद्धा कर्त्तव्या; अतः सः स्वकीये काव्ये स्वप्नफलं ज्ञातुं सम्भ्रान्तं श्रेष्ठिवृषभदासं जिनमन्दिरे मुनेः समीपं प्रेषयति[3]। सः वाञ्छति यत् सामाजिकाः स्वकीयेषु पूज्यजनेषु आदरभावं रक्षेयुः, तेषाञ्च वचनं विनम्रभावेन शृणुयुः। श्रेष्ठिवृषभदासस्य पुत्रः सुदर्शनः अस्य भावस्य उदाहरणमस्ति। सः चम्पाधिपतेः उच्चपदं विचार्य तेन स्वोपरिकृतं दुर्व्यहारं न ध्यायति[4]। श्रेष्ठिवृषभदासे

यस्यानुकम्पा हृदि तूदियाय
स शिल्पकल्पं वृषलोत्सवाय।
निगद्य विड्भ्यः कृषिकर्म चाय-
मिहार्थशास्त्रं नृपसंस्तवाय॥
(वीरोदयम् १८/१३-१४)

२. वीरोदयम्, १४/३५–४३
३. सुदर्शनोदयम्, २/२२–२४
४. तदेव, २ २२-२४

दीक्षिते सति सोऽपि दीक्षां ग्रहीतुं विचारयति [5]। एवमेव वीरोदयमहाकाव्यस्य नायकः भगवान् महावीरोऽपि जनकेन प्रस्तावितं स्वकीयविवाहप्रस्ताव विनम्रभावेन अस्वीकरोति [6]।

महाकवेः हृदये शिक्षितसमाजस्य चित्रं वर्तते; देशात् निरक्षरतावारणाय प्रबला इच्छास्ति। तस्य धारणास्ति यत् सर्वेषाम् अभिभावकानां कर्त्तव्यमस्ति यत् ते स्वकीयाः सन्ततीः शिक्षासम्पन्नाः कर्तुं यतेरन्। इदमेव कारणमस्ति यद् दयोदयचम्पूकाव्ये वर्णितमस्ति यत् ग्रामनिवासिना गोविन्दाभिधानेन गोपालकेन स्वकीयस्य पालितस्य पुत्रस्य सोमदत्तस्य कृते यथाशक्ति शिक्षायाः प्रबन्ध कृतः [7]।

मुनिश्रीज्ञानसागरः नागरिकसमाजापेक्षया ग्रामीणसमाजे सारल्यं सौहार्दञ्चाधिकं पश्यति। यस्य अनाथबालकस्य विषये ज्ञात्वा श्रेष्ठिगुणपालः तं मारयितुं प्रयतते [8]। तमेव दृष्ट्वा गोपालघोषस्य निवासी गोविन्दः करुणया वात्सल्येन च अभिभूतो भवति [9]।

मुनिश्रीज्ञानसागरः वर्णव्यवस्थानुसारेणैव विवाह-

---

५. तदेव, ४/१५
६. वीरोदयम्, ८/२३, २८-४५.
७. दयोदयचम्पूः, चतुर्थलम्बः, षष्ठश्लोकस्य पूर्वपश्चाद्वर्त्तिनौ गद्यभागौ।
८. सैव, तृतीयलम्बः, तृतीयश्लोकस्य पश्चाद्वर्त्ती गद्यभागः।
९. सैव, चतुर्थ लम्बः, नवमश्लोकस्य पश्चाद्वर्त्ती गद्यभागः दशमश्लोकश्च।

संस्कारस्य मान्यतां ददाति। युवराज्ञी सुलोचनाजयकुमारयोः विवाहस्तथा श्रेष्ठिसागरदत्तस्य पुत्र्या मनोरमया सह श्रेष्ठिवृषभदासपुत्रस्य सुदर्शनस्य विवाहोऽस्य उदाहरणे स्तः[10]।

सम्भवतः मुनिश्रीज्ञानसागरः पुत्राय पुत्र्यपेक्षया महन्महत्त्वं ददाति; अतएव तस्य साहित्ये पुत्रजन्मोत्सवस्तु[11] वर्णितोऽस्ति किन्तु पुत्रीजन्मोत्सवस्य उल्लेखोऽपि न दृग्गोचरीभवति। परन्तु विवाहे सः पुत्रस्य इच्छया सहैव पुत्रीच्छामपि महत्त्वपूर्णामेव मन्यते। सुलोचनास्वयंवरः[12], मनोरमासुदर्शनविवाहश्च[13] अस्य तथ्यस्य उदाहरणे स्तः।

पत्नीपत्योः दाम्पत्यजीवनं सुखमयं स्यात्, अस्य कृते कवेः मान्यतास्ति यत् पुरुषः एकपत्नीव्रतं धारयेत्[14]। आम्, यदि राजनीत्याः दृष्ट्या अनेकान् विवाहान् कर्तुमावश्यकता समापतेत् तर्हि न काऽपि हानिः[15]। एवमेव पत्नी स्वपतिं प्रति निष्ठावती भवेत्, अन्यथा तस्याः दशा राज्ञी अभयमतीवद् भविष्यति[16]।

---

१०. (क) जयोदयम्, द्वादशसर्गः।
    (ख) सुदर्शनोदयम्, ३/४-१४
११. (क) वीरोदयम्, ८/१-६,
    (ख) सुदर्शनोदयम्, ३/४-१४
१२. जयोदयम्, ६/११९-१२१
१३. सुदर्शनोदयम् ३/४२-४८
१४. तदेव, ६/षड्विंशतितमश्लोकस्य पूर्ववर्त्ति गीतम्।
१५. दयोदयचम्पूः, सप्तमलम्बः, द्वादशश्लोकस्य पश्चाद्वर्त्ती गद्यभाग।
१६. सुदर्शनोदयम् ८/३५

कवेः अयमपि विश्वासोऽस्ति यत् नारीणां स्वतन्त्रताधिक्यं नोचितमस्ति। पत्युः पत्न्यां नियन्त्रणम् आवश्यकमस्ति। अन्यथा सा स्वकीयायाः स्वतन्त्रतायाः दुरुपयोगं कर्त्तुं शक्नोति। सहैव कविना नार्याः दासीरूपापेक्षया सहचरीरूपायाधिकं महत्त्वं दत्तमस्ति [17]। यदि पतिगृहीतो मार्गः समुचितोऽस्ति, तर्हि पत्न्यापि स एव अनुसरणीयः।

कवेः मान्यतास्ति यत् पुत्रीपुत्रैः पित्रोः आज्ञा अवश्यमेव पालनीया अस्ति किन्तु पितृभ्यामपि स्वकीयं स्वार्थंसाधयितुमीदृशं किमपि कार्यं न कर्त्तव्यम्, यत् तयोः सन्तानहिते बाधकं स्यात् यथा गुणमतीगुणपालाभ्यां कृतम् [18]। कविमतानुसारेण सन्तत्या पित्रोः अनुचितायाः आज्ञायाः उल्लंघनं निःसंकोचं कर्त्तव्यम् [19]।

मुनिश्रीज्ञानसागराय स्त्रियाः वेश्यारूपं न रोचते। अतएव तस्य काव्यस्य एका गणिका तु उद्याने शयानं सोमदत्तं दृष्ट्वा वात्सल्याभिभूता भवति [20], अन्या च गणिका तपस्विनः दृढव्यक्तित्वसम्पन्नस्य सुदर्शनस्य सम्मुखे नतमस्तका भवति [21]। स्पष्टमस्ति यत् कविना नारीणां स्वाभाविकगुणानां वेश्यानामस्वाभाविकेषु दुर्गुणेषु जयः कारितोऽस्ति यः वस्तुतः अद्यतनस्य वेश्यावृत्त्युन्मूलनस्यैव प्रतीकोऽस्ति।

उपर्युक्तविवेचनेन स्पष्टमस्ति यत् मुनिश्रीज्ञानसागराय ईदृशः समाजो रोचते, यस्मिन् पूर्णस्वस्थाः, कर्त्तव्यपरायणाः,

---

१७. (क) जयोदयम्, २८/६९,
(ख) सुदर्शनोदयम्, ८/२७, ३३ तथा ३४,
१८. दयोदयचम्पूः, षष्ठलम्बः।
१९. श्रीसमुद्रदत्तचरितम् ४/७, ८

सदाचारिणः, धर्मात्मानश्च मनुष्याः निवसेयुः।

कवेः राजनैतिकी विचारधारा

राज्यसंचालनस्य रीतिरेव राजनीतिः कथ्यते। प्रत्येक-शासकस्य राजनीतिः पृथक्-पृथक् भवति। कस्यचिद् राज्ञः नीतिः सफला भवति, कस्यचिच्च असफला भवति। सफला राजनीतिः सास्ति यस्याः अनुसारेण राजा प्रजानाम् उपरि नियन्त्रणं कर्त्तुं शक्नुयात्। ईदृश्या नीत्या प्रजासु विद्रोहस्य सम्भावना अपि भवितुं न शक्नोति।

मुनिश्रीज्ञानसागरस्य काव्यानां परिशीलनेन ज्ञायते यत् कविः जानाति यद् राज्ञः प्रजाः प्रति प्रजानां च राजानं प्रति कानि कानि कर्त्तव्यानि भवेयुः? मुनिना राजकुमाराय जयाय दत्ते उपदेशे कवेः एतादृश्याः राजनीत्याः ज्ञानं भवति। तदनुसारेण राज्ञा स्वसेवकान् प्रति समुचितं व्यवहर्त्तव्यम्; दानसम्मानादिभिः शत्रवः वशीकर्त्तव्याः[22]। यः नृपः प्रजाहितं चिन्तयति तस्यैव राज्ये प्रजाः सुखिताः भवन्ति, तं प्रति च भक्तिभावनासमन्विताः भवन्ति। सिद्धार्थ[23]-भरत-[24] वृषभदत्ताः[25] एतादृशाः एव प्रजापालकाः शासकाः सन्ति। सम्राट् भरतस्तु राजनीत्यां

२०. दयोदयचम्पूः, चतुर्थलम्बः, एकादशद्वादशश्लोकयोः पश्चाद्वर्त्तिनौ गद्यभागौ।

२१. सुदर्शनोदयम्, ६/श्लोकः ३१, तस्य पूर्ववर्त्ति गीतं च।

२२. जयोदयम्, २/७०-७२

२३. वीरोदयम्, ३/३

२४. जयोदयम् ७/३३

महान् निपुणोऽस्ति। अधीनस्थैः नृपैः सह तस्य एतादृशाः पारिवारिकसम्बन्धाः सन्ति यत् ते सर्वे तस्य विरोधे विद्रोहं कर्त्तुं तु दूरे वर्तेत, विचारयितुमपि न शक्नुवन्ति। राज्ञि प्रजावत्सलताराजनीतिनिपुणतादिभिः गुणैः सहैव दूरदर्शितापि भवेत्। सः न केवलं बाह्यजनानामपि तु अन्तःपुरवासिनामपि वृत्तान्तस्य ज्ञाता भवेत्। सः व्यक्तेः सूक्ष्मनिरीक्षणकर्त्ता भवेद्, अन्यथा अन्तःपुरे घटितानां भ्रष्टाचाराणां दोषः सुदर्शनसदृशानां निरपराधप्रजाजनानामुपरि आरोप्यते[26]। राज्ञः इदं परमकर्त्तव्यमस्ति यत् सः वास्तविकमपराधिनमन्विष्य एव न्यायपूर्वकदण्डस्य व्यवस्थां कुर्यात्[27]।

राज्यसंचालनस्य सर्वप्रमुखोऽधिकारी राजा भवति। कविः न्यायाधीशरूपेऽपि राजानं स्वीकृतवान्[28]। राजानं शास्तुमेकं मन्त्रिमण्डलमपि भवेत्[29]। राज्यस्यार्थव्यवस्थां परिचालयितुम् एकस्य राजश्रेष्ठिनः पदमपि कविः स्वीकरोति[30]। राज्यस्य सुरक्षाहेतवे कविना सेनापतिपदमपि स्वीकार्यमस्ति[31]। नृपाणां संदेशान् प्रेषयितुं दूतानामपि सुव्यवस्था भवेत्[32]।

२५. दयोदयचम्पूः, १/१२
२६. सुदर्शनोदयम्, ७/३५-३६
२७. तदेव, ८/१०
२८. श्रीसमुद्रदत्तचरितम्, ४/४
२९. जयोदयम्, ३/८
३०. दयोदयचम्पूः: १/१४
३१. जयोदयम्, ६/१४
३२. तदेव, ९/५८

प्रजाजनैः राज्ञो नियन्त्रणे भवितव्यम् । राज्ञा दत्ताज्ञा प्रत्येकप्रजाजनेन पालनीया। कविः आज्ञाकारिप्रजाजनरूपे सोमदत्तं प्रस्तुतवान्, यः राजकीयाज्ञां प्राप्य राजकुमार्या सह विवाहं विनम्रतया स्वीकृतवान्[33] ।

युद्धविषयेऽपि कवेः सुनिश्चितधारणास्ति यत् यदा प्रतिपक्षी राजा युद्धं कर्त्तुमेव इच्छेत् तदा पृष्ठं दर्शयित्वा पलायनापेक्षया युद्धं कर्त्तुमेव समीचीनमस्ति [34]। योद्धारः परस्परं समशस्त्रधारिणः समवाहनयुताश्च भवेयुः[35]। युद्धसमाप्तौ मृतपुरुषाणाम् अन्त्येष्टिसंस्कारः शस्त्रक्षताना-मुपचारश्चावश्यमेव करणीयौ [36] ।

स्पष्टमस्ति यत् कवि, एतादृशीं राजनीतिकव्यवस्था-मिच्छति, यस्यां प्रजाजनानां हर्षेण सह अधीनस्थराजसु मधुरनियन्त्रमपि भवेत् ।

कवेः आर्थिकी विचारधारा

कवेः हार्दिकी इच्छास्ति यत् प्रत्येकमनुष्यः आर्थिक-दृष्ट्या स्वावलम्बी भवेत् । स्वकीयामिमामिच्छां सः वणिक्-पुत्रभद्रमित्रस्य रूपेऽभिव्यक्तवान् अस्ति [37] ।

व्यक्तिः स्ववर्णव्यवस्थानुसारेणैव आजीविकोपार्जनं कुर्यात् । समाजेऽर्थोपार्जनस्य कार्यं वणिक्जनानां कृते निर्धा-

---

३३. दयोदयचम्पूः, ७/द्वादशत्रयोदशश्लोकयोः मध्यवर्त्ती गद्यभागः ।

३४. जयोदयम्, ७/८२-८५

३५. तदेव, ८/६४-६५

३६. तदेव, ८/८५

३७. श्रीसमुद्रदत्तचरितम्, ३/१-१६

रितमस्ति[38], वधादीनि च निन्दनीयानि कर्माणि चाण्डालानामेव पैतृकव्यवसायोऽस्ति[39]।

कविः स्वकीयेषु काव्येषु समुद्रीयव्यापार[40] - पशुपालन-[41] कृषि[42] - मृण्मयपात्रनिर्माण[43] - दीनां व्यवसानामुल्लेखं कृतवानस्ति[44]।

जयकुमाराय उपदेशदानसमयेऽपि मुनिः स्वयोग्यतानुसारेण प्रत्येकपुरुषाय अर्थोपार्जनाय मन्त्रणां दत्तवानस्ति। स्पष्टमस्ति यत् कवेः दृष्टौ प्रत्येकं गृहस्थपुरुषेण स्वावश्यकतापूर्त्तिकृते धनोपार्जनमवश्यमेव करणीयमिति[45]।

उपर्युक्तविवेचनेन इदं सुष्ठुतया ज्ञायते यत् कविना स्वकीयेषु काव्येषु कीदृशाय समाजाय, कीदृश्यै राजनीत्यै, कीदृशाय च अर्थोपार्जनाय मान्यता प्रदत्तास्ति। अहं विश्वसिमि यत् कवेः समाजसम्बन्धे, राजनीतिविषये, अर्थविषये च प्रस्तुतो दृष्टिकोणो वर्त्तमानकाले देशस्य कृते अतीव लाभदायको भविष्यति।

—:०:—

३८. सुदर्शनोदयम्, २/१-३
३९. तदेव, ७/३७
४०. श्रीसमुद्रदत्तचरितम्, ३/१७
४१. दयोदयचम्पूः, ३/नवमश्लोकस्य पश्चाद्वर्त्तिगद्यभागः।
४२. सुदर्शनोदयम्, १/२१

'भाति मे भारत'मितिकाव्ये राष्ट्रियभावना

(डा० हरिनारायणदीक्षितः, संस्कृतविभागाध्यक्षः,
कुमायूं विश्वविद्यालयः, नैनीतालः उ०प्र०)

'भाति मे भारतं' नामेदं काव्यं शतककाव्यं विद्यते। अस्मिन्नष्टोत्तरशतसंख्यकानि पद्यानि सन्ति। अतः इद मम मतेन मालाकाव्यमपि कथयितुं शक्यते; यतो मालायामपि अष्टोत्तरशतसंख्याका मणयो भवन्ति।

अस्य काव्यस्य रचयिता कविवरो डॉ० रमाकान्त शुक्लोऽस्ति, योऽद्यत्वे दिल्लीविश्वविद्यालयीये राजधानी-कालेजे हिन्दीविभागे प्राध्यापकपदमलङ्कुर्वाणोऽस्ति। अस्य काव्यस्य प्रकाशनं 'देववाणी-परिषद्, ६ वाणीविहार, नयी-दिल्ली-११००५९' तः प्रकाश्यमानायाम् 'अर्वाचीनसंस्कृतम्' इत्याख्यायां त्रैमासिक्यां पत्रिकायामैशवीये १९८० तमे वर्षे जातमासीत्। तदनन्तरमिदं काव्यं मनोऽभिरामाकारपृष्ठात्मकस्वतन्त्रपुस्तकरूपेणापि हिन्द्यङ्ग्रेज्यनुवादसहितं प्राकाश्यमायातमस्तीति हर्षविषयः।

अस्मिन् काव्ये कविवरः डॉ० शुक्लः स्वीयस्य भारत-राष्ट्रस्य वैशिष्ट्यानां वर्णनं विधाय भारतीयेषु जनेषु आत्मनिष्ठां राष्ट्राभिमानभावान् प्रोद्दीपयितुम् अचेष्टत। देशवासिषु राष्ट्रप्रेम्णो राष्ट्रियभावनाया वा चेतनामुद्बोधयितुं तेन भारतीयायाः संस्कृतेः विविधेषु समाकर्षकेषु पक्षेषु प्रकाशः पातितोऽस्ति। तदीयं कथनमस्ति यद् भारतमेव एतादृशं राष्ट्रमस्ति यत्र हिंसायामहिंसाया विजयो भवति; आत्मा शरीरबन्धनान्मुक्तिं लभते (पद्यसंख्या, २); वेश-भूषा-

अशन-पान-धर्म-मनोरञ्जन-क्रीडा-रीति-प्रथादिषु वैविध्ये सत्यपि आन्तरिकी एकता विद्यते; वैदिकवाङ्मय-साहित्य-संगीतकलादीनामाराधना भवति; ज्ञानस्य सार्थकता तस्य क्रियात्मकतायामेव मन्यते (प०सं० ५–८); सगुणोपासनायां बलं दीयते (प०सं० २०–२२); प्राच्यविद्यायाः प्रशंसा विधीयते (प० सं० २५-२७); सत्यं शिवं सुन्दरं च समाराध्यते; रामराज्यस्य परिकल्पना क्रियते (प० सं० ६८); रक्तपातं शस्त्रपातं च विनैव राष्ट्रे क्रान्तेः फलवत्यो लहर्यः समुत्थिता भवन्ति; हिंसका नराः निजैर्दुष्कृत्यैः स्वयमेव निस्सत्त्वा भूत्वा नश्यन्ति; साधुजनाश्च सर्वेषु साम्यभावं पश्यन्ति (प० सं० ७४-७५)।

स्वमातृभूमेः भारतभूमेः रमणीयतायाः प्रकाशनेऽपि कविनिष्ठो राष्ट्रप्रेमा राष्ट्राभिमानो वा एव प्रधानो हेतुरस्ति। कवेः कथनमस्ति यत्स्वीयस्यास्य भारतदेशस्य सर्वैरेव भूयसी प्रशंसा विहितास्ति; दानवा इमं बाधितुं नापारयन्; देवा अपि एतस्य आराधनां कुर्वन्ति; सज्जनानां विदुषाञ्च त्वेनत् साधनास्थलमेव विद्यते; मानव-दानव-सज्जन–दुर्जन-धनि–निर्धन-सबल–निर्बलादिभ्यः सर्वेभ्य एव एतत् रोचते (प० सं० ३-४); अनेकैः पावनैस्तीर्थैः, व्रतैरुपवासादिभिश्च इदं राष्ट्रं सदा संशोभितं बोभूयते; चतुर्णामपि धाम्नां सत्तां संरक्षति; पुष्कर-अमृतसरस्-प्रयागादिभिश्च अन्यैरप्यनेकैः दर्शनीयैः स्थलैर्युक्तमस्ति (प० सं० २८-३०); विज्ञानस्य प्रगतौ प्रवीणमस्ति (प० सं० ६३); विश्वे विख्यातमस्ति (प० सं० ६५); परमप्रियमस्ति (प० सं० ६६); स्वाभिमानेन च संयुक्तमस्ति (प० सं० १०६)।

कविना राष्ट्रस्य प्रगतौ प्रसन्नता प्रकटितास्ति। कृषि-क्षेत्राणां सेकार्थं विद्युदुत्पादनार्थं च भाखड़ा-दामोदरघाटी-बाणगङ्गा-फरक्कादिषु स्थानेषु जलबन्धानां फलवतीषु योजनासु तेनाखर्वो गर्वोऽनुभूयते। स्वकीये देशे सम्पद्यमानानां तैलशोधन-इन्धनान्वेषण-इस्पातनिर्माण-कल-निर्माण–औषधालयस्थापना–औषधिनिर्माण--शल्यचिकित्सा-भिनवानुसन्धान--आर्यभट्टरोहिणीभास्कराद्युपग्रहसर्जना-वसु-धान्तर्गताणुविस्फोट–युद्धपोतविमानरेलयानबसादिनिर्माणा-दीनामनेकेषां राष्ट्रियकार्यकलापानां कविना मुक्तकण्ठेन प्रशंसा विहितास्ति (प० सं० ११-१७); स्वराष्ट्रे प्रवहन्तीनां गङ्गा-यमुना-चन्द्रभागा (चिनाब)-विपाशा (व्यास)-नर्मदा-तुङ्गभद्रा-ब्रह्मपुत्र-मन्दाकिनी-गोदावरीप्रभृतीनां नदीनामार्थिकस्य च महिम्नः प्रभावोत्पादकः समुल्लेखो विहितोऽस्ति (प० सं० ६, ११, ३५); हिमालय-विन्ध्याचल-सह्याचल-नीलाचलादीन् गिरीन् प्रति स्वाभिमानात्मिका आत्मीयता प्रकटितास्ति; प्राकृतिकच्छटाया वर्णनं कृतमस्ति (प० सं० १०, ४०-४४); कश्मीरात्प्रभृति कन्याकुमारीपर्यन्तं सर्वेषामेव भारतीयप्रदेशानां गौरवाधायकं संस्मरणं विहितमस्ति; जगद्गुरुशङ्कराचार्य-क्षत्रपतिशिवाजि-स्वामिदयानन्द-स्वामि-विवेकानन्द–गुरुनानक--पण्डितमहामनोमदनमोहनमालवीय–श्रीगोपालकृष्णगोखले-पं० बालगङ्गाधरतिलक-महात्मगान्धि-पं० जवाहरलालनेहरूप्रभृतीन् देशभक्तान् प्रति गौरवात्मकः समादरः प्रकटितोऽस्ति (प० सं० ४७-५५); वेदव्यास-आदि-कविवाल्मीकि–भास–कालिदासादीनां राष्ट्रगायकानां कवीनाम् आत्मगौरवपुरस्सरं समुल्लेखो विहितोऽस्ति; वेद-महा-

भारत-गीता--रामायण-योगवासिष्ठ--रामचरितमानसादीनां भारतराष्ट्रस्य सांस्कृतिकग्रन्थरत्नानां चर्चा कृतास्ति (प०स० २४-२७); अखिलभारतीयेषु च तीर्थेषु पर्वसु च उल्लासपुरस्सरं प्रकाशः पातितोऽस्ति (प० स २८, ३२, ३६-३७)।

स्वदेशस्य राष्ट्रियाणि पर्वाणिप्रति तु कविना भूयानुत्साहः प्रदर्शितोऽस्ति। भारतीयगणतन्त्रदिवसोत्सवमुपलक्ष्यीकृत्य आत्मनिष्ठमुल्लासमभिव्यञ्जता तेन लिखितमस्ति—

जन्वरीमासषड्विंशके वासरे
इण्डियागेटपार्श्वस्थितो दर्शकः।
यस्य शोभाप्रवाहे मुदा मज्जति
भूतले भाति तन्नामकं भारतम्॥
यस्य दिल्लीस्थिते रक्तदुर्गे शुभे
संसदश्चोत्तमाङ्गे त्रिरङ्गध्वजः।
सार्वभौमीं स्वत्तां वदत्युल्लसन्
भूतले भाति तन्नामकं भारतम्॥

(पद्यसंख्या, ५९-६०)

मातृभूमिं भारतभूमिं वैदेशिकशासनपाशात् मोचकान् देशभक्तान् प्रति यदीये हृदये अपारः समादरो वर्त्तते। तस्य सन्देशोऽस्ति यद् राष्ट्ररक्षाहेतवे समरभूमौ शौर्यप्रदर्शका वीराः कदाचिदपि नैव विस्मृतिं नेयाः। स तान् प्रति कृतज्ञतामभिव्यनक्ति। स गर्वमनुभवति यत्तदीये भारते राष्ट्रे एतादृशा अपि राष्ट्रभक्ता वीरा वरीवृत्यन्ते, ये युद्धयज्ञे प्राणैरपि आहुतिं दत्वा राष्ट्रस्य सम्मानं रक्षन्ति (प० सं० ७०-७६)।

कविना भारतीयानां जनानां स्वाभिमानोऽपि प्रशंसावद्भिर्वचनैः प्रकटितोऽस्ति (प० सं० ८५)। अत्र समागत्य

निवसतो विविधर्मावलम्बिनो जनान् आत्मसात्कर्त्तुं भारत-देशस्य राष्ट्रियां क्षमतामपि स महता गौरवेण लिखित-वानस्ति (प० सं० ४६)।

कवेः कथनमस्ति यदनेके देशद्रुह-वञ्चकतस्करादयः आस्माकीनं भारतवर्षं समाप्तं कर्त्तुमैच्छन्; किन्तु कर्त्तुं नापारयन्। यतो हि अस्मदीयो देशः अजरोऽस्ति, अमरोऽस्ति, शाश्वतोऽस्ति, आशावादी चास्ति। अस्माकं सर्वेषामेव इदं परमं कर्त्तव्यमस्ति यद् उत्तिष्ठन्तस्तिष्ठन्तः, चलन्तो भ्रमन्तः, क्रीडन्तः कूर्दन्तः, खादन्तः पिबन्तः सततमेव स्वदेशस्य अभ्युदयहेतवे कामनां कुर्याम (प० सं० १०२-१०४)। कश्चित्कियतीमपि निन्दां कुर्यात्, किन्तु अस्माभिः सर्वदैव स्वदेशस्य वन्दना विधेयाः; तस्य कीर्त्तिर्गेया; तस्य सर्वविधरम्याहेतवे आकाङ्क्षाः विधेयाः; तथा आस्माकीने राष्ट्रे कस्यापि शोषणं न स्यात्; कश्चिद् विपन्नो न स्यात्; कश्चिद् दीन-हीनो न स्यात्; तथा सर्वे प्रसन्नमनसो भवेयुरित्येतदर्थं संकल्पो ग्रहीतव्यः (प० सं० १०७-१०८)।

दृढतापूर्वकं प्ररोचनात्मिकया च रीत्या स्वकीय-राष्ट्रियभावनाया अभिव्यक्तिकरणेन सहैव कविना स्वराष्ट्रस्य विश्वमङ्गलकामनापि प्रकटय्य आत्मनिष्ठा अन्ताराष्ट्रिय-भावनापि प्राकाश्यमानीतास्ति। तस्य कथनमस्ति यद् भारतराष्ट्रं विश्वस्य सर्वैरेव राष्ट्रैः सार्धं बन्धुतायाः भावनां रक्षति; समस्तं संसारम् एकं परिवारमिव मन्यते (प० सं० १); स्वीयैराध्यात्मिकैः सन्देशैः सकलं जगत् सुखितं चिकीर्षति; सर्वेषां दुःखं सुखरूपेण परिणतं चिकीर्षति (प० सं० ८८); सर्वेभ्यश्च राष्ट्रेभ्यो निजं सुखदं

स्नेहं प्रदित्सति (प० सं० ९६)।

येन प्रकारेण कश्चिन्महात्मा अष्टोत्तरशतसंख्यकमणियुतया जपमालया स्वीयाराध्यदेवस्य मन्त्रं जप्त्वा तं प्रसादयितुं समीहते, अहं मन्ये, तेनैव प्रकारेण कविवर डॉ० शुक्लोऽपि अष्टोत्तरशतसंख्यकानि पद्यानि सर्जनापूर्वकं गीत्वा स्वीयं राष्ट्रदेवं प्रीणयितुं कामयते। भारतराष्ट्रस्य यशोगानपुरस्सरमेषा वन्दना भारतीयेषु जनेषु आत्मगौरवात्मिकां राष्ट्रियभावनावश्यमेव प्रोद्दीपयिष्यतीत्यत्र नास्ति कश्चिदपि शङ्कापङ्ककलङ्कलेशावसरः।

—०—

अर्वाचीनसंस्कृतगद्यसमीक्षणम्

(डा० कैलाशनाथ द्विवेदी, डी० लिट्० संस्कृतविभागाध्यक्षः,
जनता स्नातकोत्तर महाविद्यालयः,
अजीतमल (इटावा) उ० प्र०)

संस्कृत-साहित्ये वैदिककालादारभ्याधुनिककालपर्यन्तं गद्यकाव्य - परम्पराऽपि अविच्छिन्नाऽवलोक्यते । संस्कृत-गद्यस्य सुदीर्घपरम्परायामर्वाचीनसंस्कृतगद्यमत्यन्तं समृद्ध-मधोलिखितरूपेऽवाप्यते

१. प्रबन्धकथात्मकं गद्यम्,

२. मुक्तककथात्मकं गद्यम्,

३. चरितप्रधानमाख्यानात्मकं गद्यम्,

४. अनूदितं गद्यम्,

५. प्रकीर्णं (विविधविषयात्मकं) गद्यम् ।

संक्षेपे, समीक्ष्यतेऽस्मिन् शोधपत्रेऽर्वाचीनसंस्कृतगद्य-साहित्यं यथा :-

(१) **प्रबन्धकथात्मकम् गद्यम् :-** अर्वाचीनसंस्कृतगद्य-साहित्यं प्रायः प्रबन्धकथात्मकं (उपन्याससमन्वितं) प्राप्यते । अधोलिखिताः कृतयोऽस्यां विधायां महत्त्वपूर्णाः सन्ति ।

मन्दारमञ्जरी :- अल्मोड़ाजनपदस्य पाटियाग्राम-वासिनः महाकवेः विश्वेश्वरपाण्डेयस्य "मन्दारमञ्जरी" प्रबन्धकथात्मकगद्यसाहित्यस्य प्रतिनिधिरचना कथयितुं शक्यते, किन्तु कादम्बर्याः गद्यशैलीमनुसृत्याऽपि भाषाभावयो-

रियं न तादृशी प्रभावशालिनी विद्यते। यथा-"सरस्वतीवाश्रितचतुरानना, श्रीरिव प्रोल्लसितपद्माकरा, देवसेनेव बहुलपन्याहीं, पौलोमानुभूतशतमखा, लोपामुद्रेव कान्तागस्त्यानवक्षोभवा, रतिरिव पंचबाणसंचरणभूमिः, सीतेवानधिगतयोनिसङ्करा... चे"ति।

मन्दारमञ्जर्यां श्लेषोपमोत्प्रेक्षारूपकाद्यलङ्काराणां बाहुल्येन दीर्घसमासपूर्णदीर्घवाक्ययोजनामध्ये दुर्बलतन्तुमिव कथासूत्रं विलुप्तं भवति। अस्यां कृतौ समसामयिकप्रवृत्तीनामभावो वर्तते, तथाप्यत्र काव्यमयवर्णनानामभावः न विद्यते।

सुशीला :–तमिलनाडुप्रदेशे संस्कृताध्ययनस्य अधोक्षकस्य कृष्णमाचार्यस्य (१८६९–१९२४ ई०)[1] उत्कृष्टा उपन्यासकृतिः "सुशीला" स्वसुबोधभाषाशैल्या स्त्रीः सदाचरणाय शिक्षयति। श्रीकृष्णमाचार्यस्य पातिव्रत्यपाणिग्रहणवररुचिप्रभृतयोऽन्यगद्यकाव्यग्रन्था अपि प्राप्यन्ते। सुशीलायामादर्शहिन्दुनारीजीवनस्य शोभनं चित्रणं हृदयावर्जकं विद्यते।

मन्दारवती :–"रंगनाथाचार्यपुत्रः कविरत्नकृष्णमाचार्यः कादम्बरीशैलीमनुसृत्य अष्टादशप्रकरणेषु मन्दारवतीं विरचितवान्। उपन्यासकृतिरियं तस्य लोकप्रिया रचनाऽस्ति, यस्यां पुरातनतया सार्धमाधुनिकतायाः अपि प्रति-

---

१. द्रष्टव्यम् - "संस्कृत साहित्य का आलोचनात्मक इतिहास" डा० रामजी उपाध्यायः, प्रयागम् पृ० २४६। अर्वाचीन संस्कृत साहित्य - डा० श्रीधरभास्कर वर्णेकरः, नागपुरम् पृ० २०६।

च्छविर्विद्यते । भाषा-शैली कृतेरस्याः अत्यन्तं स्वाभाविकी सुन्दरसालङ्कृतवाक्ययोजनाऽपि सर्वत्र सहृदयमनो हरति । यथा--"अथभगवानम्बरमणिरभूदुदयोन्मुखः । अमाथिषुः कुलायान् पक्षतिविधूननैरुत्पतनोद्यतानि शकुन्तकुलानि । अलमकार्षुर्गृहाङ्गणानि गोमयानुलेपनादिभिः परिचारिकाः । अजृम्भिषत रथ्यासु पांसुक्रीडरतानामर्भकाणां कोलाहलारावाः ।"[2]

जयन्तिका :-विंशशताब्द्यामस्यां कर्णाटकप्रदेशीयः जग्गु अलवारआयंगरः "जयन्तिका" नाम्नीमुपन्यासकृतिं विरचितवान् । जयन्तिकाऽर्वाचीनकथा साहित्ये सर्वथाऽद्वितीया मौलिकी रचना, तथापीयं कादम्बर्याः प्रचुरं प्रभाविता परिलक्ष्यते ।

सौदामिनी :-कर्णाटकप्रदेशीयो नरसिंहाचार्यः विंशशताब्द्याः सुविख्यातः संस्कृतगद्यकाव्यकार आसीत् । सौदामिनी अस्य सुप्रसिद्धोपन्यासकृतिरस्ति, यस्यां कथाकृतौ मगधनरेशस्य शूरसेनस्य विवाहो विदर्भराजकुमार्या सौदामिन्या सह सम्यक्रूपेण वर्णितोऽस्ति । सौदामिन्या अपरः प्रणयी विजयवर्माऽऽसीत्, यः शूरसेनराज्यं विजितवान् किन्तु अन्ते शूरसेनः स्वपराक्रमेण सौदामिन्या सह स्वराज्यमपि लब्धवान् । अस्योपन्यासस्य कथावस्तु अत्यन्तं रोचकं, भाषा-शैली च मनोहारिणी विद्यते ।

कुमिदिनीचन्द्र :-भाषाशैलीदृष्ट्या "कुमुदिनीचन्द्रः" विंशशताब्द्याः सर्वोत्तमोपन्यासकृतिः मन्यते ।

---

२. मन्दारवती, कृष्णमाचार्यः, वाविल्लप्रेस, मद्रास, १९२९, पृ० ३९ ।

मेधाव्रताचार्योऽस्त्यस्याः कृतेः लेखकः। उपन्यासेऽस्मिन् वीरवरकेशरीसिंहस्य पुत्रः चन्द्रसिंहोऽस्ति प्रधाननायकः, नायिका च कुमदिनी अस्ति। केशरीसिंहस्य द्वितीयपुत्रः रणवीरसिंह उपनायकोऽस्ति रत्नाप्रभा चोपनायिका विद्यते। क्रूरसिंहयोगीन्द्रविमलादिपुरुषनारीपात्राणामपिचारुचरित्र-चित्रणमस्यां रचनायां मनोहरमस्ति। षोडशकलासु विभक्तं कथावस्तु वर्तमानयुगीनप्रवृत्तिभ्यः पराङ्मुखीभूत्वाऽपि केवलं व्यंग्यरूपे वर्तमानपरिस्थितीः संकेतयति। कृतौ प्रत्येककलाया प्रारम्भे प्रासंगिकश्लोकबद्धाः सूक्तयोऽपि विराजन्ते। यथा हि -

"मृगेषु मैत्री मुदितात्मदृष्टौ
कृपा मुहुः प्राणिषु दुःखितेषु।
येषां न ते कस्य भवन्ति वन्द्याः
कौशेयकौपीनभृतो मुनीन्द्राः"॥

(कुमुदिनीचन्द्रः, ४)

प्रबन्धकथात्मकगद्यसाहित्ये श्रीमतीराजम्मारचितः चन्द्रमौलिः, श्रीनारायणशास्त्रिखिस्तेमहोदयस्य दिव्य-दृष्टिः,[3] आचार्यश्रीशैलरचिता मेनका, म० म० हरिदास-सिद्धान्तवागीशकृता[4] सरलादिप्रबन्धात्मककथाकृतय उल्ले-खनीयाः सन्ति।

---

३. दिव्यदृष्टिः ना० शा० खिस्ते, मास्टर प्रिण्टिंग प्रेस, वाराणसी, १९३६ अमरभारती-संस्कृतमासिक पत्रिका

४. सरला हरिदाससिद्धान्तवागीशः ४१ देवलेन, कलिकाता १४।

(२) **मुक्तककथात्मकं गद्यम्** :-मुक्तककथात्मकगद्यसाहित्ये ऽनेका कृतयो विद्यन्ते, यास्वधोलिखिता उल्लेखनीयाः सन्ति :

कथामुक्तावली :—अर्वाचीनकालस्य सुप्रसिद्धा संस्कृत-कवयित्री गद्यलेखिका च पण्डिता क्षमाराव्महोदया कथा--मुक्तावल्याः रचयित्री। कथामुक्तावल्याः सरलप्रवाहपूर्ण-गद्ये विरचितानां रोचककथानां संग्रहोऽस्ति । कथापंचक-ग्राम्यज्योतिरन्ये तस्याः सुप्रसिद्धे मुक्तककथाकृती स्तः । रोचकताघटनावैचित्र्यादिदृष्ट्या क्षमारावरचिताः कथाः हिन्दीकथा इव लोकप्रियाः सन्ति ।

कथासंवर्तिका :- भागीरथप्रसादत्रिपाठी "वागीश": संवर्तिकायाः कर्ताऽस्ति। मनोरमभाषाशैल्यां सरसास्त्रयोदश-कथाः विलसन्ति कथासंवर्तिकायां, यासामाधारोऽस्ति दशार्ण-क्षेत्रस्य लोकजीवनम्। इमाः कथा न केवलं बालकेभ्यः रुचिकराः प्रत्युत प्रौढजनेभ्योऽपि शिक्षाप्रदाः सन्ति ।

कौमुदीकथाकल्लोलिनी :- पं० रामशरणत्रिपाठी-रचिताऽस्ति कौमुदीकथाकल्लोलिन्याः यस्यां भारतीय-साहित्यपरम्परा पूर्णतयाऽनुसृता। नरवाहनदत्तस्य सुप्रसिद्ध-कथानां माध्यमेन श्रीत्रिपाठिना काव्यात्मकरूपे लघुकौमुद्याः सूत्राणां संज्ञानप्रदानाय समीचीनः प्रयास कृतः कृतावस्याम्।

शैवलिनी कुमुदिनी च :- बंगलौरस्थसेण्ट्रलमहाविद्या-लयस्य संस्कृतविभागाध्यक्षः चक्रवर्ती राजगोपालाचार्यः शैवलिनीकुमुदिन्यौ कथाकृती विरचितवान्, ययोः ग्राम्य-कथाभिः सार्धं काल्पनिकेतिवृत्तानां विलासो विद्यते। विलास-कुमारीसंगरनाम्न्यौ अपरे गद्यरचनेऽपि तस्य विख्याते वर्तेते ।

इत्थं संस्कृतस्य मुक्तककथात्मकं गद्यमपि पं० शिवदत्त शर्मचतुर्वेदसम्पादिताभिनवकथाकुञ्जादिनानाकृतिभिः पर्याप्तं समृद्धमवलोक्यते ।

(३) चरितप्रधानमाख्यानात्मकं गद्यसाहित्यम् :— प्रबन्धात्मकविधायामपि चरितप्रधानमाख्यानात्मकं गद्य-साहित्यमप्यत्यन्तं समृद्धं संलक्ष्यते, यस्मिन्निम्नलिखितकृतय उल्लेखनीयाः सन्ति ।

श्रीकृष्णाभ्युदयम् :- श्रीशैलदीक्षित -(तिरुमलाचार्य)- प्रणीतं श्रीकृष्णाभ्युदयं गद्यकाव्यं प्रणेतुः प्रतिभायाः श्रेष्ठं निदर्शनमस्ति । द्विभागयोः विरचितेऽस्मिन् गद्यग्रन्थे श्रीकृष्णस्य जीवनचरितं सुन्दरं वर्णितमस्ति । चरितप्रधानेऽस्मिन्नाख्यानग्रन्थे गद्यकाव्यशैली वर्ण्यविषयानुसारिणी अत्यन्तमुदात्ता वर्तते । भारतीविलासः कावेरीगद्यञ्च अन्ये गद्यकाव्यरचने श्रीशैलदीक्षिस्य स्तः[5] ।

उदयनचरितम् :- पञ्चदशाध्यायेषु प्रवाहपूर्णप्रसादगुण-मय्यां भाषायां व्ही० अनन्ताचार्य सुन्दरम् आख्यानम् "उदय-चरितम्" विरचितवान् । ऐतिहासिकपृष्ठभूमाविय गद्य-कृतिः सर्वथा सफलैवाऽस्ति ।

शिवराजविजय :— अर्वाचीनसंस्कृतगद्यसाहित्ये चरित-प्रधानाख्यानात्मककृतिषु रचनेयं मूर्धन्या मन्यते । ऐतिहासिकेऽस्मिन्नुपन्यासे छत्रपतिशिवराजजीवनवृत्तसम्बन्धिकथानकं निपुणतया निबद्धमस्ति । रचयितुरस्य पं० अम्बिकादत्त

---

५. द्रष्टव्यम्-संस्कृतसाहित्य का आलोचनात्मक इतिहास, डा० रामजी उपाध्यायः, प्रयागम्, पृ० २५६ ।

व्यासस्य उत्कृष्टभाषाशैल्याः परिचयः पदे पदेऽस्मिन्नाख्याने प्राप्यते । ओजःपूर्णप्रवाहमय्यां भाषायां पदलालित्यं, संवादसौष्ठवं, परिवेशानुकूलं चारुप्रकृति-चित्रणञ्च सर्वत्र संलक्ष्यते । यथा-"महाराष्ट्रदेशरत्नम्, यवनशोणितपिपासाकुलकृपाणः वीरतासोमन्तिनीसीमन्त सुन्दरसान्द्रसिन्दूर—दानदेदीप्यमानदोर्दण्डः, मुकुटमणिर्महाराष्ट्राणां, भूषणं भटानाम्, निधिर्नीतीनाम्, कुलभवनं कौशलानाम्, पारावारः परमोत्साहानाम्, स्वधर्माऽऽग्रहग्रहग्रहिलः······इति ।[6]

वस्तुतः अभिनवबाणरूपे विख्यातो पं० महाकविव्यासश्छत्रपतेः शिवराजस्य गरिमानये भव्यचरित्र-चित्रणे सर्वथा सफलोऽस्ति ।

लोकमान्यतिलकचरितम् :- लोकमान्यतिलकस्य जन्मशताब्दमहोत्सवावसरे १९५६ ई० वर्षे श्रीकृष्णवामनचितलेमहोदयोऽष्टादशपर्वसु लोकमान्यतिलकचरितम् सरलप्रवाहपूर्णललितभाषायां लिखितवान् । लेखकस्य भाषासारल्यस्य निदर्शनं प्रस्तुतेऽवतरणेऽत्रलोकनोयम्—

"जलसन्तरणमेतेषामतीव प्रमोदायाऽभवत् । ...वाराणसीक्षेत्रे परमपवित्रभागीरथ्याः विस्तीर्णप्रवाहो लोकमान्यैः सुखेनोत्तीर्ण इति बहुभिर्जनैः कथ्यते ।"[7]

लेखकः श्रीचितलेमहाशयो; लोकमान्यतिलकस्य जन्मनः मृत्युपर्यन्तमैतिहासिकं साङ्गोपाङ्ग जीवनमस्यां कृतौ वस्तुतः

---

६. शिवराजविजयः, पं० अम्बिकादत्त व्यासः, वाराणसी, १९६९, पृ० ३०१ ।

७. लोकमान्यतिलकचरितम्, चितले, सुबोध संस्कृत-लोकमान्य तिलक चरित प्रकाशन, बम्बई ।

चित्रीकर्तुं सफलोऽस्ति ।

चरितप्रधानेष्वाख्यानात्मकगद्यग्रन्थेषु डा० रामजी उपाध्यायरचिता "द्वासुपर्णा" (यस्यां ग्राम्यजीवनाधारिता-कृष्णसुदाम्नोः पौराणिकी कथाऽभिनवरूपे प्रस्तुताऽस्ति) श्रीनारायणशास्त्रिखिस्तेविरचितं विद्वच्चरितपञ्चकम्, आचार्यशेषशायीकृतमष्टावक्रीयम् भगवताचार्य - चारुदेव-शास्त्रिप्रणीते गान्धिरचरिते इमा गद्यकृतयो महत्त्वपूर्णा (उल्लेखनीया) सन्ति, यासु सरल-सरलं प्रसादात्मकं प्रवाह-पूर्णं च संस्कृतं प्रयुक्तमस्ति ।

(४) **अनूदितं गद्यसाहित्यम्** :-भारतीयाभारतीयभाषा-भ्योऽनूदितं गद्यसाहित्यमपि विद्यते ।

विभिन्नभाषाभ्योऽधोलिखिता अनूदिताः कृतय उल्लेखनीयाः सन्ति :—

लावण्यमयी :-श्रीमदप्पयशास्त्री सूनृतवादि-संस्कृतपत्रं संपादयित्वा बंकिमचन्द्रस्य लावण्यमयीति नाम्नः बंगलोपन्या-सस्य सरलसंस्कृते रोचकं रूपान्तरणं कृतवान् ।

संसारचक्रम् :— मंजुभाषिणीपत्रिकायाः सम्पादकोः, रामानुजमतानुयायी अनन्ताचार्यः जगन्नाथप्रसादरचितस्य हिन्द्याः उपन्यासस्य संसारचक्रे सरलानुवादं कृतवान् ।

अनूदितगद्यसाहित्ये श्री शैलताताचार्येण संस्कृतरूपा-न्तरिते रचने बंगलोपन्यासदुर्गेशनन्दिनीक्षत्रियरमणी च श्री हरिचरणरूपान्तरिता बंकिमचन्द्रस्योपन्यासकृतिः कपाल-कुण्डला, सोमयाज्यनूदिता टालस्टायकृतिः "कणः लुप्तः गृहं दहति" प्रभृतयः कृतयः महत्त्वपूर्णाः सन्ति ।

(५) **प्रकीर्णं (विविध विषयात्मकं) गद्यसाहित्यम्** :-

अर्वाचीनं प्रकीर्णं विविधविषयात्मकं गद्यसाहित्यमत्यन्तं समृद्धं वर्तते, यस्मिन् धार्मिक-सामाजिक सांस्कृतिक-वैज्ञानिक - साहित्यिकयात्रावृत्तादिसम्बन्धित्रिविधविषयकाः गद्य-ग्रन्था उपलभ्यन्ते । विधायामस्यामधोल्लिखिताः कृतय उल्लेखनीयाः सन्ति—

प्रबन्धमञ्जरी :-पं० हृषीकेशभट्टाचार्योऽर्वाचीनसंस्कृतगद्यलेखकेषु सुप्रसिद्धोऽस्ति । प्रबन्धमंजरी महत्त्वपूर्णा रचनाऽस्य, यामभिलक्ष्य साहित्यमर्मज्ञा इमां "सकलरसपरम्परातरङ्गितानां संग्रहश्चेति" उक्तवन्तः प्रबन्धमञ्जर्याः प्रांजलप्रवाहपूर्णभाषाया उदाहरणं प्रस्तूयतेऽस्मिन् गद्यावतरणे—

"भीषणभस्मच्छुरितजटाजूटघटित सरसकुसुमस्तबकशोभिस्निग्धधम्मिलक्षोभोद्भासित भयङ्कराशीविषघटिताधंमौक्तिकसरसमुज्ज्वलं, क्षौमाच्छादितावयवमर्धनारीश्वररूपं हि केवलं संस्कृतभाषायामेवाविर्भावितमस्ति ।"[८]

सेतुयात्रावर्णनम् :-यात्रावृत्तसाहित्येऽत्यन्तं महत्त्वपूर्णं "सेतुयात्रावर्णनम्" त्रिवेन्द्रस्य स्व०टी०के० गणपतिशास्त्रीणा पाण्डित्यपूर्णं सरलं यात्रावर्णनं लिखितवान् ।

श्रीशैलदीक्षितेन (तिरुमलाचार्येण) कावेरीगद्येऽपि कुर्गप्रदेशीयतलिकावेरीनाम्नः तीर्थस्य यात्रावर्णनं कृतम् । श्रीकृष्णोपाध्यायप्रणीतकवीन्द्रचन्द्रोदयः गद्यग्रन्थः उत्तमकोटिकोऽस्ति, यस्मिन् शाहजहाँकालिकानां विदुषां प्रशस्तीनां

---

८. प्रबन्धमञ्जरी, हृषीकेशभट्टाचार्यः (संस्कृतभाषायाः वैशिष्ट्यम्) काव्यकुटीर - कार्यालयः, चांदपुर (बिजनौर) पृ० २०७ ।

सङ्कलनमस्ति, या: कवीन्द्राचार्याय समर्पिता आसन्। संस्कृत-गद्ये इतिहासलेखने म०म० पं० रामवतारशर्मा सुप्रसिद्धो-ऽस्ति। अस्यां विधायां स: "भारतानुवर्णनम्" सरलललित-संस्कृतभाषायां विरचितवान्।

श्रीद्विजेन्द्रनाथशास्त्रि[9] हंसराजअग्रवाल[10] प्रभृति-विद्भि: संस्कृतसाहित्येतिहासग्रन्था: सरससंस्कृतभाषा-यामेव प्रस्तुता: सन्ति।

संस्कृतगद्यस्य नवीनविधायां समीक्षात्मकनिबन्धानां प्रणेतृरूपे म० म० पं गिरिधरशर्मण: महत्त्वपूर्णं स्थानं विद्यते। चतुर्वेदसंस्कृतरचनावलि: (द्विभागात्मिका रचना) वैदिक-पौराणिक-भाषाशास्त्रीय-धर्मशास्त्रीय-काव्य-शास्त्रीय पुरातत्त्वशास्त्रीय–दार्शनिकादिविविधविषयकान् निबन्धान् प्रस्तौति। गीतापुराणसमीक्षा तेन "पुराणपारिजाते" ग्रन्थे कृता।

अर्वाचीनसंस्कृतगद्यलेखकेषु विविधविषयसम्बन्धि-संस्कृतनिबन्धकाररूपे प्रबन्धप्रकाशकार: डॉ० मङ्गलदेव शास्त्री, प्रस्तावतरङ्गिणीकार: पं० चारुदेवशास्त्री 'भारतस्य [11]सांस्कृतिकनिधि'-'महाकविकालिदास'-'संस्कृतनिबन्धावलि'

---

९. संस्कृतसाहित्यविमर्श:, द्विजेन्द्रनाथशास्त्री, १९५६ पृ० ६८०।

१०. संस्कृतसाहित्येतिहास:, (द्विभागात्मक:), हंसराज अग्रवाल: फीरोजपुरम् १९५१

११. ग्रन्थोऽयं १९५९ ई० वर्षे उ० प्र० शासनेन पुरस्कृत: (प्राप्तिस्थानम् सागरिका-समिति:, सागरम्)

प्रभृतिग्रन्थानां कर्त्ता डा० रामजी उपाध्यायः 'मानवशिल्पी कालिदासा[12] दिग्रन्थानां रचयिता डॉ० रेवाप्रसादद्विवेदी निबन्धवैभवस्य लेखकः आचार्यकेशवदेवशुक्लः संस्कृतनिबन्ध-शतककारः डा० कपिलदेव द्विवेदी, संस्कृतनिबन्धाञ्जलिकारः डॉ० रामकृष्ण आचार्यः, संस्कृतनिबन्धनवनीतकारः डॉ० पारसनाथ द्विवेदी, संस्कृत-निबन्धादर्शकारः डॉ० राममूर्ति शर्मा, कालिदासीय-निबन्धनिचयकर्ता डॉ कैलाशनाथ द्विवेदी, प्रबन्ध-रत्नाकररचयिता डा० रमेशचन्द्रशुक्लः डा० शिवप्रसादभारद्वाजः डा० वासुदेवकृष्णचतुर्वेदप्रभृत्यनेके संस्कृतगद्यलेखका उल्लेखनीयाः सन्ति ।

आधुनिक संस्कृतगद्यसाहित्यं सम्वर्धयन्त्यः संस्कृत-पत्र-पत्रिका अपि संलक्ष्यन्ते । अस्यां दिशि भवितव्यम् (नागपुरम्), गाण्डीवम् (वाराणसी) संगमनी (प्रयागम्), सागरिका (सागरम्), अजस्रा, ऋतम् (लक्ष्मणपुरम्) सारस्वतीसुषमा (वाराणसी), संस्कृत-विमर्शः, संस्कृत प्रतिभा (दिल्ली) शारदा (बम्बई), गुरुकुलपत्रिका (हरि-द्वारम्) दिव्यज्योतिः (शिमला), भारती (जयपुरम्) अर्वा-चीनसंस्कृतम् (दिल्ली) प्रभृतिपत्रिकासु संस्कृतगद्यं समालो-चनात्मकरूपेऽत्यन्तं समृद्धं संदृश्यते ।

समीक्षा :-अर्वाचीनसंस्कृतगद्यसाहित्यस्य उपर्युक्त-विवेचनेन कथयितुं शक्यते, प्राचीनसंस्कृतगद्यकाव्यमिव

---

१२. सागरिका-समितिः, सागरविश्वविद्यालयः, सागरम् (कालिदासविशेषाङ्करूपे सागरिकायां प्रकाशितम् ।

१३. संस्कृतसाहित्येतिहासः (द्वितीयो भागः), हंसराज अग्रवालः फीरोजपुरम्, १९५१, पृ० १० ।

अस्मिन्नङ्कारवर्णनैर्जटिलता दुरूहता वा नावाप्यते, अपि-त्वस्मिन् सरलप्रसादपूर्णभाषायां प्रवहमाना कथाकल्लोलिनी स्वाभाविकी समुल्लसति । ग्रीकगद्यकाव्यप्राचीनभारतीय-गद्यकाव्ययोरिव अर्वाचीनसंस्कृतगद्यसाहित्येऽपि नगरवर्णनं, प्रकृति-चित्रणं, अङ्गनाङ्गसौन्दर्यवर्णनं, पशुपक्षिवाद-फलतामयसंसारस्य रागविरागमयव्यवहारस्य च चित्रणं दृश्यते । उभयोः साम्यमवलोक्य पीटरसनमहोदयेन "भारतीयगद्यकाव्यं ग्रीकगद्यकाव्यस्य अधमर्णम्[13] इति यत् कल्पितं तत् नितान्तं निराधारमस्ति ।

प्राचीनगद्यस्य अपेक्षयाऽर्वाचीनगद्ये विविधविधाः विद्यन्ते, यासु प्राचीनगद्यकवीनां मध्ये महाकवेः सुबन्धोर्न तादृशः प्रभावः परिलक्ष्यते, यादृश दण्डिबाणयोः प्रभावः । बाणभट्टस्य प्रभावस्तु विश्वेश्वरपाण्डेय-कृष्णाचार्य-शैल दीक्षिताऽम्बिकादत्तव्यासादिलेखकानां गद्यसाहित्येऽत्यधिकं विद्यते, येनानुप्राणितं युगानुसारिणोऽस्य (संस्कृत-गद्यस्य) भविष्यत् सर्वथा सम्मुज्ज्वलमेव संलक्ष्यते इति ।

—०—

कतिपया उल्लेखनीया अर्वाचीन-संस्कृतरचनाः

कापिशायनी

रचयिता-डा० जगन्नाथ पाठकः। **प्रकाशकः**-डा० गयाचरण त्रिपाठी, प्राचार्यः, गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्, मोतीलालनेहरू पार्कः, इलाहाबादः २। **प्रकाशनवर्षम्**-१९८० ई०। **पृष्ठसंख्या** २०+१०४=१२४।

रचनेयमस्मिन्वर्षे 'साहित्य-अकादम्या' पुरस्कृता। मुक्तककाव्यरूपेयं रचना विविधभावोपेता, सरसा माधुर्यप्रसादगुणोपेता च। कापिशायनी, प्रकीर्णकम्, समस्यापूर्तयः, कालिदासप्रशस्तयः, मैथिलकोकिलविद्यापतिप्रशस्तयः, भारतशार्दूलविक्रीडितम्, गजलगीतानि, यवनिका, शलभदीपशिखम्, रुबाईगीतानि समाप्तिपद्यानि चेत्येतेषु एकादशशीर्षकेषु ७०८ मुक्तकानि सङ्कलितानि। पण्डितराजजगन्नाथविषयकं **'यवनिकेति'** खण्डकाव्यमपि मुक्तकच्छटां बिभर्ति।। एकैकं पद्यं कवेर्भाषायाः समासशक्तेः कल्पनायाः समाहारशक्तेश्च परिचायकम्।

इमां कृतिमवलम्ब्य विस्तरशस्तु पुनः कदाचिद्विचारः करिष्यते, अत्र केवलं सहृदयानां मनोमोदाय कानिचित् पद्यानि स्थालीपुलाकन्यायेन प्रस्तूयन्ते।

चषका इह जीवने मया परिपीता अपि चूर्णिता अपि ।
मदमेष बिभर्मि केवलं क्षणपीतस्य मधुस्मितस्य ते ।।
(कापिशायनी, २)

वंशं पृच्छ धनञ्च पृच्छ सुतरां विद्यामितः पृच्छ वा
यत्किञ्चिन्मयि तद् वदामि न ततः सङ्कोचलेशो मयि ।
किन्त्वेतत्परिपीडितं नु हृदयं लब्धं मयाहो कुतो,
मित्रैतत्कृपया न पृच्छ शतशः प्राणैरिदं रक्षितम् ।।
(प्रकीर्णकम्, ३३)

न येन पठित मुदा सुकविवाङ्मयं शोभनं
न येन शिथिलीकृतः प्रियकलत्रमानग्रहः ।
न येन च निषेविताऽनवरतं सतां संगति–
न तेन बत चेष्टितं करपुटेन पातुं सुधाम् ।।
(समस्यापूर्तयः, ३१)

यद्भोजेन्द्रसभासु विक्रमनृपस्यान्तःपुरे यच्च वा
सिद्धं श्रीकलितं बभूव नहि तन्मन्यामहे संस्कृतम् ।
यत्तु प्रीतिविशालहृत्सुमनसां क्षुत्पीडितान्तजुषां
क्षुद्रे पर्णगृहे फलान्वितमभूत्तन्मन्यते संस्कृतम् ।।
(समस्यापूर्तयः, ४७)

भुवने यदि दुर्लभं नरत्वं
बत विद्या बहु तत्र दुर्लभाऽस्ते ।
अतिदुर्लभमेव सत्कवित्वं
भुवि तत्रापि सुदुर्लभैव शक्तिः ।। (यवनिका, ६२)

कापिशायन्याः को नामाधिकारी ? इति प्रश्नस्योत्तरं कवेरेव शब्देषु निभाल्यताम्—

कस्मै समर्प्य हृदि तोषमवाप्नुयां नो
जाने कृतिं बत तथापि मनस्युदेति।
येषां नु चित्तमिह नाम रमेत किञ्चित्
सर्वात्मना सुमनसोऽधिकृतास्त एव ॥

(गजलगीतानि, अन्तिमं पद्यम्)

डा० जगन्नाथपाठकमहाभागा अस्या कृते रचनायै भूयो भूयोऽभिवर्धाप्यन्ते।

चाङ्गेरिका (मुक्तकरचना)

(रचयिता-श्री उमाकान्तशुक्लः। प्रकाशकः सुधा-कमलग्रन्थालयः, २६४ उत्तरी गाँधी कालोनी, मुजफ्फरनगरम् (उ० प्र०)। प्रकाशनवर्षम्- १९८०। मूल्यम् १०.०० रूप्य-काणि)

'चाङ्गेरिके'त्येभिधानेन १०३ संख्यकानां मुक्तकाना-मुपढौकनं साहित्यिकानां करकञ्जेषु कुर्वता कविना श्रम-संस्कृत - भारत - रचना - वीर-काव्योपनिषदौचित्य-वाणी-काव्यपाठ-काव्यलाभ-काव्योपनिष-दौचित्य-वाणी-काव्यपाठ-काव्यलाभ – काव्योत्स–काव्यप्रवृत्ति - वक्रिमान्योक्तिप्रशंसा-न्योक्त्युल्लेख-मशकेक्षु-कूलङ्कषा-तडाग-धरा-खद्योत-हिमालय-कारण्डव-प्रभञ्जन चन्द्र-काक-विषवृक्ष-हरिण- गुञ्जन-वायु-पेचक-जलद - सिन्धु-चञ्चा-मृगी-गुञ्जा–प्रतोली–कपर्दिका-हिमांशु-सूर्यकान्ति–कठिनो-कालकूट - शिव-मुरारि-चाटूक्ति-निपात - परिश्रम - अनिवार्यवस्तु - लोकतन्त्र- जनतन्त्र-खल-नाटकालङ्कारार्थ - युद्धशास्त्रसंग्रह-बुभुक्षा - दैवत - धर्म-समु-न्नति-सन्तोष-गृह-वैचित्र्य-शिक्षा-दुष्ट-गृहस्थाश्रम-षाड्गुण्य–सौन्दर्य - सौख्यास्पद - विरति-मदिरा - संस्कृतवागादिविषये

सहृदयहृदयावर्जका भावा उपन्यस्ताः। कवेर्व्यञ्जनाशैलो अवलोकनीयास्ति। 'चाङ्गेरिका'-पद्येषु कवेर्युगबोधो गभीरो जीवनानुभवश्च साक्षात्कर्तुं शक्येते।

'चाङ्गेरिका' इति पदस्य प्रयोगः सुमनोवर्णकावापोद्वापकर्मणि प्रयुक्तस्य वंशादेर्निर्मितपात्रविशेषस्यार्थे कृतः। कविः कामयते—

एलालवङ्गसुमनोमकरन्दकान्ते !
चाङ्गेरिके ! वितर सौरभसञ्चयं स्वम्।
पर्याप्तमेतदपि यद् धृतपद्मकोश—
स्त्वां ध्यायति द्रवति कोऽपि युवा मिलिन्दः॥
(चाङ्गेरिका, १०३)

सहृदयानां मनोमोदाय दिङ्मात्रं चाङ्गेरिका-सौरभं वितीर्यते। कविर्हिमांशुमभिलक्ष्य कथयति—

अहो हिमांशो ! तव पक्षपात-
प्रवृत्तिमेतां न समर्थयामः।
विहायकासासारशतं यदेकं
समुद्रमेवोत्तरलीकरोषि॥ (चाङ्गेरिका, ३९)

कठिनीं प्रति कवेः कथनं कथं मर्म स्पृशतीति द्रष्टव्यम्-

कठिनिके ! रसिके गुणिनां प्रिये !
विलिख नामशतानि न वारये।
अपचयं परियास्यसि कोऽपि ते
न भुवने बत नाम रटिष्यति।
(चाङ्गेरिका, ४१)

विश्वभानुः (महाकाव्यम्)

रचयिता प्रकाशकश्च :-डा० पुतिल्लतु कृष्ण नारायण पिल्लै, जयविहारः, जगती, त्रिवेन्द्रम् (तिरुअनन्तपुरम्)। **प्रकाशनवर्षम्** १९७९-८०। मूल्यम् ७५-०० रूप्यकाणि।

उत्तरप्रदेशसंस्कृताकादम्या कालिदासपुरस्कारेण सम्मानितमिदं महाकाव्यं स्वामिविवेकानन्दस्य जीनवचरितं मनोरमया शैल्या प्रस्तौति। अत्र एकविंशतिसर्गेषु अनुष्टुबुपजातिवंशस्थवियोगिनीपुष्पिताग्रावसन्ततिलकापृथ्वीसमाख्यैः सप्तभिर्वृत्तै ५५५ पद्यानि रचितानि वर्तन्ते। स्वामिविवेकानन्दं विश्वभानुरूपेण वर्णयन् कविः कथयति—

निरस्तनिखिलध्वान्तः प्रधावितसुधाकरः ।
परमार्जिततारौघः प्रोद्भासितदिगन्तरः ॥
अमन्दं नन्दयन् सर्वान् अनन्तमहसा भृशम् ।
चकाशे विश्वभानुः स जगतां भव्यसम्पदे ॥

(विश्वभानुः, १६/४९-५०)

स्वामिविवेकानन्दमवलम्ब्य संस्कृते अनेके ग्रन्था विरचिताः सन्ति, येषु डा० श्रीधरभास्करवर्णेकरविरचितं 'विवेकानन्दविजयं' (महानाटकम्), डा० गजाननबालकृष्णपलसुलेकृत 'विवेकानन्दचरितम्' भण्डारकरोपाह्वश्री त्र्यम्बकशर्मविरचितं 'श्रीस्वामिविवेकानन्दचरितम्' नाम महाकाव्यमित्येवमादयः प्रकाशिताः सन्ति। इदानीं च डा० पी० के० नारायणपिल्लेरचितस्य विश्वभानोः प्रकाशनेन विवेकानन्दपरकसंस्कृतग्रन्थानां शृंखला परिवृद्धिं गता। काश्चन अप्रकाशिता रचना अपि अवश्यं स्युः।

यदि कश्चित्साहित्यशोधार्थी एतेषां ग्रन्थानां तुलनात्म-

कमध्ययनं कुर्यात्तदा संस्कृतसाहित्यजगतः श्रीवृद्धिः स्यात्। डा० पिल्लैमहाभागाः स्वकृतये वर्द्धाप्यन्ते।

सुरवाग्विलापम्

रचयिता प्रकाशकश्च - डा० दीपक घोषः, ८२३ जैस्सौर रोड, ग्रीनपार्क (शारदापल्ली), कलकत्ता - ७०००५५ **प्रकाशनवर्षम्**-१९८०। **मूल्यम्** - २.०० रूप्यके।

अस्मिन् लघुकाव्ये एकत्रिंशदनुष्टुब्वृत्तैः कविना भारतस्य केषुचन स्थानेषु विशेषत्तो बङ्गदेशे वर्तमानयुगे संस्कृतस्योपेक्षामभिलक्ष्य पद्यरचना कृता। एकस्यां रात्रौ सुरवाक् (संस्कृतवाक्) कविसकाशे समागत्य स्वीयं कष्टमभिव्यनक्ति :-

ममोत्सवो भारतवर्षभूमौ
सर्वत्र पूजा भविता मम श्वः
तथापि तृप्तेः कणिकापि नास्ते
प्रभूतखेदैरभिभूतचित्ते। (५)

× × ×

स्वाधीनतयाः परमप्यनेकं
दिन गतं मे प्रियभारतेऽस्मिन्।
प्रशासकानां बहुनीतिकौशलात्
पुरातनं नागतमेव गौरवम्॥ (१४)

दुःशासनैस्तैर्नववङ्गकारैः
पुनः पुनर्वङ्गभुवां नृशंसम्।
केशेषु धृत्वा पदताडितास्मि
नग्नीकृता पाण्डववल्लभेव॥ (१७)

भक्तेषु को मे नु पुमान् बलिष्ठो
विराजते भारतवर्षराज्ये ?
दुःशासनानामिह वज्रमुष्ट्याः
शक्नोति मां त्रातुमहो न वेद्मि ॥ (१८)

× × ×

शपामि सत्येन ममापमाने
सतीव विच्छिन्नतनुर्भवेद्धि ।
सहस्रधा भारतवर्षभूमि-
रनेकभाषेति न संशयोऽत्र ॥ (२७)
धिग् राजनीतिं कुटिलां जघन्यां
बङ्गस्य केन्द्रस्य च नायकानाम् ।
धुरन्धराणामतिदुर्मतीनां
यच्चक्रपिष्टास्थिशरीरकाहम् (२८)

काव्यस्यास्य प्रो० सीतांशुमित्रकृत आंग्लभाषानुवादोऽपि मूलस्याग्रे दत्तोऽस्ति । मन्येऽसंस्कृतज्ञा अपि अस्य काव्यस्य भावराशिना परिचिता भविष्यन्ति ।

करडीशचरितामृतचम्पूप्रबन्धः

(रचयिता-कन्दगल्लपर्वतसुधीकविः । सम्पादकः-डा० गुरुसिद्धदेवशिवाचार्यः । प्रकाशकः-श्रीजगद्गुरु-गङ्गाधर-धर्मप्रचारक-मण्डलम्, मुरुसाविर-मठः, हुब्बली-५८००२० । प्रथमसंस्करणम् १९८० ई० । मूल्यम्-पञ्चविंशति रूप्यकाणि रु० २५.००)

कन्दगल्ल-पर्वतसुधीकविः षोडशाधिकैकोनविंशतिशततमे (१९१७) ईशवीयेऽब्दे 'करडीशचरितामृतचम्पूप्रबन्धं' व्यरचयत् । तस्य सम्पादनं डा० गुरुसिद्धदेवशिवाचार्येण

कृतम् । ७० पृष्ठात्मकभूमिकायां सम्पादकेन कवयितुः, काव्यस्य च विस्तृतः परिचयो दत्तः । तदनु २०८ पृष्ठेषु मूल-ग्रन्थोऽस्ति ।

'नवस्तबकान्विते प्रस्तुतचम्पूप्रबन्धे ग्रन्थेऽस्मिन् चरित्र-नायको हि बल्लारी-वासी सक्करीत्युपपदभूषितः करडीशो हि धर्मप्राणोऽर्वाचीनः शिवशरणः । शरण-सक्करी-करडीश-स्यास्य बाल्यनाम तु 'बसव' इति ज्ञायते । अयम् अष्टावरण-षट्स्थल-पञ्चाचारपरायणो भूत्वा धार्मिक-सामाजिक-साहित्यिक - सांस्कृतिक-नैतिक–प्रभृतिमानवतोद्धार - विषये नवजागृर्ति प्रोत्साहयन् एकोनविंशशतमानेऽपि द्वादशशत-मानकालीन-कल्याण-बसवेश्वरवत् बल्लारीप्रदेशे सहस्र-सहस्रशो जनानां जीवनमुज्जीवयन् सञ्जीवयन् समञ्जसं शरणजीवनमन्वजीवत् सः शरणाग्रगण्यः । तत्प्रशंसार्हस्य **करडीश्वरस्य चित्रं चरित्रमनूनं प्राह'** कविः ।' (सम्पादक-वचनम्, ११)

करडीशेन वीरशैवसंस्कृते संस्कार-साहित्य–सङ्गीत-सम्प्रदाय-कला-विधि-विधानादीनां प्रोज्जीवनार्थं 'श्रीगुरु-**निवाससंस्कृतपाठशाला**' अपि स्थापिता यस्यां चम्पूप्रबन्ध-कर्त्ता अपि विद्याध्ययनं कृतवान् । तद्रचिताश्चतुर्विशति-संख्याकाः संस्कृतरचनाः सम्प्राप्यन्ते ।

करडीशचरितामृतचम्पूप्रबन्धे अर्थगाम्भीर्यम्, अलङ्कार-योजना, गुण-रीति-छन्दोविलासः, तत्त्वसिद्धान्तसौन्दर्यं, हृद्यवर्णननैपुण्यम् अन्यच्च तत्तत् संवेदनाशिल्पसम्बन्धि काव्यसौन्दर्यं सहृदयैः साक्षात्कर्तुं शक्यन्ते । विचित्रमार्गा-नुयायिनोऽस्मिन् काव्ये सर्वतोभद्र-द्व्यक्षर-गोमूत्रिकादिबन्धा-

नपि यथेच्छं द्रष्टुं शक्नुवन्ति यथा---

१. नामाजराराजमाना मारमाररमारमा ।
जमारसासारमाज रारसाररसाररा । (२/२७)

२. कालकालालकालीकलिकालोककुलाकुला ।
कालकाललल्लीलालोलाकूलकला किल ।। (५/१३)

३. नीलाम्बिकार्यरागास्यात् । तुङ्गाद्गङ्गालसद्धिया ।
नीलालकाभिरामास्या । रङ्गत्तुङ्गातिसन्नया ।।
(५/१५)

सरलसुभाषितं दिङ्मात्रं प्रस्तूयते--

सम्पदि विपदि च तोषः
शोषः संलगति जगति महतां न ।
प्रावृषि घने प्रवर्षति
रवौ तपे तपति चैकधा शरधिः ।।
(६/१८)

दीर्घसमासगद्यच्छटां दिङ्मात्रमवलोकयन्तु विपश्चित्तल्लजाः, यत्र हि विपुला सांस्कृतिकसामग्री तथा च कवेर्गद्यरचनापाटवं साक्षात्कर्तुं शक्यते :-

"अथ, नीलाम्बा बसवलिङ्गाम्बाऽनुमतिमनुसृत्य, शूराः पौरा बन्धवः सुगुण-सिन्धवः सकलभक्ताः सुमति-युक्ताः पण्डिताः सुपथमण्डिताः शराहितकराः सर्वे सम्भूय, प्राड्विवाकादि-राजकीय-महाऽधिकृतैः समालोच्य, तत् करडीशनियोगाऽनुसारं श्रीमन्मरिस्वामिमठे तद्योगीन्द्र-समाधिपुरोऽङ्गणप्रदेशे भस्म-घुटिका-निक्षेपमण्डप-पश्चाद्भागे समाधिं विधिवद् विरचय्य, सम्यग् विलेपन-रङ्गवल्ली-प्रसव-स्रक्-प्रणव-स्थापनादिभिरलङ्कृत्य, विमानसमानमपि

समानं, भू-रञ्जितमपि व्योम-यान-नामाऽङ्कितम्, विविध-नवीन - चीनचेलाऽतुल - मणिमौक्तिकमाला-विलोकयज्जन-विलोचन-निगलायमान-सौन्दर्य-मञ्जुल-सालभञ्जिका-पुञ्ज-भ्रमन्मम्ब-गुञ्ज - चञ्चरीकसञ्चय - चञ्चत्पुष्परस-पराग-परीत - विकच - विविध-कुसुम-मालादि-सुरुचिर-वस्तुजालैः परिष्कृत्य, विचित्रतरं विरचय्य, त्र्यम्बक-सभेन निज-मित्र-परमेश्वर-भक्त-प्रेम्णा महोत्सवाय प्रेषित-स्व-पुष्पकमिव रञ्जितं तन्माङ्गल्य-निकायं कायमुपनीय, तदानीं महाक्षेत्र-रथोत्सव-यात्रायै यथा तथा समागमिष्यत् सविध-विविध पुरजनैः पुराऽन्तर्वीथी हर्म्योपशल्य-प्रदेशे निरवकाशे विमानं समया समयोचित-स्नानपवित्र-गात्रैः पण्डित-मण्डलैः परि-शुद्धभक्त - माहेश्वर-समूह - परिवृत - परितः परिपठ्यमान-निगमाऽऽगम-मन्त्रघोषैः तत्पुरादेशे निष्कोशाऽयुध-कलित-कराऽश्ववार—चमू-समूह—समावृताऽक्षदर्शकादि - महाऽधिकृत-निवहनीयाऽमित-स्व-कुलीन-जनता ताड्यद्हृद्य-ध्वनद्-वाद्य-प्रतान-मधुरतरतारैः, तदग्र-देशे समुद्घुष्यत् काहली-पटह-भेरी-मड्डु-डिण्डिम - झर्झरादि-वाद्य-निवह-निनादैः बधिरी-कृत - दिक्करि - निकर - कर्णकुहरम् इत्थं जृम्भत् सम्भृत-सम्भ्रमैः प्रतोल्यां महोत्सवं कृत्वा, विमानं समाधिसमीपम् आनीय, तत्रत्य-पवित्रगात्रम्, आदाय, तत्र समाधौ विधि-वन्निक्षिप्य, तन्नियोग-प्रकारं नानाविध-दानैः सर्वान् आनन्द-यन्तः सम्यक् समाधिक्रियां वीरशैव-सद्धर्म-कलया सकल-याऽऽतुलयाऽऽकलयामासुः" (६/२४५)

विंशशताब्द्या आरम्भे रचितस्य प्रौढिप्रकर्षालङ्कृत-स्यास्य **करडीशचरितामृतचम्पूप्रबन्धस्य** विषये केनचित्

शोधार्थिना यदि शोधः क्रियेत तर्हि संस्कृत-साहित्यस्य महती सपर्या स्यात्। यदि कश्चिट्टीकाकारोऽस्य ग्रन्थस्य टीका-कर्मणि प्रवृत्तः स्यात्तदा प्रकृतिपेलवानां पाठकानां कृतेऽप्युपकारो भवेत्। सस्कृतस्य शुद्धं मुद्रणमद्यत्वे दुर्लभमेव भवति। अतो मुद्रणगताशुद्धयः प्रायः सर्वष्वपि ग्रन्थेषु न्यूनाधिकतया भवन्त्येव। तथापि आगामिनि संस्करणे शुद्धतरं मुद्रणं यद्यस्य ग्रन्थस्य सम्पद्येत तर्हि सुवर्णसौगन्धसंयोगः स्यात्। लेखकः, सम्पादकः प्रकाशकश्च एतत्कृत्यै वर्धापनोया अभिनन्दनोयाश्च सन्ति।

संस्कृतगीतमालिका

(रचयित्री-डा० मनोरमा। प्रकाशिका-भारतोयसंस्कृति-संस्थान-महिलाशाखा, कैमरन रोड, लखनऊ। प्रथम-संस्करणम्-१९८१। मूल्यम्-११.०० रूप्यकाणि)

डा० मनोरमा विदुषी संगीतज्ञा चास्ति। तया नारीहृदयस्य स्वारसिका उद्‌गाराः संस्कृतगीनमालिकायां समभिव्यक्ताः। सर्वाण्यपि गीतानि गेयानि, सरलानि संक्षिप्तानि च सन्ति। रचयित्र्या येषु रागेषु एतेषां गीतानां निबन्धन-मभिलषितं तेषामुल्लेखो '**निवेदने**' कृतः। किन्त्वेतानि गातुं शास्त्रीयसंगोतानभिज्ञा अपि स्वशक्त्या प्रभवन्ति। विद्या-लयेषु विभिन्नोत्सवेषु समूहगानरूपेण ससङ्गीतमेतेषां गीतानां प्रस्तुतिः श्रोतृषु प्रभावमवश्यं पातयेदिति विश्वस्यते। सहृदयानामास्वादाय '**जयतु देशो भारतम्**' इति शीर्षकाद् गीतादेकोंऽशः प्रस्तूयते—

'जयतु जगति प्रथितमहिमा
भूरि-भूरि प्रशंसितः।

जयतु जनजनहृज्जिगीषुः
जयतु देशो भारतम् ।

क्वचित्पाणिनीयव्याकरणानुशासनस्थितानां विदुषां कृते एतादृशाः प्रयोगा उद्वेगं जनयितुं शक्नुवन्ति, यथा–

"धवला धवलाम्बरा शारदा
वीणामण्डितकरा ज्ञानदा ।
वरदे ! देहि वरं मे देवि !
वीणावादिनि पालय माम् ॥

अत्र प्रथमद्वितीयचरणयोः सम्बोध्याया सरस्वत्याः विशेषणेषु प्रथमाविभक्तिरश्रुतपूर्वेव प्रतीयते । किन्त्वस्याः परिष्कारः कर्तुं शक्यते यथा—

"धवले धवलाम्बरे शारदे !
वीणामण्डितकरे ज्ञानदे !

आशासेऽग्रिमं संस्करणं चारुतरं समागमिष्यति । साहित्यसंगीतसमाराधनाय लेखिका वर्धिष्यते ।

मोक्षमूलरवैदुष्यम् (नाटकम्)

प्रणेता - डा० भवानीशङ्करत्रिवेदी । **प्रकाशिका** - आर्य-भारती, आर्य-संस्कृत-सजातीय-भारोपीय - संस्थानम्, जी-१८, दिलशाद कालोनी, दिल्ली-११००३२ । **प्रथमसंस्करणम्** – १९८१ । **मूल्यम्** – चत्वारिंशत् रूप्यकाणि । **पृष्ठसंख्या** – ८४ ।

इदं नाटकं रेडियोनाटकमस्ति । प्रकाशनात्प्रागेव आकाशवाणी - दिल्ली-केन्द्रात् ३-३-१९८१ तारिकायामस्य प्रसारणमभूत् । प्रकाशनावसरेऽस्य हिन्द्यनुवादः परिशिष्टरूपेण मोक्षमूलर-सम्बद्धसामग्री चापि नाटककारेण

सहयोजिते। आंग्लभाषाभूमिकायां (*Forward*) डा० सत्यव्रतशास्त्रिमह भार्गवस्य समीक्षणापि कृतम्।

आत्मनिवेदने नाटककारेण डा० भवानीशंकर त्रिवेदिना सूचितं यन्मोक्षमूलरस्य (मैक्समूलरस्य) भारतभक्तिः संस्कृतसेवा च एतन्नाटकरचनायां प्रेरणाभूते।

रेडियोनाटकमिद मञ्चनाटकरूपेणापि प्रयोक्तुं शक्यते। भाषा नास्ति क्लिष्टा क्वापि, यद्यपि दीर्घसमासा क्वचिदस्ति। नाटकारस्य कवित्वमपि अनेकत्र प्रस्फु मस्ति नाटकपात्राणां मुखेन, यथा--

सम्प्रत्यमरभारत्या दिव्यं पीतं मया मधु।
आप्नुवन्ति यदास्वाद्य निर्जरत्वं नरा इह॥

(पृ० २०)

नाटकनायकस्येच्छा स्वामिविवेकानन्दपुरतो नाटकान्ते इत्थं समभिव्यक्ता –

"मूलरः-स्वामिन्! लब्धं महामहिम्नो जर्मनसम्राजो महामान्याया. सम्राज्ञीविक्टोरियायाश्च सर्वोच्चमलङ्करणम्। अधिगता प्रीविकौंसिलस्य सदस्यता। अर्जितं प्रभूतं यशः। प्राप्तश्च भारतीयविदुषां भवादृशानां महात्मनाञ्चानिन्द्यः प्रेमा। सर्वमेवाधिगतं भगवत्प्रसादात्। किमतः परं स्यात्! तथापि यदि वाग्देवता प्रसीदति तदा कालिदासानुगामि मे वचन स्तु–

भरतवाक्यम्

प्रवर्धतां भरतभुवोऽत्र गौरवं सरस्वती श्रुतिमहती महीयताम्।,
बुधोत्तमो गुणगणगौरवादृतः समस्तविश्वहितकरः प्रमोदताम्॥'

(इति निष्क्रान्ताः सर्वे)

धन्यं संस्कृतम् यद्विश्वमेकसूत्रे निबध्नाति, धन्याश्च संस्कृत-रचनाकारा ये भारतभुवो गौरवं कामयमाना समस्तविश्वस्य हितं समाराधयन्ति। कृतिरेषाभिनन्द्यते। विद्वद्भिः स्या अनुशीलन कृत्वा स्वमन्तव्य प्रकटयितव्यम्।

स्फाटिकीमाला

रचयिता-पं० विष्णुकान्त शुक्लः। **प्रकाशक** -सुधा-कमल-ग्रन्थालयः. २६४ उत्तरी गाँधी कालोनी, मुजफ्फर-नगरम् (उ० प्र०)। **प्रकाशनवर्षम्** १९८० ई०। **मूल्यम्**-१५-०० रूप्यकाणि।

अस्मिन् मुक्तककाव्ये कविवरेण पं० विष्णुकान्तशुक्लेन नारीमवलम्ब्य आर्या रचिताः। नार्याः सशक्तरूपं प्रतिष्ठा-पयन्ति एता आर्याः। परम्पराप्राप्तैः समसामयिकैश्च विविधैर्दृष्टान्तैः कविना नार्या उदात्तगुणानां शक्तेश्चोन्मी-लनं कृतम्। आचार्यश्रीसीतारामचतुर्वेद-डा० रमेशचन्द्र शुक्लमहाभागाभ्यामेतत् काव्यं भूमिकायां समीक्षितमपि। प्रतिपृष्ठं नारीशक्तेश्चित्रमपि पुस्तकस्याकारोत्कर्षं जन-यति।

(डा० रमाकान्त शुक्लः)

: ० :

अन्योक्तिस्तबकम्

(कविरत्नश्रीकृष्णसेमवालः)

जनयति सुमतिं या दुर्मतिं दारयन्ती,
प्रकटयति गुणौघं दुर्गुणान्दालयन्ती ।
कलयति सुखराशिं नाशयन्ती समस्यां,
जयति जगति सा मे कापि माता नमस्या ॥१॥

हरिपदकमलेभ्यो निर्गते जह्नुकन्ये,
शिवशिरसि गतेऽपि त्वत्समग्रं ह्यधोऽधः ।
प्रभवति पतनं यद् भूतले कष्टकारि,
तदपि जनहितार्थं वर्तते मातृरूपेः ॥२॥

विमलकमलहासं चन्द्र ते वीक्ष्य मूर्खः,
क्षिपति तव मुखे चेदीर्ष्यया ष्ठीवनं यः ।
किमपि नभसि गत्वा तत्परावृत्य भूयः,
मलिनमयि विधातुं तन्मुखं चैव याति ॥ ३॥

अयि गिरिवरः लोके ते शिलाखण्डपाते,
न भवति यदि हानिः कापि दुःखप्रदात्री ।
अचल! मुनिसमं त्वां निश्चलं मन्यमानः,
कलयति किमुपेक्षां नैव ते लोक एषः ॥४॥

गिरिगहनवनेभ्यो घर्षयन्ती स्वदेहं,
प्रवहसि भुवनेऽस्मिन् या परार्थं सदैव ।
सुनदि! तव महत्त्वं ये न जानन्ति लोके,
विरम विरम किञ्चित्कालमेवात्र तेभ्यः ॥५॥

दिनकर! यदि शक्तिर्विद्यते ते प्रतापे,
जलनिधिमखिलं तं शोषयेः क्षिप्रमेव ।
अयि! लघुतपुरेतत्पल्वलं शोषयित्वा,
तव हृदि किमु लज्जा नैव संयाति काचित् ॥६॥

तृणमिदमिति जाने नास्ति सत्तास्य काचित्,
वियति पवनदास्यं स्वीकरोत्येव नूनम् ।
परमिदमपि नेत्रे चेत्पतेद्दैवयोगा-
ज्जनयति बहुपीडां नास्ति सन्देहलेशः ॥७॥

वितरति भुवने यो गन्धमेतं सगर्वं,
विविधविषयभोगी यत्र कुत्रापि वायुः ।
किमपि न हि तदीयं केवलं भारवाही,
मनुज! भव सतर्कश्छद्मरूपे त्वमस्य ॥८॥

दिनकरकिरणानां तापशापानुतप्तं,
किसलयदलमेतन्म्लानतां नन्वगच्छत् ।
जगति विधिविधानं विद्यते सर्वदैव,
ग्लपयति ननु तेजः कोमलं निर्बलञ्च ॥९॥

किरति बहुतरं यस्सर्वभूमण्डलेऽस्मिन्
दिवसपतिरजस्रं भीषणं तापपुञ्जम् ।
अयमपि विधियोगात्ग्रस्यते केतुनातः,
नृप! कथय किमर्थं दर्पसर्पं बिभर्षि ॥१०॥

चरणतलनिवासो विद्यते यस्य नित्यं,
व्यथय नहि रजस्तद्दीनदीनं कदापि ।
तदपि परमकष्टे वाध्यमानञ्च भूत्वा,
प्रकटयति विरोधं दूषयच्चोत्तमाङ्गम् ॥११॥

सरलकमल! मास्मिन् विश्वसेः भृङ्गयूथे,
नवनवरसलुब्धं विद्यते सर्वदैतत् ।
मधुर-मृदु सुगुञ्जद्दर्शयत्प्रेमबन्धं,
तव सकलमरन्दं पास्यति प्राप्स्यतीति ॥१२॥

सकलभुवनमध्ये देहिनां प्राणरूपः,
त्वमसि पवन! मान्यो विस्तृतोऽतिप्रसिद्धः ।
वहसि तदपि बन्धो दूषितं गन्धमेतं,
कथय कथय कोऽयं ह्यीदृशः स्नेहबन्धः ॥१३॥

भवनमहमपूर्वं श्रेष्ठिभिस्सेव्यमानं,
विविधविधिकलाभिर्भूषितं भव्यरूपम् ।
अयि! मनसि सहर्षं धारयन्मानमित्थं,
स्मृतिमपि न हि यातो भूमिकम्पः कथं ते ॥१४॥

मलिनमतिरते रे भीतिभावं विहाय,
त्वमजदलसमानं स्वात्मयूथं विशालम् ।
रचय रचय धीद्विट् यापयैतान्यहानि,
वयमिह तु चलामस्सिंहवत् ह्याश्रयो नः ॥१५॥

मनुजवरवरेण्याकर्णय त्वं वचो मे,
खलजनदलमध्ये मा गमस्त्वं कदापि ।
मृदुहृदयमवेक्ष्य त्वां यतो धूर्तराजाः,
विविधविधिकुकृत्यैः पीडयिष्यन्ति नूनम् ॥१६॥

गगनमण्डलचञ्चलचन्द्रमः,
कथय रे मदमोहवृतः कथम् ।
स्मरसि किं कुकृतं न पुरा कृतं,
मलिनमस्ति यतश्चरितं च ते ॥१७॥

फलमवाप्तमये ! वद मा शशिन्,
सपदि कस्य दुराचरणस्य यत् ।
मलिनया निशया सह ते प्रियं,
दृढतरं त्वभवत्तव बन्धनम् ॥१८॥

अलभथास्त्वमिदं सदृशं फलं,
निजकृतस्य कलङ्कितकर्मण: ।
मलिनया निशया सह हा शशिन्,
यदभवत्तव विप्रियबन्धनम् ॥१९॥

उपगते त्वयि हे मधुवन्मधो,
उपवनगो मुदिता मुदिता: जना: ।
प्रमुदिता धरणी मुदिता लता:,
कथमियं व्यथिता ननु मालती ॥२०॥

समुदिते गगने गरिमान्विते,
दिनमणौ जनतासमतारतौ ।
प्रतिभया विभयापि च सत्तया,
व्यपगतो विधुरेव महत्तया ॥२१॥

कथय विन्ध्य ! कदापि हृदा त्वया,
कृतमिदन्तु विचारविचिन्तनम् ।
'जगति मानविनाशकरी सदा
मम भविष्यति कष्टकरी दशा, ॥२२॥

द्विगुणतामुपयाति विभा शुभा,
मधुरिमा कृतिदेहभृतो भुवि ।
विकृतदेहधरोऽपि च पूज्यते,
सदसि व: कृपयैव गुणा: सदा ॥२३॥

अयि ! यच्छसि सर्वदाश्रयं,
पथिकेभ्यो वट! फुल्लचेतसा ।
न हि चित्रमिदं त्वदाश्रितः,
क्षुपवर्गस्तु निहन्यते त्वया ॥२४॥

मणिरक्षार्थमसौ फणी गन्ने,
गरलञ्चेदिह धारयत्यरे ।
जनता सततं दुरुक्तिभिः,
कथमेतं भजगं विनिन्दति ॥२५॥

दयतेऽपि च दूयते मनः,
सरलं तं परिवीक्ष्य रासभम् ।
प्रथितो भुवि मूर्खसंज्ञया,
निरतः कर्मणि निष्ठयाप्ययम् ॥२६॥

अयि हंस ! सुनिर्णये तव,
यदि कश्चित् विदधाति संशयम् ।
त्वरितं वद कः क्षमः क्षितौ,
पुनरन्यायविचारणेऽधुना ॥२७॥

मलयानिल! ते गुणोत्तमम्,
न हि वक्तुं भुवि कोऽपि सक्षमः ।
मृदुतां न जहासि सौख्यदां,
भुजगश्वासविदूषितोऽपि सन् ॥२८॥

जलधेः पुलिने विराजितं,
सरसाब्धौ मम मज्जितं मनः ।
मलयानिलवीज्यमानया,
सुनलिन्या मलिनीकृतं कथम् ॥२९॥

चषकेति सदैव चिन्तयन्,
चषकोऽयञ्च कषायतां गतः।
न मयाधिगतः कदापि स,
मम जन्मैव च येन निष्फलम् ॥ ०॥

प्रभुतामृदुताधनादिकाः
यदि सन्तीति नरान्तिके गुणाः।
अयि दीप्तिरतीव मोहिनी,
स्वयमायाति निवासहेतवे ॥३१॥

बदरिकाफल ! सुन्दरताभवं,
त्यज सखेऽखिलगर्वमहाज्वरम्।
सुललिते त्वयि बाह्यमनोहरे.
न हि स लुभ्यति वेत्ति तवान्तरम् ॥३२॥

सुविमलं वहिरेव मनोहरं,
वदरिकाफलमेतदवेक्ष्य रे।
त्वमयि मुह्यसि चेत किमतः परं,
तव भविष्यति दुर्मतिचिन्तनम् ॥३३॥

सिंहो वानरसम्भ्रमनां न कुरुते संगर्जनां घर्षणां,
नैवं वाञ्छति वन्यजीवनिचयं कर्तुं भयेनार्दितम्।
यद्यच्चापि समीहते प्रकुरुतेऽरण्ये त्वसौ निर्भयं,
श्लाघा सत्त्ववतां हि गौरवमयी काप्यद्भुता चेतना ॥३४॥

यातो ह्याम्रतरोस्तले प्रियसखे ! तन्निन्दकश्चैकदा,
सोऽनिन्दत्तमहो फलान्यतिलघून्यालोक्य तस्मिंस्तरौ।
दैवात्कीरनिषेवितं प्रपतितं तस्मात्फलं तन्मुखे,
पीडास्वादसुखेन तेन युगपज्ज्ञातञ्च तद्गौरवम् ॥३५॥

जीवनं सारभूतम्

[डा० कृष्णकान्त शुक्लः,
बरेलीस्थबरेलीकालेजे संस्कृतविभागाध्यक्षः]

(१)

यदि मिलति सुखं भोः ! कायकष्टं विनैव,
मिलति च परितोषोऽकारणं कूटकृत्यैः ।
भवति च परिचर्याऽऽक्रान्तदेवप्रतिष्टा,
ननु सुललितमेतज्जीवनं सारभूतम् ।।

(२)

त्रपुणि यदि नियुक्तं दूयते रत्नजातं,
यदि च मुकुटशोभामीहते गुञ्जमाला ।
यदि कपटप्रवीणैर्वञ्च्यते विज्ञलोको
निखिलमिदममूल्यं जीवनं सारभूतम् ।।

(३)

कथमपि दुरुपायैरात्तसत्तैः सदव
यदि च बुधवरेभ्यो दीयते ज्ञानदीक्षा ।
'जगदिदमिति सत्यं, ब्रह्म मिथ्ये'ति सिद्धिः,
क्रियत इह तदा तज्जीवनं सारभूतम् ।।

(४)

'यदपि यदपि पुण्यं तद्धि सर्वं निरर्थं,
यदपि च परिदुष्टं सार्थकं तत्तदेव' ।
सरभसमिति येषां घोषणा वर्धतेऽत्र,
निखिलजगति तेषां जीवनं सारभूतम् ।।

(५)

एतस्माद्विपरीतम्—

गुरुजनपरिचर्या, संस्कृतिर्भारतीया,
मनसि वचसि कायेऽभिन्नता श्लाघनीया।
अनुपमकरुणार्द्रा भूतमात्रेषु मैत्री,
यदि भवति सखे ! तज्जीवनं भारभूतम् ॥

(६)

श्रवणमननपूर्वं शास्त्रचर्चा मनोज्ञा,
विधिविहितसपर्याराधिता देवमूर्तिः।
विषमविषयमालानाशिनी तत्त्वचिन्ता,
यदि भवति सखे ! तज्जीवनं भारभूतम् ॥

(७)

अस्मात्—

त्यजत त्यजत शीलं शोषकं सद्गुणानाम्,
भजत भजत भोगं तत्त्वभूतं जनानाम्।
पिबत पिबत सोमं जीवनं जीवनानाम्,
भरत भरत नित्यं जीवनं सारभूतम् ॥

(८)

तथा च फलश्रुतिः—

निरतिशयप्रचारं, साधकं जीवनस्य,
सरलसरलरूपं, पोषकं सौख्यराशेः।
अकठिनपरिचर्यालालितं श्रीसमृद्धं,
भजत भजत तूर्णं धर्ममेनं युगस्य ॥

—:०:—

सम्वेदनम् निवेदनम् च

(श्रीमथुरादत्त जोशी, एम०ए०, साहित्याचार्यः, दिल्ली)

(१)

या सेविताशेषमुनीन्द्रवृन्दै-
भृशं निपीता च सुरेन्द्रभृङ्गैः।
हिमालयात्सागरसेतुबद्धा
भूमिः पवित्रा सकला यया मे ॥

(२)

जावा-सुमात्रा-बरमा-मलावा-
जापान - लङ्कटलि - जर्मनेषु।
अन्येषु देशेष्वपि सुप्रसिद्धिं
गता ह्यधीता च मनीषिभिर्या ॥

(३)

प्राचेतस-व्यास-मयूर-भासाः
सौमिल्लदण्डीकविकालिदासाः।
प्रत्यक्षरश्लेषपरः सुबन्धुः
नवाः पुराणाः कवयस्तथान्ये ॥

(४)

पाश्चात्यविद्वान् सुविनीतकीथो
मैग्डानलो मूलरमोक्षभट्टः।
जातास्तथान्ये प्रतिभानवन्तः
यस्याः प्रसादेन विचारवन्तः ॥

(५)

सा भारती कालवशादुपेता
दशां परां हा दयनीयतायाः ।
क्व याम कुर्याम च किं? स भोजोऽ-
वलोक्यते क्वापि सुधीर्न चात्र ॥

(६)

विद्वत्सभाजोऽस्ति घनान्धकारे
न निश्चितं छात्रगणस्य लक्ष्यम् ।
देहि प्रकाशं यदि चेत् प्रभुस्त्वं
समानभावेन समाहितः सन् ॥

(७)

संरक्षिता भारतसंस्कृतिः स्यात्
समृद्धमूलाः प्रणवाः लताः स्युः ।
अहो प्रजातन्त्रमिदं न मे स्यात्-
वाणीविहीनम्परवागधीनम् ॥

—: ० :—

'देववाणी-परिषद्, दिल्ली'-वार्ता

आचार्यश्रीब्रह्मानन्दशुक्ल-स्मारकव्याख्यानमाला

३०-१-१९८२ ई० तारिकायां नवदिल्ल्यां देववाणी-परिषदा समायोजितायाः 'आचार्यश्रीब्रह्मानन्दशुक्ल-स्मारक-व्याख्यानमालायाः' अन्तर्गतं 'स्वातन्त्र्योत्तरं संस्कृत-काव्यम्' इति विषयमवलम्ब्य भाषभाषेण वयोवृद्धसंस्कृत-कविसमालोचकेन आचार्यश्रीरमेशचन्द्रशुक्लमहाभागेनोक्तं यन्नूमयं सुखदाश्चर्यविषयो यदद्यापि संस्कृते रचनात्मकं साहित्यं तेनैव वेगेन विरच्यमाणमवलोक्यते यथा सहस्राब्द-पूर्वम्। तेनोदितं यत्संस्कृतकाव्ये आशावादी स्वरः कदापि न क्षीणः। स्वातन्त्र्योत्तरं विरचितेषु तेषु तेषु काव्यप्रकारेषु अवसादपीडितायै मानवतायै नूनं कश्चिद्विश्रामः, कश्चि-दुत्साहः, कष्टसहिष्णुत्वं, कर्मण्यता च दिश्यन्ते। आवश्यक-तास्ति यदनेन साहित्येनास्माकं परिचयो भवेत्।

परिषन्महासचिवेनास्मिन्नवसरे विज्ञापितं यत् आजन्म-संस्कृतसेवाव्रतस्य, 'गान्धिचरित'-'नेहरूचरितमहाकाव्य'-'भारतसुषमा'-प्रभृतिरचनाभिः संस्कृतकाव्यजगदलङ्कर्तुः किञ्च १९७०ईशवीयेऽब्दे वसन्तपञ्चम्यां दिवंगतस्य प्रख्यात-साहित्याचार्यस्य कविरत्नश्रीब्रह्मानन्दशुक्लस्य स्मृतावस्माद् वर्षाद् देववाणी-परिषदा व्याख्यानमाला प्रवर्तितास्ति यस्यां संस्कृतसाहित्यमवलम्ब्य प्रतिवर्षं कस्यचिद्विदुषो विचारा व्यक्तीकरिष्यन्ते।

'भाति मे भारतम्' इति संस्कृतकाव्यस्य प्रकाशनोद्घाटनम्

३.३.१९८२ ई० तारिकायां नवदिल्यां 'आर ६ वाणी विहार' - इति स्थाने देववाणी-परिषदस्तत्त्वावधाने समायोजिते 'ग्रन्थोन्मीलनोत्सवे काशीहिन्दूविश्वविद्यालयस्य प्राच्यविद्याधर्मविज्ञानसङ्काये संस्कृतसाहित्यविभागाध्यक्षेण किं च राष्ट्रपतिपुरस्कृतप्रख्यातसंस्कृतकविसमालोचकेन डा० रेवाप्रसादद्विवेदिमहाभागेन डाक्टररमाकान्तशुक्ल-प्रणीतस्य 'भाति मे भारतम्' इत्याख्यस्य संस्कृतकाव्यस्य प्रकाशनोद्घाटनं कृतम्। तेनोक्तं यत् कविनास्मिन् काव्ये यया मनोहारिण्यासरस सरलया शैल्या भारतस्य गौरवं गीतं तेन स्पष्टं भवति यद् भारतं कवीनां कृते कियत्प्रेरणादायक-मस्ति संस्कृते च कीदृशी मसृणा अभिव्यञ्जनाशक्तिरस्ति।

भाति मे भारतम्' काव्यस्य वैशिष्ट्यमुद्घाटयद्भिः प्रख्यातसाहित्यकारैराचार्यरमेशचन्द्रशुक्ल - डा० कृष्णकान्त-शुक्ल - डा० जगदीशदत्तदीक्षितैः, विशिष्टातिथिभिः डा० रामचन्द्रद्विवेदिमहाभागैः, समारोहाध्यक्षैर्डाक्टरमण्डन-मिश्रमहाभागैश्च काव्यमवलम्ब्य स्व विचारा अभिव्यक्ताः। उत्सवस्य संयोजकेन रामसुरेशपाण्डयेन कार्यक्रमस्य सञ्चालनं कृतम्।

'देववाणी-परिषद्, दिल्ली' संस्थायाश्चतुर्थं पञ्चमं च संयुक्तं वार्षिकाधिवेशनं सम्पन्नम्!

"देववाणी-परिषद्, दिल्ली' इत्यस्याः संस्थायाश्चतुर्थं पञ्चमं च संयुक्तं वार्षिकाधिवेशनम् नवदिल्यां २०-३-१९८२–२१-३-१९८२ तारिकयोः सम्पन्नम्।

अधिवेशनस्योद्घाटनं कुर्वाणैः पं० बदरीनाथशुक्लमहाभागैः परिषदः कार्यकलापेषु हर्षोऽभिव्यक्तः। तैः केवलं किंवदन्तीष्वेव जीवमानानां संस्कृतविदुषामितिहासलेखनस्यावश्यकता रेखांकिता यतो हि किंवदन्तीष्वपि बहूनि शास्त्रीयतत्त्वानि निहितानि वर्तन्ते। परिषदोऽध्यक्षैराचार्यवेदानन्दझामहाभागैः स्वाध्यायप्रवचनयोः परम्परां सुदृढीकर्तुं जना आहूताः। परिषदो महासचिवेन डा० रमाकान्तशुक्लेन वार्षिकं विवरणं प्रस्तुतम्।

परिषदास्मिन्नधिवेशने '**दिल्लीमाध्यमिककक्षापाठ्यक्रमे संस्कृतस्य स्थितिः**' इति '**संस्कृताशुलिपेर्विकासस्य सम्भावना**' इति च विषयमवलम्ब्य विचारगोष्ठीद्वयमपि समायोजितम् यत्र डा० टी० एस० रुक्मणी - डा०श्रीनिवास मिश्र श्री गोपालदत्त विष्ट-डा०कृष्णकान्त शुक्ल-श्रीकामताप्रसाद त्रिपाठि-आचार्यरामदयालु शास्त्रि-श्रीनारायण दत्तजोशि–श्रीभास्करानन्दभट्ट - डा० वासुदेव राव - श्रीकन्हैयालाल गुप्त-प्रभृतिभिर्विद्वद्भिः स्वविचाराः प्रस्तुताः।

परिषदा नाट्योत्सवस्याप्यायोजनं कृतं यत्र भासकृत '**स्वप्नवासवदत्त-दूतवाक्ययोः**' डा० सी० आर० स्वामिनाथरचितस्य '**कर्णभूषणस्य**' च प्रस्तुतिर्जाता। अस्मिन्नवसरे समायोजिते अखिलभारतीयसंकृतकविसम्मेलने श्रीश्रीनिवासरथ महाभागानामाध्यक्ष्ये डा० कमलेशदत्त त्रिपाठिकामताप्रसाद त्रिपाठि-डा० कृष्णकान्त शुक्ल-श्री उमाकान्त शुक्ल-श्री विष्णुकान्त शुक्ल-डा० राजदेव मिश्र-डा० रुद्रदेव त्रिपाठि - डा०कृष्णलालनादान - डा० सत्यपालनारंग-डा० जगदीशदत्तदीक्षित - श्री ओमप्रकाशत्रिवेदि – पं० रघुनाथ-

प्रसाद्चतुर्वेद–श्री अोगेटिपरीक्षितशर्म-डा० दीपक घोष-पं० टी०वी० परमेश्वर अय्यर-डा० हर्षनाथमिश्र - डा० भवानी-शंकरत्रिवेदि-डा० सी०आर० स्वामिनाथ-श्री परमेश्वर नम्पूतिरि–आचार्य वेदानन्द झा–डा० रमाकान्तशुक्ल–प्रभृतिभिः काव्यपाठः कृतः ।

परिषदा अक्षरश्लोकमप्यायोजितं यत्र डा० सी०आर० स्वामिनाथ–श्री के०पी०ए० मेनन-पं० पी० एन० पट्टाभिराम-शास्त्रि-पं० विष्णुकान्तशुक्ल–श्री रवीन्द्रनागर-श्री पी०वी० उन्नीकृष्णन्-प्रभृतिभिः श्लोकपाठः कृतः ।

परिषदा '**दी शंकर एकेडेमी आफ संस्कृत कल्चर एण्ड क्लासिकल आर्ट्स**' इत्याख्यायाः संस्थायाः सहयोगेन-भारतराष्ट्रपतिपुरस्कृतानां पद्मभूषण पं० पट्टाभिराम-शास्त्रि - श्री अडयपलम् मुनुस्वामि रामनाथ-दीक्षितर - श्री मधुपूदनभट्टाचार्य - पं० रघुनाथशर्म-श्रीसत्यव्रतसिद्धान्तालंकार - श्री टि० ई० वीरराघचार्य-श्री विश्वनाथबालकृष्णशास्त्रिमहाभागानामभिनन्दनमपि कृतम् । अभिनन्दनसमारोहस्याध्यक्षतां कुर्वाणैः पं० कमला-पतित्रिपाठिमहाभागैः भारतसंस्कृतिपरिज्ञानाय संस्कृतम-निवार्यत्वेन प्रतिष्ठापितम् । तैः संस्कृतपण्डितानां अधिकतर-साहाय्याय सर्वकारः प्रेरितः ।

२१.३.१९८२ तारिकायां परिषदः कार्यसमित्या निर्वा-चनं संवृत्तम् । सर्वसम्मत्या निम्नलिखिताः सदस्याः कार्य-समित्यर्थं निर्वाचिताः जाताः—**अध्यक्षः** - डा० कृष्णकान्त-शुक्लः, **उपाध्यक्षः**-डा०रामसुरेशपाण्डेयः, **महासचिवः**-डा० रमाकान्त शुक्लः, **सहसचिवः**-श्री रवीन्द्रनागरः, **कोषाध्यक्षा**-

श्रीमती रमा शुक्ला, **सदस्याः**-श्रीवेदानन्द झा, श्री सोहन-लाल गौड़:, श्री उमाकान्त शुक्लः, श्री विष्णुकान्त शुक्लः, श्री मथुरादत्त जोशी, श्री कन्हैयालाल गुप्तः, । २१.३.१९-८२ तारिकायां सम्पन्नयोः कार्यसमितेः साधारण-सभायाश्च समज्ययोरनेके महत्त्वपूर्णाः प्रस्तावाः पारिता अभूवन् ।

देववाणी - परिषदश्चतुर्थपञ्चमसंयुक्तवार्षिकाधिवेशनस्य उद्घाटनसमारोहे परिषन्महासचिवेन प्रस्तुतं वार्षिकविवरणं परिषदध्यक्षैश्च व्याहृतमध्यक्षीयं भाषणं साधारणसभायां स्वीकृतमायव्ययविवरणञ्च देववाणी–परिषदा सद्य एव प्रकाश्यमाणस्य **'देववाणी-दर्शनाख्यस्य** ग्रन्थस्य द्वितीयखण्डे दीयन्ते ।

(प्रस्तोता–डा० रमाकान्त शुक्लः, परिषन्महासचिवः)

अन्धकार:

श्रीहर्षदेव माधवः, अहमदाबादः (गुज०)

अन्धकारः
श्यामः,
कर्बुरः,
कृष्णः,
कपोतवर्णः,
श्यामकर्बुरः,
जम्बूवर्णः,
नीलः,
धूलीवर्णः,
धूमिलः,
पिशङ्गः,
आहेलिकावर्णः,
किन्तु अन्धकारोऽपि मेघधनू रचयति
श्रावणभाद्रपदवर्षाक्लिन्ने निशीथे तव नेत्रयोः ।

०

अन्धकारः
धूलीपरिवर्तनमलिनरासभवर्णः ।
अन्धकारः
वननिबिडगुल्मान्तरितगजवर्णः ।
अन्धकारः
कृष्णमृगाजिनवर्णः
अन्धकारः
कच्छपपृष्ठवर्णः ।।

नियमाः

१. 'अर्वाचीनसंस्कृतम्' त्रैमासिकं पत्रं जनवरी-अप्रैल-जुलाई–अक्टूबर-मासानां प्रत्येकं १५ दिनांके प्रकाशितं भविष्यति ।

२. अस्मिन् एकोनविंशशताब्देरुत्तरं रचिताः संस्कृतरचना अवलम्ब्य संस्कृते, हिन्द्याम्, आंग्लभाषायां वा निबद्धाः शोधपूर्णाः समालोचनात्मका वा लेखाः प्रकाशिताः स्युः। विशेषाङ्केषु मौलिकरचनानां प्रकाशनमपि भवेत् ।

३. प्रकाशनाय लेखाः / रचनाः सुवाच्याक्षरैः पत्रस्यैकतो लिखिता वा टंकिता वा स्युः ।

४. रचनानां प्राप्तिसूचना प्राप्तिसमकालमेव प्रहीयते । तासां प्रकाशनं तु यथावसरं परीक्ष्य पश्चादेव संभवेत् । अतो लेखकमहोदयाः प्रस्तोष्यमाण एवाङ्के स्वकृतीनां प्रकाशनाय साग्रहा न भवेयुः ।

५. अप्रकाशितायाः सत्याः स्वकृतेः परावर्तनमिच्छन्तः सज्जनाः यथापेक्षं पत्रालयीयमुद्रिकाः (*Stamps*) प्रेषयेयुः ।

६. पत्रस्य वार्षिकं शुल्कं भारते विंशतिरूप्यकात्मकं विदेशेषु च पञ्चडालरात्मकं पौण्डद्वयात्मकं वा विद्यते । तच्च पूर्णमेव पूर्वतः प्रदेयं भवति । वी०पी० द्वारा प्रेषणस्य न नियमः । चैकादिकेन (*Cheques*) '**देववाणी-परिषद्, दिल्ली**' – अंकितेन भाव्यम् । शुल्कमधोदत्ते सङ्केते प्रेषणीयम् :

महासचिवः, देववाणी–परिषद्, दिल्ली,
६ वाणी विहारः, नयी दिल्ली-११००५९ ।

७. समालोच्यपुस्तकानां प्रत्येकं द्वितयी प्रेषणीया ।

८. विज्ञापन-शुल्कमित्थमस्ति-प्रतिपूर्णपृष्ठम् (एकवारम्) रु० ३००-०० (चतुर्वारम्) रु० ५००-०० ।

९. पत्रव्यवहारे स्वकीया ग्राहकसंख्याऽवश्यमुल्लेखनीया ।

अर्वाचीनसंस्कृतम्

(R. N. 34554/79)

❋

१. प्रकाशन का स्थान : नयी दिल्ली

२. प्रकाशन की आवधिकता : त्रैमासिक

३. मुद्रक तथा प्रकाशक का
नाम, राष्ट्रीयता तथा पता : डा० रमाकान्त शुक्ल
(देववाणी-परिषद्, दिल्ली-कृते)
भारतीय
६, वाणी विहार, नई दिल्ली-११००५९

४. सम्पादक का नाम,
राष्ट्रीयता तथा पता : डा० रमाकान्त शुक्ल
भारतीय
६, वाणी-विहार, नई दिल्ली-११००५९

५. उन व्यक्तियों के नाम और पता
जो इस पत्रिका के मालिक या
साझेदार हैं अथवा जो इसकी
सारी पूंजी के एक प्रतिशत से
अधिक के हिस्सेदार हैं। :देववाणी-परिषद् दिल्ली
६, वाणी-विहार, नयी दिल्ली-११००५९

मैं, डॉ० रमाकान्त शुक्ल, यह घोषणा करता हूँ कि उपर्युक्त विवरण मेरी पूरी जानकारी और विश्वास के अनुसार सही है।

डा० रमाकान्त शुक्ल
महासचिव, देववाणी-परिषद्, दिल्ली
प्रकाशक

अर्वाचीनसंस्कृतम्

परामर्शदातृमण्डलम्

(१) डा० रामसुरेशपाण्डेय:
एम०ए०, पीएच० डी०, व्याकरणाचार्य:

(२) डा० कृष्णकान्त शुक्ल:
एम०ए०, पीएच० डी०, साहित्याचार्य:

(३) प्रा० उमाकान्त शुक्ल:
एम० ए०, साहित्याचार्य:, सांख्ययोगाचार्य:,

सम्पादक:

डा० रमाकान्त शुक्ल:
एम० ए०, पीएच० डी०, साहित्याचार्य:
सांख्ययोगाचार्य:

प्रकाशनतिथि:

१५ जनवरी, १५ अप्रेल, १५ जुलाई, १५ अक्टूबर

वार्षिकग्राहकशुल्कम्

विंशतिरूप्यकात्मकम् *Rs. 20:00* (भारते)
पौण्डद्वयं डालरपञ्चकं वा (विदेशेषु)

Annual Subscription
Rs. 20.00 (In India)
5 Dollars or 2 Pounds (Abroad)

प्राप्तिस्थानम्

देववाणी-परिषद् दिल्ली
आर ६, वाणी-विहार:, नयी दिल्ली-११००५९
DEVAVANI PARISHAD, DELHI
6 Vani Vihar, New Delhi-110059.

देववाणी-परिषदा प्रकाशिताः संग्रहणीया ग्रन्थाः

१.	अर्वाचीनसंस्कृतमहाकाव्यविमर्शः (प्रथमखण्डः) (सं० : डा० रमाकान्तशुक्लः)	रु० १५.००
२.	,, ,, ,, (द्वितीयखण्डः)	रु० ३०.००
३.	,, ,, ,, (तृतीयखण्डः)	रु० ३०.००
४.	कर्णभूषणम् (डा० सी०आर० स्वामिनाथन्)	रु० ५.००
५.	भाति मे भारतम् (डा०रमाकान्तशुक्लः)	रु० ४०.००
६.	श्रीकृष्णचरितम् (डा० रमेशचन्द्रशुक्लः)	रु० ३०.००
७.	सुगमरामायणम् ,, ,,	रु० ३५.००
८.	हरविजयस्य साहित्यिकमध्ययनम् (डा० कृष्णकान्तशुक्लः)	रु० ६०.००
९.	श्रीमदप्पयदीक्षितचरितम् (डा०हरिनारायणदीक्षितः)	रु० २०.००
१०.	भारतस्वातन्त्र्यसंग्रामेतिहासः (डा०र०च०शु०)	रु० ३५.००
११.	सदाशयसमुच्चयः (टी०वी०परमेश्वरअय्यरः)	रु० १५.००
१२.	आभाणकमञ्जरी (,, ,,)	रु० १५.००
१३.	मेघदूत : एक विश्लेषण (डा० देवीदत्त शर्मा)	रु० २०.००
१४.	रघुवंश : एक विश्लेषण (,, ,,)	रु० २०.००
१५.	अभिज्ञानशाकुन्तल : एक विश्लेषण (,,)	रु० २०.००
१६.	कालिदास की कला और संस्कृति (भाग २) (लेखकः डा० देवीदत्त शर्मा)	रु० ६०.००

प्राप्तिस्थानम्

'देववाणी-परिषद्, दिल्ली'

६ वाणी-विहारः, नयी दिल्ली-११००५९.

'देववाणी-परिषद्, दिल्ली'–कृते डा० रमाकान्तशुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नई दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा '६, वाणी-विहार, नयी दिल्ली-११००५९'तः प्रकाशितम्-अर्वाचीनसंस्कृतम्(४/२)। सम्पादकः डा० रमाकान्त शुक्लः। प्रकाशनतिथिः १५-४-१९८२।

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

चतुर्थवर्षे तृतीयोऽङ्कः

१५ जुलाई १९८२

प्रधानसम्पादकः

डा० रमाकान्तशुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः,

सांख्ययोगाचार्यः

प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

परामर्शदातृमण्डलम्

(१) डा० रामसुरेशपाण्डेय:
एम०ए०, पीएच० डी०, व्याकरणाचार्य:

(२) डा० कृष्णकान्त शुक्ल:
एम०ए०, पीएच० डी०, साहित्याचार्य:

(३) प्रा० उमाकान्त शुक्ल:
एम० ए०, साहित्याचार्य:, सांख्ययोगाचार्य:,

विषय-सूची

क्रम:	लेख:/रचना	लेखक:	पृष्ठाङ्क:
१.	सम्पादकीयम्	सम्पादक:	१२५-१२६
२.	*Editorial*	*Editor*	१२७-१२८
३.	राधाकृष्णरसायन-प्रणेता	डा०सी०आर० स्वामिनाथन्	१२९-१३०
४.	श्री ओट्टूर उण्णिनम्बूदिरीपाद-विरचितं राधाकृष्णरसायनम्	डा० रमाकान्त शुक्ल:	१३१-१४२
५.	स्वातन्त्र्योत्तरं संस्कृतकाव्यम्	डा० रमेशचन्द्र शुक्ल:	१४३-१६६
६.	'सेतुबन्ध' नाटक-समीक्षा	आ०लक्ष्मीचन्द्र कौशिक:	१६७-२००
७.	भारते भासन्तं भारती संस्कृति:	डा० वनेश्वर पाठक:	२०१-२०३
८.	देववाणी-परिषद्वार्ता		२०४-२०७

वार्षिकग्राहकशुल्कम्
विंशतिरूप्यकात्मकम *Rs. 20:00* (भारते)
पौण्डद्वयं डालरपञ्चकं वा (विदेशेषु)
Annual Subscription
Rs. 20.00 (In India)

सम्पादकीयम्

अर्वाचीनसंस्कृतस्य चतुर्थवर्षे तृतीयोऽङ्कः पाठकानां करकमलेषु समायाति। अस्मिन्नङ्के लेखचतुष्टयं कवितैका विगतमासत्रये घटितानां देववाणी-परिषत्कार्य-कलापानां संक्षिप्तविवरणं च दीयन्ते।

'राधाकृष्णरसायनकर्ता' इतिशीर्षके लेखे डा० शास्त्रपुरम् रामकृष्णस्वामिनाथमहाभागेन १९०४ तमे खीष्टेऽब्दे लब्धजनुषो ऽष्टसप्ततिवर्षदेशीयस्य संस्कृतभक्तकवेः श्रीओट्टूरउण्णिनम्बूदिरीपादस्य संक्षिप्तः परिचयो दत्तः। **'श्री ओट्टूरउण्णिनम्बूदिरीपादविरचितं राधाकृष्णरसायनम्'** इति शीर्षके लेखे प्रकृतपंक्तिलेखकेन श्रीओट्टूरउण्णिकृतं राधाकृष्णरसायनमवलम्ब्य समीक्षा विहिता। राधाकृष्णरसायनं हि देववाणी-परिषदा १९८२ तमेशवीयेऽब्दे प्रकाशितं यस्मिन् श्रीनम्बूदिरीपादानां राधाकृष्णभक्तिपरकाः कविताः सङ्कलिताः सन्ति। **'स्वातन्त्र्योत्तरं संस्कृतकाव्यम्'** इतिशीर्षके शोधपत्रे आचार्यश्रीरमेशचन्द्रशुक्लमहाभागेन स्वातन्त्र्योन्तरं प्रकाशितस्य संस्कृतकाव्यस्य विषये वैदुष्यपूर्णाः सूचनाः प्रदत्ताः। शोधपत्रमिदं **'देववाणी-परिषद्, दिल्ली'** संस्थायास्तत्त्वावधाने समायोजिताया **आचार्यश्रीब्रह्मानन्दशुक्लस्मारक**व्याख्यानमालायाः प्रथमपुष्पस्वरूपेण ३०-१-१९८२ तारिकायां प्रस्तुतमभूत्। **'सेतुबन्धनाटकसमीक्षा'** -शीर्षकलेखे रुहेलखण्डविश्वविद्यालयीयस्य वरेलीस्थबरेलीकालेजस्य भूतपूर्वसंस्कृतविभागाध्यक्षेणाचार्यश्रीलक्ष्मीचन्द्रकौशिकेण उत्तरप्रदेशसंस्कृताकादम्या एकसहस्ररूप्यकात्मकपुरस्कारेण सम्मानितं **'सेतुबन्ध'**-नाटकं समवलम्ब्य समालोचनं कृतम्।

'भारते भासतां भारती संस्कृतिः' इति शीर्षककवितायामनेकग्रन्थकारेण कविवरेण डा० वनेश्वरपाठकमहाभागेन भारतीयसंस्कृतेः स्वरूपमुपश्लोकितम्। कविताविषये डा० पाठकेन ३-५-१९८२

दिनाङ्के अस्मै जनाय प्रेषिते स्वीये पत्रे इत्थं सङ्केतितम् '……भवतां 'भूतले भाति मेऽनारतं भारतम्' कवितामनुकृत्य मया 'भारते भासतां भारती संस्कृतिः' इत्याख्या कविता निर्मिताऽस्ति। सा भवदन्तिकं प्रेष्यते।'

देववाणी-परिषद्वार्तायां देववाणी-परिषत्कार्यकलापानां संक्षिप्त-विवरणं दीयते।

विगताङ्कमवलम्ब्य डा० रामचन्द्र द्विवेदि- डा० जगन्नाथपाठक,-डा० शशितिवारी-प्रभृतिभिः पाठकैः स्वशुभाशंसनानि प्रेषितानि सन्ति, तेषां कृते कृतज्ञतामावहति।

विदुषां वशंवदः

१५-७-१९८२

रमाकान्तशुक्लः

(प्रधानसम्पादकः)

EDITORIAL

The III number of IV Volume of *Arvācīnasaṁskṛtam* is presented to our readers. In this number alongwith four articles and a poem a brief report on the activities of Devavani Parisad, Delhi during last three months is given.

In the article *'Rādhākṛṣṇarasāyanakartā'* Dr. C. R. Swaminathan produces a brief introduction of the devotional Sanskrit poet 78 year old Shri Ottur Unni Namboodripad born in 1904. In the article entitled *Śrī Oṭṭur Unni Nambūdiripādakṛtam Rādhākṛṣṇarasāyanam'* the author of these lines has presented a critique of *Rādhākṛṣṇarasāyanam*, composed by Shri Ottur Unni Nambudiripad. *Rādhākṛṣṇarasāyanam* is a collection of devotional poems, regarding *Rādhā* and *Kṛṣṇa*, published by Devavani Parishad Delhi in 1982. In the research paper *'Svātantryottaram Saṁskṛtakāvyam'* Dr. Ramesh Chandra Shukla has provided valuable and scholarly informations regarding post-indipendence Sanskrit Poetry. The research paper was presented as an inaugural address in the 'Acharya Shri Brahmanand Shukla Memorial Lecture Series' organised under the auspices of Devavani Parishad, Delhi on 30-1-1982, In the article *'Setubandhanāṭakasamīkṣā'* Acharaya Laxmi Chandra Kaushik, formarly Head of the department of Sanskrit, Bareilly College, Bareilly has reviewed the *Setubandha*, a

Sanskrit drama honoured with the award of Rs. 1000/- by Uttar Pradesh Sanskrit Akademi in 1979.

In the poem '*Bhārate Bhāsatam Bhāratī Saṁskṛtiḥ*', the poet Dr. Vaneshvara Pathak writer of a number of books, has depicted the features of Indian Culture. Regarding this poem, Dr. Pathak in his letter dated 3-5-1982 addressed to the writer of these lines has pointed out "I am sending you a poem '*Bhārate Bhāsatām Bharatī Saṁskṛtiḥ*' composed by me following your poem *Bhūtale Bhāte me' nāratam Bhāratam.*

A brief report of the activies sponsord by Devavani Parishad, Delhi has been given under *Devavāṇi Pariṣadvārtā*'.

The editor is indebted to Dr. R. C. Dvivedi, Dr. J. N. Pathak and Dr. (Smt.) Shashi Tiwari who have send their appreciations regarding the last issue of this Journal.

(Dr.) Ramakant Shukla
Chief Editor

राधाकृष्णरसायनप्रणेता

(डा० सी० आर० स्वामिनाथन्, भारतसर्वकारस्य शिक्षामन्त्रालये, उपशिक्षापरामर्शदाता, नव दिल्ली)

श्री ओट्टूरउण्णिनम्बूदिरीपादः १९०४ ख्रिष्टाब्दे केरलप्रान्ते 'ओट्टूरमन' इति प्रसिद्धे द्विजकुले जनिमलभत्। सप्तमे वयस्युपनीतः स्वपितृचरणादेव सार्धचतुर्वर्षाभ्यन्तरे ऋग्वेदसंहितां पूर्णतया कण्ठस्थीकृत्य पद-क्रम-जटा-रथपर्यन्तेषु विकृतिपाठेष्वपि नैपुणीं सम्पाद्य 'कटवल्लूर' परीक्षायां सर्वप्रथमत्वेनोत्तीर्णः। वेदाध्ययनकाल एव निजगृहे श्रीमद्भागवतपारायणाय नियुक्तस्य श्रीकृष्णशास्त्रिणः सकाशात् काव्यनाटकाद्यध्ययनं चकार। तदनन्तरमाङ्लभाषामधीत्य आई०सी०एस० पर्यन्तं परीक्षाः दातुमुत्सुकोऽभूत्। किन्तु शरीरास्वास्थ्यहेतोः उपरिपठनेऽसमर्थः नैराश्यमनुभवन् विवेकानन्दस्योपन्यासानां तेषां द्वारा श्रीरामकृष्णपरमहंसस्य दिव्यचरितावगाहने निर्वृतिमवाप। कैरलीभाषायां लिखितः श्रीरामकृष्णचरिताह्वयः लघुः ग्रन्थः उण्णिनम्बूदिरीपादस्य सर्वतोमुखीनपरिवर्तनायालमभूत्। आंग्लभाषाध्ययनेन वैज्ञानिकीमुन्नतिं प्रापिप्सोः नास्तिक्यविचारधारासु प्रचलतस्तस्य हृदये आध्यात्मिकतथ्यानां नवीनं मूल्यांकनं सञ्जातम्। ईश्वरो नास्ति, यद्यप्यस्ति, स विदूरस्थः अदृश्यश्च अकिञ्चित्करश्चेति ये विचाराः आसन् तेषां स्थानमीश्वरातिरिक्तं किंचिदपि नास्ति, स अतीव निकटतम इति बोधः समजनि। इयमेव विचारधारा अहर्निशं तं प्रेरयन्ती श्रीरामकृष्णभगवतः परोक्षया कृपया श्रीगुरुवायूरपुरेशं श्रीमद्भागवतञ्चावलम्ब्य जीवितयात्रां कर्त्तुं धैर्यमदात्। एवं तस्य रोगबाधा एवानुग्रहरूपेण परिणामतः रात्रिन्दिवं भगवच्चिन्तायां काव्यरचनायाञ्च तं न्ययुङ्क्त।

आशैशवात् गृहस्था वृद्धाः याः कथाः श्रावयन्ति स्म, यासां प्रेरणया बाल्य एव कश्चिदश्मखण्डं देवतारूपेण विभाव्य पूजयति स्म, ताः सर्वाः प्रौढस्य नम्बूदिरीपादस्य भक्तिप्रवाहजनितानां कवितानां हेतवोऽभूवन् ।

गतचत्वारिंशद्वर्षेभ्यः श्रीरामकृष्णाश्रमे वसता कवितल्लजेन नम्बूदिरीपादेन परश्शताः रचनाः देववाण्यां कैरल्याञ्च लिखिताः प्रकाशिताश्च । दारिद्र्यतप्तोऽप्ययं कदाचिदपि रमारमणमतिरिच्य कमपि किमपि नायाचत । स्वाराध्यस्य नन्दसूनोः पुरतोऽपि स्वकीयामार्थिकीं स्थितिमधिकृत्य किमपि न प्रार्थितवान् नापि लिखितवान् । कृष्णभक्तिमेव स्वैश्वर्यत्वेन परिगणय्य आत्मारामवत् स्वकीयं जीवनं यापयति कविसार्वभौमोऽयम् ।

दिल्ल्याः देववाणी-परिषदोऽर्वाचीनसंस्कृतसाहित्यप्रकाशनोद्यमस्य शिखरभूतोऽयं प्रयत्नः यत् श्री ओट्टूरउण्णिनम्बूदिरीपादानां कृपया तेषां संस्कृतकृतीनां प्रकाशनं राधाकृष्णरसायनरूपेण सम्पाद्यते। 'केरल साहित्य अकादमी' एतान् पुरस्कारदानेन सम्मान्य यथा स्वगौरवमवर्धयत् तद्वदियं देववाणी-परिषदपि अस्य महानुभावस्य काव्यगुच्छप्रकाशनेन स्वकीयं गरिमाणं सगर्वमुद्घोषयति ।

:- ० :-

श्रीओट्टूरउण्णिनम्बूदिरीपादविरचितं

राधाकृष्णरसायनम्

(डा० रमाकान्त शुक्लः)

'राधाकृष्णरसायनम्' इत्याख्यमिदं भक्तिरसपरिप्लुतं काव्यमर्वाचीनसंस्कृतसाहित्यस्यानुपमं रत्नमस्ति। राधाकृष्णभक्तिभावितेन कविनास्मिन् काव्ये स्वाराध्ययोः राधाकृष्णयोर्विषये भावाः समुद्गीर्णाः। श्रीमद्भागवत-पद्मपुराण-मत्स्यपुराण-आदिपुराण-ब्रह्मवैवर्तपुराण-देवीभागवतादिपुराणेषु उज्ज्वलनीलमणि - राधिकोपनिषत् - सामरहस्योपनिषद्-विदग्धमाधव, ललितमाधव - नारदपाञ्चरात्र - चैतन्यचरितामृत-गीतगोविन्द सूरसागर - युगलशतक - केलिमाल - प्रभृत्यनेकेषु तत्तद्भाषानिवद्धेषु ग्रन्थेषु च पूर्वकविभिर्वर्णितयोः समाराधितयोश्च राधाकृष्णयोः स्वरूपमत्र समुपश्लोकितमस्ति। क्वचित्कविः राधाकृष्णयोः स्तुतिं करोति, क्वचिच्च तयोर्लीलाः वर्णयति। सर्वमप्येतद् भक्तिरसायने परिणमति। इदं च रसायनं भवमहाज्वरार्तानां कृते स्वास्थ्यदम्। भक्तकविः श्री ओट्टूर उण्णिनम्बूदिरीपादो भगवद्भक्तिं विहाय न किमपि शरणमुररीकरोति—

रोगोऽस्ति शत्रुभयमस्ति विमाननास्ति
मूर्खत्वमस्ति खलतास्ति दरिद्रतास्ति।
सर्वं च मेऽस्ति भगवंस्तव पादमूल-
च्छायां विहाय शरणं न विलोकयामि।

भगवत्कृपाया महत्त्वं गायन् स व्याहरति—

पापश्शुचिर्भवति दुष्टमतिस्सुचित्तो
मूढो विवेचनपटुर्विषयी विरक्तः ।
क्षुब्धः प्रशान्तकरणो भवभाग्विमुक्त-
श्शुष्कश्च भक्तिरसिको भगवत्प्रसादात् ॥

(नन्दकिशोरः, १७-१८)

कविः विद्यातपोऽध्ययनदानजपादीनां तदैव साफल्यं मनुते यदैते भगवद्भक्तिलसिताः स्युः—

विद्यातपोऽध्ययनदानजपादयोऽन्ये
यद्योगतस्सफलतामुपयान्त्युपायाः ।
सद्यस्त्विमे स्युरफला यदसन्निधाना-
दद्याद्धरिः स्वपदि तां रतिमेव मह्यम् ॥

(नन्दकिशोरः, २६)

'अग्निमीले', 'नमः', 'भजे', 'स्फुरतु मे हृदि', 'कदा स्यात्, 'ध्यानश्लोकमञ्जरी', 'पादोपसर्पणम्', भावनापञ्चकम्" 'आत्मनिवेदनम्', 'त्रिमूर्ति', 'नन्दकिशोरः', 'भुजङ्गप्रयातम्' 'नामसङ्कीर्तनम्', राधाविलासः', 'राधाराधनम्', 'क्व ? क्व ? 'नृत्यति', 'सेवे', 'न जाने', 'पादादिकेशान्तम्', 'राधां नमामि' 'राधावैभवम्', 'राधिकास्मान् पुनातु' तथा 'राधिका नः पुनातु' इति चतुर्विंशतिशीर्षकेषु रचितेषु षट्पञ्चाशदुत्तरपञ्चशतसंख्याकेषु (५५६) पद्येषु क्वचित् कविः नराकृतिमुपयुपं श्रीकृष्णात्मकं परं ज्योतिर्नमस्करोति, क्वचित्स्वाराध्यस्य महत्त्वं स्वस्य च लाघवं वर्णयति, क्वचिदात्मनिवेदनं करोति, क्वचिन्नन्दसूनोर्विविधाः कलाः वर्णयति, क्वचिद्राधाया अनन्यप्रेमपरता-समर्पणशीलता-त्यागमयता-विरहसाधना-सात्त्विकतादिगुणानां मनोरमव्यञ्जनां करोति, क्वचिच्च प्रकृतिवर्णनं विविधरसदशाश्चोपस्थापयति । किन्तु प्रत्यक्षरं कवेः भक्तिभावना अनुप्राणिता अस्ति ।

तदित्थं भक्तिभावनामेव जीवनसर्वस्वं मन्यमानः कवि राधाकृष्णौ स्तौति, तयोर्लीलागानं करोति, तयोर्नाम सङ्कीर्तयति । सः कथयति—

ब्रह्मोद्यं कतिचिन्मखं कतिपये योगासनं केचन
ब्रह्मध्यानमथापरे शमदमावन्ये तपश्चेतरे ।
सेवन्तां भवमुक्तये निजनिजाभीष्टेन नानाध्वना
किन्त्वेते वयमत्युदारभगवन्नामैकमाराध्नुमः ।।

(नामसङ्कीर्तनम्, २०)

काव्यस्यास्य वैशिष्ट्यमिदं यच्छ्रीमद्भागवतादिपारायणरता अश्रुतभागवतादिकाश्च पाठका. समानरूपेण आनन्दलहरीषु निमज्जन्ति एतत्पाठकाले ।

कविना 'राधा-विलासे' प्रवन्धरीत्या राधोदन्तः प्रस्तुतः, यो हि लौकिकानां जनानां कृतेऽपि परमरमणायः, भक्तानां कृते तु तस्य कथैव का ? अमुं राधाविलासं पठित्वा श्रुत्वा वा को नामानन्दजाश्रुधौतकल्मषो न भवति ? सचेतसामानन्दाय पद्यद्वयं प्रस्तूयते यत्र राधायाः कृष्णं प्रति अनन्यता व्यज्यते । विरहव्रता राधा कथयति –

आयातु वा गच्छतु वा यथेष्टम्
मां स्तौतु वा निन्दतु वार्यपुत्रः ।
सर्वास्ववस्थास्वपि राधिकेयम्
तुष्टास्मि सिद्धाखिलवाञ्छितास्मि ।।
विसृज्य मां गच्छ विदूरदेशम्
परस्त्रियां स्निह्य यथाभिलाषम् ।
दुरन्तदुःखे क्षिप निर्भयं मां
तथापि मे प्राणपतिस्त्वमेव ।।

(राधाविलासः, १९५, २०४)

राधाविलासं विहाय अन्यत्र सर्वत्रापि स्तोत्रकाव्यं मुक्तककाव्यं वा समुल्लसति यत्र प्रत्येकं पद्यं स्वतन्त्ररूपेण सतां चमत्कारक्षममस्ति । एकैकस्मिन् पद्ये भक्तिरससमन्विताः सर्वे काव्यगुणाः विलसन्ति ।

श्रुतिविमृग्यः सर्वधर्मास्पदं लोकत्रयेशो लोककल्याणार्थं नराकृतिमुपोयिवान् श्रीकृष्णः वपुषा वेषेण वचोभिः कार्यैश्च अत्यन्तं चेतोहरोऽस्ति । सः सर्वा अपि मानवसुलभाः लीलाः करोति । स व्रजे नृत्यति, पशुकुलं चारयति, नवनीतं चोरयति, गोपिका अनुरञ्जयति, गोवत्सपुच्छेषु विलम्बते, गोरसचोरणावसरं प्रतीक्षमाणो गृहाङ्गणे क्वापि निलीय सतृष्णं तिष्ठति, चौर्यार्जितेन वदनान्तरगूहितेन बृहत्तमेन हैयङ्गवीनकवलेन बृंहत्कपोलयुगलः सन् जननीसमीपे तूष्णीं तिष्ठति, मात्रासम्यगलङ्कृतं निजवपुर्दर्पणे निर्वर्णयति, दुस्सहशिरोवेदनार्ताया जनन्या ललाटान्तरे स्निग्धं चन्दनलेपनं करोति, वानरेभ्यो नवनीतं यच्छति । तस्य लीला श्रुत्वा नरः पातकैर्विमुक्तो जायते :—

कोटीभिस्सह योधि मानसभुवां रूपे, व्रजस्त्रीदृशां
कोटीभिः प्रणयेन चुम्बितमशेषाङ्गेषु गौरीपतेः ।
कोटीरेण सभक्तिकं चरणयोस्स्पृष्टं कदाचित्तुला-
कोटीशिञ्जितपादकञ्जमविजाकुञ्जस्थमोजो भजे ॥

श्रुत्वा यस्य नवोद्धृतादिहरणं कंसादिनिष्पेषणं
रासक्रीडनकौतुकं च मधुरोदारं नरस्तत्क्षणात् ।
स्तेयप्राणिवधान्यदारगमनोद्भूतान्महापातका-
न्मुक्तस्सन् नितरां विशुध्यति भजे तं नन्द-
जायात्मजम् ॥

(भजे, ५, ६)

राधाकृष्ण रसायनं कवेः श्रीमद्भागवतानुशीलनस्य सुष्ठु परिचायकमस्ति । 'न जाने' इतिशीर्षकान्तर्गतेषु २०, २२, २३, २४, २५, २६, १७, २८ प्रभृतिषु पद्येषु समागतानामन्तः कथानां विस्तृतविवरणार्थं श्रीमद्भागवतमवलोकनीयम् । दवाग्नेर्वात्याया गरलसलिलाद् व्यालवदनात् तडिद्भ्यः वृष्टिभ्यो दितिजदनुजेभ्यच व्रजजनान् रक्षित्वा श्रीकृष्णः कथं तानशरणानिव तत्याज इत्येताः कथा श्रीमद्भागवतस्य दशमस्कन्धस्य १६, ७, १५, १२, १६, २५, ११, ३६, तमेषु अध्यायेषूपनिबद्धाः सन्ति । कविरयं कियत्या मनोरमशैल्या घटे सागरमेव मातुं प्रभवतीतिसहृदयैरवलोकनीयम् :

दवाग्नेर्वात्याया गरलसलिलाद् व्यालवदनात्
तडिद्भ्यो वृष्टिभ्यो दितिजदनुजेभ्यो व्रजजनान् ।
मुहू रक्षित्वान्ते त्यजति बत यस्तानशरणान्
न जाने सोऽयं किं मृदुलहृदयः किं कठिनधीः ॥

(न जाने/१०)

एवमन्यत्राप्यूह्यम् ।

एतादृशेषु पद्येषु कवेर्भाषायाः समासशक्तिः कल्पनायाश्च समाहारशक्तिरवलोकनीये विद्येते । कविना श्रीकृष्ण-चैतन्य-श्रीरामकृष्णविषयक किंवदन्तीनामपि काव्यात्मकसङ्केतः कृतः—

एतन्महाभावपिपासयैव
कृष्णोऽपि राधाभिनयं वितन्वन् ।
श्रीकृष्णचैतन्यकलेवरञ्च
श्रीरामकृष्णाकृतिमप्यबिभ्रत् ॥

(राधाविलासः १७१)

(अन्यच्च द्र० राधिका नः पुनातु, १२)

श्रीकृष्णस्य राधाभिनयस्य चित्रणमनेकैर्बङ्गला-हिन्दी-संस्कृतादिभाषाकविभिः कृतम् । उपर्युक्तपद्यस्य पूर्णव्याख्यार्थं तत्काव्यमवलोकनीयम् ।

भक्तिभावभरिते ऽस्मिन् काव्ये काव्यमार्गरसिकैराकांक्षिताः सर्वे काव्यगुणा अपि निहिताः सन्ति । भक्तिशृङ्गारवत्सल-रसानामत्र मनोहारि व्यञ्जनं भवति । माधुर्यप्रसादौजोगुणानां यथावसरमभिव्यक्तिः, अलङ्काराणां संगुम्फनम् विविधच्छन्दसां प्रयोगः प्रकृति-चित्रणं, नखशिखवर्णनम्, सुभाषितविधानमित्येवमादीनि काव्योत्कर्षविधायकानि तत्त्वानि अत्र विलसन्ति ।

वात्सल्यवर्णने तु श्रीओट्टूरउण्णिनम्बूदिरीपादः विंशशताब्दिकः संस्कृतभाषायाः 'सूरदास' इव प्रतीयते । वालक-श्रीकृष्णस्य वाल्योचिताः समस्ता अपि चेष्टास्तेन चारु चित्रिताः । दिङ्मात्रमुदाह्रियते.-

रिङ्गन्नन्दवधूगृहेषु करयोर्जान्वोर्युगाभ्यां मुदा
सुस्मेरं शतपत्रचारुनयनं कादम्बिनीसुन्दरम् ।
स्वस्याङ्गं प्रतिबिम्बितं मणिमये तत्कुट्टिमे प्रस्फुटम्
दृष्ट्वा मोहितधीस्तदाशु बहुशश्चुम्बञ्छिशुर्भातु मे ॥

(ध्यानश्लोकमञ्जरी, ११)

वियोगशृङ्गारस्यात्यन्तं निर्मलाभिव्यक्तिरेतत्काव्ये 'राधाविलासे' कर्तुं शक्यते । अद्भुतरसस्याभिव्यक्तिः 'न जाने' इत्यत्रान्यत्र च कर्तुं शक्यते । किन्तु सर्वातिशायी भक्तिरसस्तु सर्वत्रैव अस्वादयितुं शक्यते ।

प्रकृतिचित्रणमपि यथावसरं सचेतसां चित्तानि हरति । पश्यन्तु सहृदयाः—

'साटोपनृत्तैः शिशिखिमण्डलाना-
मत्युच्चगीतैः पिकसञ्चयानाम् ।
स्वच्छन्दचारैर्हरिणव्रजानां
रराष्टि वृन्दावनपुण्यभूमिः ॥

क्वापि श्रुतिर्मत्तमधुव्रताना
मेकत्र गीतं कलकोकिलानाम् ।
अन्यत्र तालो गिरिनिर्झराणां
राराष्ट्यहो यामुनरम्यदेशः ॥

मञ्जुप्रणादैर्गिरिनिर्झराणां
मन्दप्रयाणैर्मलयानिलानाम् ।
लीलाविलासैर्वनवल्लरीणां
वृन्दावनं रञ्जयतीन्द्रियाणि ॥

(राधाविलासः, ६१-६३)

सूक्तिविधानमपि यथावसरं दृग्गोचरीकर्तुं शक्यते । प्रायः सुभाषितेषु भक्तिभावस्य माहात्म्यमेव समुन्मील्यते कविना यथा—

सोऽयमेव विरलं पुरुभाग्यं
सोऽयमेव परमः पुरुषार्थः ।
यो निरन्तहरिस्मृतिहेतो-
स्सन्ततः प्रणयबाष्पविमोक्षः ॥

औन्नत्यं किमुदारदेशिकपदे साष्टाङ्गपादा नति-
स्सम्पत्का जगदात्मने भगवते निश्शेषवित्तार्पणम् ।
मुक्तिः का मुरवैरिभक्तिनिगडैर्नित्यानुबद्धस्थिति-
स्सौख्यं किं हरिविप्रयोगकदनादत्युत्कटं रोदनम् ।

(राधाविलासः १७५, १७७)

भाषायां प्रसादगुणः सर्वत्र साक्षात्क्रियते । दीर्घसमासयुतायां वा, लघुसमासयुतायां वा, समासहीनायां वा भाषायां सर्वत्रापि कोमलभावानुरूपिणी प्रासादिकता विलसति । स्रग्धराशार्दूलविक्रीडित पृथ्वीसदृशेषु दीर्घवृत्तेषु इन्द्रवज्रा-तोटकादिषु लघुवृत्तेषु च भाषाया समस्तं व्यस्तं च उभयमपि रूपं

कवेर्वशंवदमिव तिष्ठति । क्वचित्सम्पूर्णमपि पादमेकमेव समस्तपदं व्याप्नोति, क्वचिच्च मुक्ताफलानीव व्यस्तानि पदानि सचेतसां चेतांसि हरन्ति । यथा—

समस्तपदावली

मन्दस्पन्दिमनोज्ञचिल्लिलतिकासंरञ्जितालोकनं
मञ्जुस्यन्दिमनोहरस्मितसुधामज्जन्मुखाम्भोरुहम् ।
सच्चिद्गन्धि सुनीलकान्तिलहरीपोप्लूयमानाङ्गकं
वन्दे नन्दगृहाङ्गणप्रणयिणं ब्रह्माण्डकोटीश्वरम् ॥

(नृत्यति, ८)

मुहुर्मन्दस्पन्दिभ्रुकुटिरुचिरापाङ्गविहृति-
र्मधुस्पन्दिस्मेरस्फुरदधरसंचुम्बिमुरलिः ॥

(न जाने, ५)

वेदवेदान्तशास्त्रागमान्वेषितं
राधिकादोर्लतापल्लवाच्छादितम् ।
भक्तिवैवस्वतीस्निग्धकुञ्जस्थितं
शक्रनीलत्विषं बालकं भावये ॥

(भावनापञ्चकम्, ४)

असमस्तपदावली

कृष्णः किं द्वारवत्यां भवति किमु ततस्सोऽद्य कुत्रापि यातः
का वा तं स्नेहपूर्वं परिचरति सदा तस्य किं क्षेममेव ।
वृन्दारण्यं कदा वा पुनरपि भगवानाव्रजेदित्यशेषान्
पृच्छन्ती मौनभङ्ग्या श्वसनविलपनैः राधिकाऽस्मान् पुनातु ॥

(राधिकाऽस्मान् पुनातु, ४)

किं वा करोमि क्व नु वा व्रजामि
कं वा स्फुटं वच्मि कथं ब्रवीमि ।
आधिं ममान्तर्हृदये ज्वलन्तं
वेत्तुं विदग्धः किमु मानुषोऽस्ति ॥

(राधाविलासः, ६४)

भक्तिसुधापरिपूरितस्यास्य काव्यस्य रमणीयत्वं सम्पादयितुं यद्यपि भक्तिभावमतिरिच्य न चित्रविचित्रा अलङ्कारा अपेक्ष्यन्ते तथापि भक्तिभावेन आत्मानं संयोज्य स्वशोभां वर्द्धयितुमिव अहमहमिकया अनेकेऽपृथग्यत्ननिर्वर्त्याः स्वाभाविका अलङ्काराः अत्र सम्प्राप्ताः। यमक-लाटानुप्रास-उपमा-रूपक-उत्प्रेक्षा-अतिशयोक्ति-विभावना-सन्देह -व्यतिरेक-विरोध - उल्लेख - विषम-स्वभावोक्तिप्रभृतीनामलङ्काराणां निसर्गरमणीयः प्रयोगः सहृदयानां पूर्वकविप्रणीतविविधग्रन्थामृतास्वादनक्रीडादुर्ललितानि मनांसि हर्तुमलमस्ति। व्यतिरेक-आस्वाद्यतां सहृदयैः

खलानां हृदि त्राससम्भ्रान्तकारी
सतां चेतसस्सर्वभीतिप्रणाशी ।
मृतानां स्वदंशैरमर्त्यत्वदायी
निशीथेषु कश्चिद् भुजङ्गः प्रयाति ॥
महामोहहालाहलग्रासदक्षो
बहुस्वादुकैवल्यपीयूषवर्षी ।
सदा कुण्डलिन्या समन्विष्यमाण-
स्सदानन्दरूपो भुजङ्गः प्रयाति ॥

(भुजङ्गप्रयातम्, १-२)

उल्लेखच्छटां निभालयन्तु सहृदयाः

अविद्यापदे कालपाशायमानो
व्रजस्त्रीगले स्वर्णसूत्रायमानः ।
त्रयीमस्तके रत्नमालायमानो
महाश्चर्य एको भुजङ्गः प्रयाति ॥
(भुजङ्गप्रयातम्, ५)

यथा वा

दम्भोलिर्दुरिताचलेन्द्रशिखरे, मायामरौ शाद्वलो
भानुर्मोहमहान्धकारनिकरे, कामामये भेषजम् ।
सेतुर्मृत्युपयोनिधौ, हिमकरो जीवौषधीमण्डले
पीयूषं सुजनानने च तदिदं राराष्टि नामाक्षरम् ॥
(नामसङ्कीर्तनम्, १३)

'ध्यानश्लोकमञ्जर्यां' 'स्फुरतु मे हृदि' इत्यादिशीर्षकेषु निबद्धेषु पद्येषु स्वभावोक्तिरवलोकनीया विद्यते । बालकश्रीकृष्णस्य वर्णनं कुर्वन् कविः कथयति

मातुः पार्श्वे शयित्वा स्फुरदधरपुटेनास्थया स्तन्ययूषम्
कर्णाभ्याञ्चात्ततृष्णं सरसशुभकथास्सम्पिबन्यामिनीषु ।
मन्दं स्निग्धेन तस्याः किसलयमृदुना पाणिना ताडितोरु-
र्निद्राक्रान्तो निरीहो मुकुलितनयनश्चाभवन्नित्यबुद्धः ॥

भूमावर्पितपाणिजानुयुगलस्यार्कं नमस्कुर्वतः
श्रद्धालोर्जनकस्य पृष्ठमधिरुह्यावस्थितस्सस्मितम् ।
रे रे मत्तगज ! द्रुतं चल चलेत्याज्ञापयन्नोजसा
तं भूयः प्रहरन् करेण च पदा चाव्याद्व्रजेशात्मजः ॥
(ध्यानश्लोकमञ्जरी ६, १३)

सन्देहालङ्कारं 'न जाने' इतिशीर्षकान्तर्गतसङ्कलितेषु पद्येषु अन्यत्र च साक्षात्कर्तुमर्हन्ति सचेतसः। तद्यथा

मन्दानिलः किं कलकोकिलः किं
चन्द्रोदयः किं शरदागमः किम्
रोमोत्सवः किं प्रणयाम्बुधिः किं
प्रादुर्भवत्यद्भुतमूर्तिरेका ॥

(राधाविलासः, २८)

यथा वा

किमु ज्योत्स्नायूषः किमु शिशिरकर्पूरसलिलम्
किमु क्षीरासेकः किमु सुविकसत्कुन्दकुसुमम् ।
किमु स्नेहोल्लासः किमु विमलमुक्तामणिगणो
न जाने केयं या स्फुरति सितकान्तिः शिशुमुखे ॥

(न जाने, ६)

एवमेवान्येषामप्यलङ्काराणामुदाहरणानि द्रष्टुं शक्यन्ते।

छन्दोविधानम्

कविनाऽस्मिन् काव्ये अनुष्टुबिन्द्रवज्रोपेन्द्रवज्रा-तोटक-पृथ्वी-भुजङ्गप्रयात-मालिनी-वसन्ततिलका-शार्दूलविक्रीडित-शालिनी-शिखरिणी-स्रग्धरा-स्रग्विणी-स्वागतेति चतुर्दश वर्णवृत्तानां प्रयोगो व्यधायि। सर्वाधिकमिन्द्रवज्रा प्रयुक्ता। तस्यां षडशीत्युत्तरैकशतं (१८६) पद्यानि रचितानि। तत्तद्वृत्तेषु रचितानां पद्यानां संख्येत्थमस्तिः- अनुष्टुप्-२, इन्द्रवज्रा-१८६, उपेन्द्रवज्रा-१८, तोटकम्-१२, पृथ्वी-१०, भुजङ्गप्रयातम्-३३ मालिनी-१९, वसन्ततिलका-४४, शार्दूलविक्रीडितम्-११८, शालिनी-२०, शिखरिणी-३५, स्रग्धरा-५३, स्रग्विणी-५, स्वागता-१। छन्दोरचनायां प्रायः कविना यतिमनुरुद्ध्यैव पदविन्यासः कृतः। दिङ्मात्रमुदाह्रियते पृथ्वीवृत्ते निबद्धं पद्यमेकं यत्र अष्टसु नवसु च वर्णेषु यतिः पाल्यते :—

कृपानिलविलोलिता (८) व्रजविलासिनीलालिता (९)
विलासनवपल्लवा (८) मृदुलहासपुष्पोत्करा (९)
श्रुतिभ्रमरमार्गिता (८) मुरलिकाशुकीकूजिता (९)
विकर्तनसुतातटे (८) लसति कापि सच्चिल्लता (९)

(नम:/१)

अत्यन्तं विरलानि तान्युदाहरणानि यत्र यतिस्थाने कस्यचिच्छब्दस्य सम्पूर्णता न भवति यथा

'फालेजत्कुटिलालकस्सुरुचिरा (१२) पाङ्गे यशोदागृहे

(ध्यानश्लोकमञ्जरी, ३)

अत्र शार्दूलविक्रीडिते द्वादशवर्णेषु 'सुरुचिरापाङ्ग:' इति शब्द: पूर्णतां न याति, अपितु तस्य भङ्गो भवति। प्राय: कविना दीर्घसमासपदावल्यामपि यतिस्थाने शब्दानां पूर्णता परिपालिता; यथा

व्यालोलत्पोतचेल (७)/स्वरसपरिगलत् (७) /स्मेरलीलावलोक: ।

(ध्यानश्लोकमञ्जरी/३०)

अत्र सप्तसु वर्णेषु शब्दा: पूर्णा: सन्ति। उच्चारणकर्ता सौविध्येन स्रग्धरां पठितुं शक्नोति। समस्तपदावलीमेकश्वासेऽपि प्रस्तुवन् पाठक: उच्चारणे प्रासादिकतां रक्षितुं समर्थ:। इत्थं कवेश्छन्दोविधाननैपुण्यं स्पष्टमेव सिद्ध्यति।

वस्तुत एतादृशस्य भक्तिकाव्यस्य समीक्षणार्थं काव्यशास्त्रेषु आचार्यैर्निदिष्टा समीक्षामानदण्डा एव सर्वथा प्रमाणं न भवन्ति; अस्य आस्वादनार्थं तु भगवद्भक्तिसुधासिञ्चितं निष्कलुषं हृदयमेव प्रमाणं भवति। अस्मत्सदृशो लौकिको जन एतस्य काव्यस्य समीक्षणे सर्वथा असमर्थ एव सिद्ध्यति।

स्वातन्त्र्योत्तरं संस्कृतकाव्यम्[1]

(डा० रमेशचन्द्र शुक्लः, एम० ए०, पीएच०डी०, साहित्याचार्यः, सांख्ययोगाचार्यः)

अद्य संस्कृतभारती भारतीयसंविधानस्य चतुर्दशभाषास्वन्यतमा भारतीभूत्वा विभाति। इयं भाषा धर्मार्थकाममोक्षप्रतिपादयित्री भाषास्ति। इयं भाषा अस्माकं भारतीयानां श्रुति - स्मृति-दर्शन - पुराण - शास्त्रेतिहासादीनां भाषास्ति। सर्वेऽप्यस्मदीया आचारा इह चकासत्यतः श्रुतिसमयादेवानारतं भारतं स्वकीयेन लोकोत्तरेण प्रभावप्रकाशेणालोकितं कुर्वाणा समुद्द्योतते। सा भारतीयस्य जनस्य मानसे मणिमालायां सूत्रमिव प्रवते। स्वकीयं किमप्यनिर्वचनीयमैक्यविधायकं संगठनात्मकं वर्चो भारताजिरे वितन्वन्त्या भाषायाः एतस्याः लक्षशो वर्षाणि व्यतीतानि। इयं भारतीयं साहित्यं प्राणवद् विदधती सततं युगानुकूलाः प्रवृत्तीः आत्मसाच्चानुतिष्ठन्ती गतेऽनेहसि यथा प्रेक्षिता बभूव तथैव वर्तमानेऽपि काले सम्प्रेक्ष्यते। परं हन्त, चिरन्तनात् कालादस्माभिः स्वकीयायां दृष्ट्यां तादृशोऽभ्यासो हि समुत्क्षेपितोऽस्ति यादृशो न कदापि पुरातनेऽने-

---

१. लेखोऽयं 'देववाणी परिषद्, दिल्ली' संस्थायास्तत्त्वावधाने समायोजितायाः आचार्यश्रीब्रह्मानन्दशुक्लस्मारकव्याख्यानमालायाः प्रथमपुष्पस्वरूपेण ३०-१-१९८२ तारिकायां प्रस्तुतोऽभूत्।

हसि तत्र दृष्टोऽभवत् । एतस्मात् कारणदस्मदीया दृष्टि-र्नितरां सीमिता जातास्ति । सा प्राचीन एव संस्कृतसाहित्ये विचरन्ती सदैव प्राप्यते, न नवयुगस्य संस्कृतसाहित्यं द्रष्टुमुत्सहते, न स्वप्नेऽपि तत्रात्मानं मनागप्यावर्जयन्ती समुपलभ्यते । अद्यतनं संस्कृतसाहित्यं यामानन्दकारिणीं सुषमां विकिरति तां पातुमस्माकं मानसे भावनैव नोदेति । दोषादेतस्मादेतदर्वाचीनं संस्कृतसाहित्यं या नवनवा मधुर-मधुराः प्रवृत्तीः परिपुष्णाति तास्वेकान्तत आत्यन्तिकया च वयमनभिज्ञाः स्मः । वत, यदस्मदीयमिदमाधुनिकं संस्कृत-साहित्यं दशसहस्रपृष्ठाभिव्यापि परमविस्तृतं विपुलं सौन्दर्यं परिगृह्य परिस्पन्दते तदनुन्मुखत्वाद् वयं महतीमेव हानिं तां गताः स्मो यस्या हानेर्ज्यायिसी कदाचित् कापि हानिर्नं भवितुं शक्यास्ति ।

अहं भवतां सर्वेषामपि विदुषां सेवायां सादरमिदं निवेदयितुमुत्सुकोऽतितरामस्मि यदस्मदीयमिदमाधुनिकं साहित्यं, यदष्टादशशतकान्निरन्तरं स्वीयां श्रेयस्करीं प्रेयस्करीञ्चाभामाविर्भावयद् विलसति, अनेकानेकगौरवश्री-समुल्लसितभावधाराः उद्भावयन्मुदा समुद्भासते । अत्रा-वदाता वदान्या पावनवायवो वान्ति । अत्र नूतना गति-विधयो दिव्यां शक्तिं निधाय विचरन्ति । अत्र सर्वत्र स्फूर्तिः शोभतेऽत्र सर्वत्र जागरणं जीवनस्य नवीनमेवोजः प्रकटीकृत्य समुच्छलति । अत्र गहनमोहतिमिरविध्वंसनक्षमाः परम-पेशलप्रकाशरश्मिततयो राजन्ते । अत्रत्या लोकोत्तराः शैत्याह्लादामृतवर्षिसुधाकररश्मय इव काव्य-रूपकाख्या-यिकाकथास्तोत्रव्यङ्ग्य - नीति-हास-सूक्ति-राष्ट्रगीत-संवाद-प्रशस्तिमुक्तकादिका रमणीया रचनाः सन्ति स्वान्तप्रमोदिन्यः

शेमुषीवर्द्धिन्यः परमानन्ददायिन्योऽखिललोकाराधनीया भूत्वा विश्वसाहित्यसंसारे चारुचूडामणयः ।

मान्या मनीषिणो विदन्त्येव यच्चतुरशीत्युत्तर-सप्तदशतमेशवीयाब्दादेकोनविंशत्यधिकैकोनविंशतिमेशवीयवर्षं यावत् संस्कृतसाहित्यं जीवनर्वातिषु सर्वेष्वपि पक्षेषु परमाह्लादमयानि तत्त्वानि विकीर्यं सचेतसां जगतीं नितरामेवाप्रीणयत् । चेद् वयमाधुनिककालस्य गौरवमप्यनेकानेकभव्य-भावार्णवमनुसन्धातुमनसः स्मस्तदोपरिनिर्दिष्टशतकोद्याने विहरेम । नूनमस्मदीयस्याधुनिकस्य संस्कृतसाहित्यस्य नव-जागरणकारीतिहासोऽसावतितरामेव गरिम्णा गरीयान् महिम्ना च महीयान् वर्तते । तदा तस्मिन् . नवजागरणे विद्रोहप्राणचापल्ययोर्निशितं रंहः पर्यलक्ष्यत ।

निश्चप्रचतया चतुरशीत्यधिकसप्तदशतमेशवीयाब्दोऽद्भुतामेव महत्तामभिव्याप्य देदीप्यते । धर्मशास्त्रस्य प्रामाणिकानां ग्रन्थानां सङ्कलनं बभूव तस्मिन्नेव निर्दिष्टे वर्षे, एतावदेव न, अयमेव कालोऽसौ यदा श्रीमद्भगवद्गीताया अनूदिता कृतिर्या चार्ल्सविल्किन्समहानुभावेन प्रस्तुतीकृता, समग्रे यूरोपे विस्मयावहं कोलाहलमजीजनत् ! अयमेव सः कालो यः संस्कृतसाहित्यस्य हितोपदेशेन शाकुन्तलेन च सर्वामपि प्रतीच्यां जगतीमावर्जितां व्यदधात् ।

आधुनिकं संस्कृतसाहित्यं विंशे हि शतके मेधाविनः साहित्यकाराः प्रकृष्टयैवोत्कर्षश्रिया समुदनीनमन् । तदा सुधाकरद्विवेदी, हृषीकेशो भट्टाचार्यः, अम्बिकादत्तव्यासः, अप्पा शास्त्री राशिवडेकरः, गणपतिशास्त्री, महेशचन्द्रतर्कचूडामणिः, अन्नदाचरणस्तर्कचूडामणिः, कुप्पूस्वामी शास्त्री, लक्ष्मणसूरिः, मानविक्रम एट्टन तम्बुरानः, पुन्नशेरिनीलकण्ठशास्त्री,

रामावतारशर्मा, विधुशेखरभट्टाचार्यः, चण्डमारुतः, श्रीनिवासशास्त्री, मधुसूदनझा, गङ्गनाथझा, केरलवर्म वलियकोइतम्बुरानः, बालशास्त्री, वेङ्कटराघवाचार्यः, पञ्चपागेशशास्त्री, श्रीश्वरविद्यालङ्कारः, तर्कभूषणप्रमथनाथः, तिरुमलाचार्य,ः श्रीनिवासाचार्यः, वेल्लाकोण्डरामरामः, सुब्रह्मण्यशास्त्री, कृष्णमाचार्यः, प्रतिवादिभयङ्करोऽनन्ताचार्यः, पद्मनाभाचार्यः, शङ्करलालः, पेरुकाशीनाथशास्त्री, तिरुनारायण आयङ्गरः, राजवर्मराजकोइतम्बुरानः, कुञ्जनवारियरः, अन्ये च बहवः साहित्यकारा आधुनिकसंस्कृतगगनमण्डले समशोभन्त । एकस्मिन्नेव दशके यावतः साहित्यकारान् प्राप्तुं संस्कृतसाहित्यं सुकृतमविन्दत् तावत् कदापि न तदुत्तरकालस्तदधिगमनाय सौभाग्यश्रियमासादयत् ।

एतस्य वर्तमानस्य युगस्येयं विशिष्टतापि समिद्धा भूत्वा प्रादुरभवत् यद् धर्मसाहित्य-शिक्षा-समाजक्षेत्रेषु नूतन एव भाव उद्वेल्लितः समजायत ।

सम्प्रति काव्यस्य शैली विषयवस्तु च युगपदेव पर्यवर्ततेताम् । जातीयजीवनस्य सर्वेष्वपि क्षेत्रेषु कल्पना विहारिणो भक्ताः संस्कृतकवयो नवीनेन स्वरेण संस्कृतसाहित्यसंसृतिं गुञ्जयन्तः समवाप्यन्त । धार्मिकाणामादर्शानां युगानुकूला व्याख्यानवरतमाधुनिके संस्कृतसाहित्ये प्रवेष्टुमुपासरत् । बुधवरेण्याः स्वस्वकृतिभिर्भारतीयस्याभारतीयस्य च हृदयेषु आशामुत्सुकतामाह्लादञ्च संचारयन्तो जीवनं ज्योतिर्मयं चक्रुः । साम्प्रतं कल्पना परमार्थतायां धर्मः कर्मणि च प्रीत्या अमिलताम् । एतद्विधं सौन्दर्यमाधुनिकं संस्कृतवाङ्मयं विशिष्टया शोभया विचित्रया च चारुतया भृशं व्यभूषयत् ।

आधुनिकात् काव्यसाहित्यात् प्राग्वर्ति काव्यसाहित्यं सुरा-सुन्दरी - जलविहार-प्रणयकलह - दूतीसम्प्रेषणादिविषय-कोन्मादपूर्णशृङ्गारसंश्लिष्टवातावरणादात्मानं दूरीकृत्य न कदापि स्थातुमशकत्, परमेतदाधुनिकं संस्कृतसाहित्यं स्वजनुष-क्षणा्, तत्र शृङ्गारे विरजस्कतामदीदृशत् । आधुनिकस्य संस्कृतसाहित्यस्य स्रष्टारो राष्ट्रियतायां, सामाजिकजीवनो-त्थापने, रूढीनां विनाशने, मानवताया विकासने, जनजनमानसे देशभक्तेः समुपस्थापने, एकतायाः संगठनस्य च विविधानामु-पादानानां सञ्चयने, विश्वजनीनाया भावनाया बीजानां वपने प्राकृतिकसुषमायाः वर्णने परमोत्साहमादाय संलग्ना अभूवन् । कवयो मानवीयान् समुज्ज्वलान् विचारान् प्रवा-हयन्तः समाजस्य साहित्यस्य च प्राचीनानि बन्धनानि समूल-मुच्छेत्तुं निरता भवन्तो जाति-समाज-राष्ट्रहितकारीणि तत्त्वानि स्वकीये संस्कृतसाहित्ये समावेशयितुं समलगन् । देशीय-देशान्तरीयविविधसाहित्यिककृतीनामध्ययेन संस्कृतसाहित्य-कर्तारो नवां भावभुवमासादितवन्तः । सा हि तत्प्रणीतासु कवितोपन्यासाख्यायिकाचम्पूचरितकाव्य-गीतिकाव्य - निबन्ध नाटकालोचनादिषु स्फुटतयैव परिलक्ष्यते । भूयस्यः साहित्यिक-विधास्ताः प्रादुरभवन् याः न प्राक् कदापि विलोकिताः अजायन्त ।

यद्यपि स्वातन्त्र्यप्राप्युत्तरकालगामि यत् संस्कृतभारत्यां साहित्यं विरचितमभूत् तस्यैव चित्रणमद्यतनस्यैतस्य प्रस्ता-वस्याभीष्टं लक्ष्यं वर्तते परमिदं स्वतन्त्रतावाप्तिसमयोत्तरकाल-समुद्भूतं संस्कृतसाहित्यं स्वप्राग्वर्तिकालप्रवाहिण आधुनिकात् संस्कृतसाहित्यादेव प्रेरणामध्यगमत् स्वहृदयप्रियाण्युपादा-नानि च लब्धुं सौभाग्यमविन्ददतः स्वातन्त्र्यप्राप्तिकालात्

प्राग्वर्तिकाले यदाधुनिकं साहित्यं संस्कृतभाषायामवातरत् तत्र विराजमानायाः स्वदेशानुरागितापरकायाः कमनीयतायाः स्वकीयां दृष्टिं व्यावर्तयितुं न वयं क्षमा अभवाम। एतस्मात् कारणात् तस्या हृदयाभिरामाया निरवद्याया रमणीयतायास्ता-वन्मात्रायां वर्णनं वा गानन्तूचितमेव सर्वथा यावताभिमतेन समुपन्यासनेन स्वतन्त्रताधिगत्यनन्तरं सृष्टस्य संस्कृतसाहित्यस्य मध्ये प्रवहमानां सुधां पातुं पर्याप्ता शक्तिरुपलब्धा भवितुमर्हति।

हन्त, अद्य वयं कालिदास-भवभूति-भारवि-माघ-मुरारि-वाणादीनेव कतिपयान् साहित्यकारान् जानीमः, परं न विद्म-स्तेष्वल्पानपि येऽस्मदीय एवानेहसि जायन्ते स्म। अविद्याः सन्तोऽपि रामभक्ता अस्मत्काल एव सञ्जातेषु रामचरित-गायकेषु कविषु कदापि दृष्टिमपि न क्षिप्तवन्तः।

अस्मदीय एवास्मिनाधुनिके काले विरचितेषु काव्येषु रामचरितवर्णनपराणि राघवीय-श्रीरामविजय-रामचरित-राम-रसार्णवाभिनवरामायणदीनि काव्यानि महाकाव्यानि भवन्तो विपश्चिद्वंद्या विलोकयन्तु। कृष्णचरितवर्णनपरेषु काव्येषु वटपल्लिभास्करनमूत्ततकृतं वासुदेवचरितं, लक्ष्मणसूरिरचितं कृष्णलीलामृतं, रामनाथस्य वासुदेवविजयं, बालकुन्ननवासुदेव-नम्बूदिरीप्रणीतं च रासविलासं बुधवरेण्याः प्रेक्षन्ताम्। श्रीविश्वेश्वरपाण्डेयप्रणीतं मदनमञ्जरीनामानमुपन्यासम्, उपन्यासकारबङ्किमबाबूविरचितान् संस्कृतभाषायामनूदितान् उपन्यासान्, शङ्करलालमहेश्वरविरचितान् अनसूयाभ्युदय-भगवतीभाग्योदय– चन्द्रप्रभाचरिताख्यानुपन्यासानीक्षन्ताम्। चरितानि च चारुचारुतराणि संस्कृतसाहित्ये साम्प्रतिके बाल-शास्त्रिचरित-महर्षि विरजानन्दचरित-जार्जदेवचरित-श्रीकृष्णा-

भ्युदयाभिधान्यनेकानि जीवनचरितानि विज्ञवराः पश्यन्तु । भावनात्मिकासु लघुकथासु छायापथ-विप्रलब्धा-विषमसमस्यादिकाः, हास्य-व्यंङ्ग्यपरकेषु ग्रन्थेषु दर्दुरविलाप-व्यसनविमोक्ष-क्षुत्कथादिकान् सरसान् ग्रन्थान्, शास्त्रीयप्रवन्धेषु च चिकित्सानुशासन--व्याकरणोपक्रमणिका--रागकल्पद्रुम--वेदान्तसार - चित्रप्रदीप - व्यवस्थासारसमय – व्रात्यसंस्कारमीमांसापाकतत्त्व-स्वप्नलब्धभारतेतिहास-वैदेशिकनीति - भूगोलविवृतिधनुर्विद्या - क्षेत्रतत्त्वदीपिका - ज्योतिर्गणितादिप्रवन्धान् प्रव्यः पठन्तु । प्रहसनेषु हास्यार्णवप्रहसनशङ्करविवाहादीनि, प्रकरणेषु आत्मवलीपरिणय-कौमुदीसुधाकरादीनि, व्यायोगेषु त्रिपुरविजयव्यायोगादीनि धीमन्त ईक्षन्ताम् । किं बहुना, सर्वविधानामपि रूपकाणां नाटिकानाम्, एकाङ्कनाटकस्य, गीतिनाट्यस्य, छायानाटकस्य च रचनाः सञ्जाताः । भावप्रवणगद्यकाव्यं सामान्यतस्त्रिवर्गेषु विभक्तं कर्तुं शक्यम् । राष्ट्रियभावनाविभावितगद्यग्रन्थेषु राष्ट्रियोपनिषदं, आश्रयदातृमहिमनिरूपकेषु वञ्जिम-महाराजस्तवं, देवीदेवतास्तुतिकारिषु शिवताण्डवदण्डक-ललिताम्बिकादण्डकादिगद्य-काव्यानि कोविदेन्द्राः निरीक्षन्ताम् ।

आधुनिकसंस्कृतसाहित्यस्य लेखकानां तद्रचितानां रचनानाञ्च नामान्येव भूयांसि पृष्ठान्यपेक्षन्ते । तेषां संक्षिप्तपरिचयार्थं तत्कृतिवर्णितविषयनिर्देशनोद्देश्यार्थंञ्च चेदुपक्रम इह कृतः स्यात् तदा महान् ग्रन्थ एकः करणोयत्वेन समुपतिष्ठेत्, अत एतावदेवात्रोल्लिख्य सन्तोषो विधीयते । स्वातन्त्र्यप्राप्तिकालोत्तरकाले यद् विपुलं संस्कृतसाहित्यं सूरिभिः कृतं तदात्मसात्कर्तुं विहितोऽयं श्रमोऽभिमतां शक्तिं प्रयच्छेदिति विश्वसतातः परस्तादिदानीमुपस्त्रियते ।

ऋषिवेदग्रहब्रह्मेशवीयाब्देऽस्माकं भारतं परतन्त्रतातो विनिर्मुक्तं भूत्वा स्वतन्त्रता-समीरे श्वासं ग्रहीतुं भगवदनुकम्पया सौभाग्यमविन्दत् । स्वतन्त्रतावाप्तितो हि यः समयोऽयं प्रचलितस्तमेव कालं वयं स्वकीयमाधुनिकं कालं मन्यामहे । एतस्मिन् आधुनिकेऽनेहसि संस्कृतसाहित्ये ताः सर्वा अपि प्रवृत्तयः प्रतिलक्षिता जायन्ते या देशे सर्वत्र वितताः सन्ति । अद्य जना. सन्ति स्वार्थपरा भूयांसः । ते स्वकीयं प्रयोजनं पूरयितुं देशमपि हानिगर्ते निपातयन्ति । अद्य यो भीषणो भ्रष्टाचारो देशस्य वीथ्यां वीथ्यां प्रसृतो दृश्यते तस्य कारणमपि वयमेव देशवासिनः स्मः । अस्माकं मध्ये तेषामेव जनानां संख्यास्ति विपुलतरा येषु नैतिकस्य चरित्रस्य पतनं पराकाष्ठां गतमस्ति । न शुद्धहृदयः सन् मनुष्यः प्रायेण मनुष्ये मिलति । ते मानवाः सन्तीह नाधिका येषु मानवता वीक्षिता भवेत् । आत्मीयता आत्मीयेष्वपि न प्राप्ता भवति । अनेन पुंसा यदुक्तं तत् तथैव इत्येतदात्मकः प्रश्नस्तदभिहिते वाक्ये समुपस्थापित एव क्रियतेऽस्माभिः । साम्प्रतमस्मदीये समाजे त एव जना अधिकसंख्यायां प्राप्यन्ते य वचसि मनसि कर्मणि च नैकरूपाः सन्ति । समाजे तेषामेव जनानां प्राचुर्यं दृश्यते येऽस्मान् विविधतया विप्रलभन्ते । क्व विश्वासः कार्यः क्व न इत्येषा हि समस्या द्रढीयसी गरीयसी च भूत्वास्माकं पुरः सदा नरीनृत्यति । एतासां शोचनीयानां स्थितीनां दर्शनं स्पष्टतयैवाधुनिकानां संस्कृतकवीनामपि कवितासु प्राप्तं भवति । अद्यतनी राजनीतिर्नानाविसङ्गतीनामास्पदं भूत्वा परिस्पन्दते । इमां राजनीतिं प्रति वर्तमानकालस्य साहित्यकारो घोरमाक्रोशं निदधाति । वस्तुत आधुनिकं संस्कृतसाहित्यं वर्तमानस्य

समाजस्य पतनोत्थानगाथामुच्चैर्गायच्छ्रूयते । तत्र विद्यमानानां सर्वविधानामपि भावनानां समावेशो दृश्यते ।

स्वतन्त्रताधिगमनानन्तरं राष्ट्रे नूतनैका चेतना समुदिता संलक्ष्यते । राष्ट्रियचेतनाया राष्ट्रियचिन्तनस्य च क्षेत्रे महदेव परिवर्तनं सञ्जातमस्ति । तद्धेतोर्देशे नवस्य युगस्यावतारणा जातास्ति । भारतस्य भाषासु हिन्द्यादिषु तत्तद्भाषायाः साहित्ये साहित्यकारेषु च सुस्पष्टः प्रभावो तथा लक्ष्यते तथैव संस्कृत-साहित्यकारेषु च तदीयः प्रभावः परिस्फुरन् संलक्ष्यते । श्रीडा० राजेन्द्रमिश्रविरचिते स्वदेशवन्दनगीते राष्ट्रियचेतना स्वदेशं प्रणमन्ती तद्गौरवं निवध्नन्ती दृग्गोचरीभवति—

सलिलं सुधामधुरितं पवनोऽपि गन्धवाही ।
चरितं विकल्पकलितं धर्मो दयावगाही ॥
यत्प्राङ्गणं शबलितं कौतूहलैरशेषम् ।
वन्दे सदा स्वदेशम्, एतादृशं स्वदेशम् ॥

राष्ट्रप्रेमपरिवेष्टितहृदयोऽयञ्च जनः कदापि स्वभारतभुवमित्थ-मवन्दत—

वन्दामहे भरतभूमिमिमां मनोज्ञां
ज्ञानप्रकाशमकिरन् ऋषयो हि यस्याः ।
विश्वाजिरे हिमगिरीन्द्रसुशोभितायाः
मन्दाकिनीसलिलसन्ततपावनायाः ॥
धन्या धरासु सकलासु धरास्मदीया
यत्रावतीर्य पुरुषोत्तमरामचन्द्रः ।
योगेश्वरो विदधतुः श्रुतिमार्गरक्षां
कृष्णश्च साधुहितपोषणलग्नचित्तः ॥

आध्यात्मिकी दुरितनाशनदक्षचर्चा
गङ्गातटेषु सततं हरिमन्दिरेषु ।
ह्यद्यापि भारतभुवः सुखदा च यस्याः
संश्रूयते सविनयं परिणूयते सा ॥

श्री डा० रमाकान्तशुक्लोऽस्मदीयेषु संस्कृतसाहित्यकारेष्वन्यतमो विश्रुतः साहित्यकारस्त्वस्त्येव, सः साम्प्रतं परमोत्साहेन राष्ट्रभक्तिगङ्गां प्रवाहयंश्चाधिगम्यते । तद्रचितं 'भाति मे भारतम्' इत्येतद् राष्ट्रभक्तिपरकं काव्यमद्य कस्य न चेत आवर्जयन् संलक्ष्यते —

जाह्नवीचन्द्रभागाजलैः पावितं
भानुजानर्मदावीचिभिर्लालितम् ।
तुङ्गभद्राविपाशादिभिर्भावितं
भूतले भाति मेऽनारतं भारतम् ॥
गोखलेबालगङ्गाधराराधितं
श्रीशिवाजीतुकारामसम्बोधितम् ।
यन्महाराष्ट्रकं सह्यशृङ्गोच्छ्रितं
भूतले भाति तन्मामकं भारतम् ॥

इत्येतयोर्निर्दिष्टकाव्योद्धृतयोः श्लोकयोः प्रवहमानां राष्ट्रभक्तिगङ्गां पश्यन्त्येव सचेतसः ।

अद्यतनो हि गीर्वाणवाण्या. कविर्वस्तुतो राष्ट्रियपरिवेषे स्वकीयां कवितां सृजन् परिवीक्ष्यते । अस्मदीयेयं भारतवसुमती पुनः अनेकानेकशतकानन्तरं स्वां काश्मीरतः कन्याकुमारीं यावद् द्वारकातो जगन्नाथपुरीं यावत् वितन्वाना परमविशालराष्ट्रश्रियं बिभ्राणा कमप्यनिर्वाच्यं गरिमाणमभिव्याप्य विभ्राजते।

दुर्नियतिवशात् प्रायेण द्विसहस्रवर्षव्यापि कालं यावद् भारतं दासताबन्धनवशान्मलिनमेव भवत् समदृश्यत । कवयोऽप्यत आश्रयदातृन् भूपतीनेव स्तुवन्तः प्राप्यन्त, परमिदानीन्तनस्तु देववाण्याः कविः समग्रभारतराष्ट्रमाराधयन् दृग्गोचरो भवति । एतस्मादेव वलीयसः कारणस्य सद्भावात् स्वातन्त्र्योत्तरकालवर्तिषु संस्कृतकाव्येषु राष्ट्रियभावना नितान्तोच्छ्रिता भूत्वा पर्यवलोक्यते । अस्मिन् महनीये काले लोकवन्दनीया महापुरुषाः समजायन्त । ते स्वराष्ट्रस्य गरिमाणमुदनीनमन्, स्वां भारतमातरं परतन्त्रताशृङ्खलात उन्मोचयितुं सर्वस्वमपि अजुहवुः । एतेषां राष्ट्रभक्तानां महापुरुषाणां चरितानि गातुमनेके संस्कृतकवयः काव्यानि व्यररचन् । तेषु काव्येषु राष्ट्रियभावनानां, राष्ट्रभक्तेः, सत्याग्रहस्य सविनयावज्ञायास्त्यागस्य, सेवाया आत्मोत्सर्गस्य च परमहृद्यं रमणीयं चित्रणं संशोभते । श्रीधरभास्करवर्णेकरप्रणीते शिवराज्योदयमहाकाव्ये प्रवृत्तिर्मनोऽभिरामा सम्यगुदाहृतास्ति । छत्रपतिशिवाजी रोहितेश्वरं शङ्करं प्रार्थयते—

श्रद्धा हिमाद्रिसमाचला शक्तिर्नृसिंहनिभातुला
आविर्भवत्यस्मासु सा हर हर हर महादेव !
वज्रः शिरसि यदि निपतेद् वह्निर्वपुषि यदि संविशेत्
न हि निश्चयो नः प्रस्खलेत हर हर हर महादेव ॥

भारतीयायाः संस्कृतेर्देशभक्तेश्च चेतना महाकाव्येऽस्मिन् पदे पदे भृशं दीप्यते—

जयोऽस्तु रामस्य रघूत्तमस्य
श्रीरामदासस्य गुरोर्जयोऽस्तु ।
जयोऽस्तु ते विट्ठलपाण्डुरङ्ग
सदा तुकाराममुनेर्जयोऽस्तु ॥

जयोऽस्तु नित्यं शिवशासनस्य
हिन्दुस्वराज्यस्य चिरंजयोऽस्तु ।
जयोऽस्तु धर्मस्य सनातनस्य
जयोऽस्तु राष्ट्रस्य च भारतस्य ॥

देशगौरवं गायन्तं सीताचरितमहाकाव्यकारं महाकविं रेवाप्रसादद्विवेदिनं शृण्वन्तु—

भरतभुवनमस्ति तीर्थमार्यं
ननु खलु तेन चराचरोद्दिधीर्षुम् ।
इति विविधमतिर्विभिन्नभाषो
विषमगतिश्च जनो विकासमेति ॥

भारतीया संस्कृतिरेतस्मिन् महाकाव्ये विभ्राजमानावलोक्यते—

सुभगरुचिषु संयमः क्रमेषु,
यमनियमेषु च सौभगं रुचीनाम् ।
इयमिह किल शिष्टतास्मदीया
सहृदयता सचिवस्वभावसौम्या ॥

एतस्मिन् स्वातन्त्र्योत्तरकाले प्रणीतेषु काव्येषु महाकाव्येषु च सर्वेषु राष्ट्रभक्तिः किञ्च राष्ट्रियभावना परमोद्दामा भूत्वा विभाति ।

देशस्य स्वातन्त्र्याय यैर्देशभक्तैः स्वकीयाः प्राणा अपि उत्सृष्टास्तेष्वद्यतनानां कवीनां महती श्रद्धा वर्तते। निम्नलिखिते श्लोके महाकवेराचार्यब्रह्मानन्दशुक्लस्य तन्निष्ठा हि श्रद्धा स्फुटतया विलोक्यते—

स्वातन्त्र्यमखपूर्त्यर्थं स्वप्राणा यैः समर्पिताः ।
तेषां शाश्वतसम्मान-रूपेयं शब्दयोजना ॥

(नेहरूचरिते १/३५)

आचार्यप्रवरस्य श्रीब्रह्मानन्दशुक्लस्य तु 'नेहरूचरितं' नाम महाकाव्यमेव राष्ट्रियमहाकाव्यं वर्तते। वस्तुतोऽस्मिन् स्वातन्त्र्योत्तरकाले अनेकानि महाकाव्यानि तानि सन्ति येषां निर्माणं राष्ट्रियभावनायाः जन-जनमानसेऽवतारणायै, राष्ट्रभक्ति समेषामपि च मानवानां मानसे संस्थापयितुमभवत्।

शत्रून् विनाशयितुं स्वकीयस्य भारतदेशस्य सैनिकेषु वीरतामुत्कृष्टतरवेगेनोद्दीपयितुमद्यतनः संस्कृतकविः प्रवर्तमानो दृष्टो भवति चतुर्वेदो वनमाली—

वीरा भारतवर्षस्य सैनिकाः साहसप्रियाः।
अदम्योत्साहसम्पन्ना भुजोच्छिन्नमहारयः॥
हनूमद्रामदुर्गादिसुरसेवा-परायणाः ।
शिवाजीगुरुगोविन्दप्रतापादिकुलोद्भवाः॥
आकर्णयत वाक्यं मे भूत्वा सावहिता भृशम्।
स्व स्व रूपानुरूपं यद् द्रुतं तदनुतिष्ठत॥
दर्पिणां दर्पनाशाय मातृभूरक्षणाय च ।
पराभवाय शत्रूणां यूयं धात्रा विनिर्मिताः॥
भोः सैन्या भारतीयाः प्रतिदिशमसकौ युष्मदीया प्रवृत्तिः
यन्नैतेऽखर्वगर्वा निजरिपुनिवहं जीवितं संत्यजन्ति।
तं भूमौ सन्निपात्य द्रुततरमखिलं शस्त्रमस्त्रादि हृत्वा
कीर्त्या कैलाशमूर्त्या जगदिदमखिलं किन्त्वमी श्वेतयन्ति।

स्वातन्त्र्यप्राप्तिकालोत्तरे वस्तुतः संस्कृतकविकोविदैः राष्ट्रियभावनाया देशप्रेम्णः प्रवाह एव महीयान् महान् वाहितः। श्रीमन्तो महाकवयः श्री डा० कपिलदेवद्विवेदिनो राष्ट्रगीता-

ञ्जलिनामके स्वकीये काव्ये स्वकीयं पूज्यं राष्ट्रं भारतं गायन्त
इत्थमवाप्यन्ते...

जयतु जयतु मे भारत देशः,
जयतु गुणाञ्चित-गौरववेशः ।
वीरप्रसूः सुषमाढ्यमनोज्ञः
वीरवृन्द-परिपालित-देशः ॥
शस्यश्यामलो नवरस-पूर्णः,
खग-रव-शोभित-द्रुम-दल पूर्णः ।
नानानद-सरितां रवतूर्णः,
सुखदसदागति-गतिरय--पूर्णः ॥

\+ \+ \+

कालिदास-कपिलादि-प्रसिद्धः,
माघ-हर्ष-भवभूति--समृद्धः ।
गौतम-जैमिनि-दर्शन-सिद्धः,
उमा-रमा-गुण-गौरव-शुद्धः ॥

\+ \+ \+

गान्धि-सुभाष-गुणावलिवंद्यः,
कवि अरविन्द-रवीन्द्र-सुनन्द्यः ।
भक्तसिंह-तिलकाञ्चित-भालः,
स्वामिदयानन्दार्चितपादः ॥

श्रीगोस्वामिबलभद्रप्रसादशास्त्रिणः कविवरेण्यस्य महाकाव्यं
नेहरूयशःसौरभमपि राष्ट्रियकाव्यत्वेन संस्कृतसाहित्यसंसारे
शोभते । तत्र श्रीपं०जवाहरलालनेहरूमहाभागस्य पावनं

स्वभारतराष्ट्रप्रियभक्तशिरोमणेश्चरितं गीतं यदस्ति नितरां स्तुत्यम्। अयं महाकविः स्वदेशं भारतं स्तवीति तत्र—

हिमालयो भाति विशालभालवत्,
वनानि पुष्पोपचितानि कुन्तलाः।
तुषारकान्तद्युति रत्नभास्वरं,
विभाति काश्मीर-किरीटमुज्ज्वलम्॥

\+ \+ \+

अथेदृशी सा जननीव वत्सला-
भिनन्दिता भारतमातृभूरियम्।
जयत्यमन्दं शरदिन्दु-चन्द्रिका-
विलासहासैरिव सिञ्चती भुवम्॥

यदास्मद्देशं चीनदेशस्य सेनारौत्सीत् तदापि न संस्कृतकविरयमाधुनिकोऽसावधानोऽदृश्यत। सः स्वकीयान् भारतीयान् सैनिकान् उच्चैराह्वयत् एभिरोजःसञ्चारकैरुत्साहप्रदैः साहससंवर्द्धकैः शब्दैः—

जयं विनात्र जीवनं जनस्य याति निष्फलम्।
रणं विना लभेत को, जये जगत्तलेऽखिले॥
हिमालयस्य मस्तके, किमस्ति शत्रुसैनिकः।
जहि द्रुतं जहि द्रुतं न मुञ्चतं न मुञ्चतम्॥
लभध्वं, लभध्वं जय त्वं जय त्वं,
जहि त्वं, जहि त्वं, समस्तारिवृन्दम्।
तुषाराद्रिमूर्धस्थितं शत्रुसैन्यं,
बलेनाचलाद् द्रावय त्वं च शीघ्रम्॥

महापुरुषाणामुदारचरितान्यव काव्यकलायाः प्रेरणाभूमयः। स्वातन्त्र्यसङ्गरे सर्वस्वहोतारं नेहरूपरिवारं को नाम न जानाति, यत्र जवाहरलालनाम सद्रत्नं समुदभवत् । सः स्वमातृभूमेः शीर्षमलङ्कृत्य विश्वस्य सर्वेष्वपि राष्ट्रेषु तस्याः गरिमाणं महिमानं च व्यातानीत् । तं महापुरुषं देशभक्तमौलिरत्नमधिकृत्य संस्कृतकविष्वनेके संस्कृतकवयः काव्यान्यकुर्वन्। तेषु आचार्यरामकिशोरमिश्रो गीतजवाहरं नाम गीतकाव्यं प्राणैषीत् । स तस्मिन् वीरदेशभक्ते दिवंगते सति, स्वकाव्ये शंसति—

गगनसमं ते हृदयं पूतम्,
सदाभवत्ते शुभमाकूतम् ।
उचितमाचरस्त्वं निजविधिषु,
कदापि नो नयविपथमयासीः
वीर! सदा त्वं सुपथमयासीः ॥

तदेवमस्मत्संस्कृतकवयो देशभक्तानां तेषां चरितानि श्रद्धयोद्गीय देशस्य निवासिनां हृदयेषु निरन्तरं देशानुरागमजीजनन् ।

संस्कृतकविः सदैव स्वयुगस्य प्रतिनिधित्वं सम्यग् विदधत् सम्प्रेक्ष्यते । यदात्र यवनानां साम्राज्यमासीत् तदापि संस्कृतकविर्न सुप्त आसीत् । स गुरुनानककाव्ये तत्कालवर्णिनीं हिन्दुविरोधिनीं नीतिं चित्रयन् प्राप्यते । अंग्रेजानां शासनेऽपि संस्कृतकविर्जागृतचेता अवाप्यत । विक्टोरियायाः सम्राज्ञाः शासने वा यद् यदपश्यत् तत्तदवर्णयत् । एतावदेव न, यदा जार्जपञ्चमस्य राज्याधिरोहणमघटत् तदाप्यसौ स्वकीयां दृष्टिं तत्र निदधौ । सनत्कुमारसिंहाचार्यस्य विक्टोरियावैभवं किञ्च चिन्तामणिरामचन्द्र सहस्रबुद्धेर्जार्जमहाशयस्य राज्याधिरोहणसंज्ञिका रचना तत्र प्रमाणम् ।

एतया दृष्ट्या यदा दृश्यते तदाद्यतन: संस्कृतकविरतिप्रबुद्धो वीक्ष्यते। स: साम्प्रतिकानपि विषयान् स्वकाव्ये वर्णयितुं न सङ्कोचमञ्चति। संस्कृतकविसम्मेलनेषु अस्मदीया: संस्कृतकवयस्तांस्तान् विषयान् समीचीनतया स्वकवितासु समुपन्यसन्तो दृश्यन्ते। यदा देशे दुर्भिक्षं न्यपतत्, यदा वर्षाया: प्रभूततया सा सा हानि: समजायत तदा स वलीयस्या: प्रावृषो भीषणं स्वरूपं तज्जनितञ्च प्रलयं सम्यक् स्वकवितायां प्रादीदृशत्। राजनीतिकविषमताया: प्रभाव: संस्कृतकवीनां काव्येषु संलक्षितो भवति। दिव्यज्योति:पत्रसम्पादक: कवि: केशवशर्मा वदति—

अहो महाभीतिरुदेति चित्ते
यदा भवत्यस्य कदापि चिन्तनम्।
किमस्य कालस्य सुशोभना जना:
कालस्य जालात् स्वसुरक्षणे क्षमा:॥

'कीदृग्वसन्तोत्सव:' इत्येतस्यां स्वकवितायां विद्याभास्करो विद्यासागर: कवी रामकृष्णभट्टो दु:स्थितितर्ति निदधाति—

पूर्वेद्युस्तनुधारणं तदशनै: स्तोकं च नासादितम्।
गोप्तुं गात्रमवापि शैशिरमरुत्क्लेशान् न वासो मनाक्।
येनात्मीय इतीह कोऽपि कथितो नो जन्तुरुर्वीतले
प्राणा यस्य च दुस्सहास्तमनु भो: कीदृग् वसन्तोत्सव:॥
भ्राम्यमाणवशस्त्रसंहतिभरै: सम्पीडितायां नय-
द्वन्द्वेनापि बलिष्ठराष्ट्रयुगलोन्नद्धेन वैरानले।
लोकक्रोधतम: प्रधूमनिचयै: सन्धुक्षिते सर्वतो
लोके शान्ति-सुवृष्टये तदति हा कीदृग् वसन्तोत्सव:॥

सप्तसप्तत्यधिकैकोनविंशतिमितख्रिस्तशतकीयामापद्दशां शरव्यीकृत्य संस्कृतकवय: प्रशासनं मुक्तकण्ठा भवन्त

आलोचितवन्तः। श्री डा० रेवाप्रसादद्विवेदी वाणीविलसिते ब्रवीति :

दिल्लीपीठे निबिडनिबिडं पादमाधाय सिद्धां
वीतध्वान्तां विदलितपराभिन्दिरां तीर्थराजे।
न्यायाधीशादिह बत जगन्मोहनाद् ग्लानिमाप्तां
सम्प्रत्येतां कलयत दिशो न प्रबुद्धां न सुप्ताम्॥

यदा च पाकिस्तानदेशो वङ्गेष्वन्यायात्याचारं च कर्तुमुद्यतोऽभवत् तदा भारतं न तं सोढुमशकत्। इन्दिरागान्धी तत्काल एव तदत्याचारेभ्यो वङ्गान् पातुमुद्यताजायत। तदापि तदानीन्तनः संस्कृतकविर्न शयान आसीत्। बंगलादेशकाव्ये जन एष आह :--

उत्साह- साहस-मनोबल-देशभक्ति-
प्रोत्कृष्टसंगठनशक्तिगुणान् गृहीत्वा।
हर्षेण मुक्तिपृतना प्रियवङ्गपुंसां
जन्याजिरे ह्यवततार कृशानुकुण्डे॥

अन्धानुकरणे नाधुनिकः संस्कृतकविः स्वां रुचिं निदधाति। सोऽनारतं भावसौन्दर्यस्य नवनवान् मानदण्डान् मार्गयति। स जनजीवनस्य तान् सर्वान् सन्दर्भान् प्रकाशयितुमाकाङ्क्षति न ये सन्ति स्पृष्टाः। स नैसर्गिकीं पूर्वकालगतनिर्बन्धविरचितां भावसुषमां चित्रयन् प्राप्यते। कविजगति सुविदिश्चतुर्वेदोपाह्व-कृष्णचन्द्रः कथयति स्वकीये प्रेमपत्राख्ये महाकाव्ये -

मातस्त्वया कृतमहो निजलालने हा
पुत्रः स्मरन् जननि ते व्यथते सदैव।
आयातुमत्र यततेऽभिलषत्ययं हि
जन्मान्तरेष्वपि सुधीः सुततां तवैव॥

'श्री बदरीशसुप्रभातम्' इत्येतत् काव्यं डा० सी०आर० स्वामिनाथ-विरचितमस्ति । तत्र बदरिकाश्रमस्य वर्णनं परम-ललितशब्देषु कृतमस्ति । तत्र बदरिकेश्वरचरणयोः समर्पितं स्वकीयं भक्तिविभावितं भावं यमदर्शयत् सः कीदृङ्मनोऽभिरामोऽस्ति । अद्यतनः कविः भूतपूर्वकवय इव प्रकृतेः सुन्दरताया उपासनायां रत एव वर्तते—

सौगन्धिकाकुसुमगन्धयुतोऽनिलोऽयं
वक्षःस्थमाल्यमभिचालयति त्वदीयम् ।
मन्दाकिनीजलकणाः प्रतिबोधयन्ति
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥

× × ×

शीतस्तुषारकणिकावलिरंसदेशे
मुक्तामयीं रचयतीव तवाङ्गदाभाम् ।
शब्दापयन्ति पतगास्तव दर्शनोत्काः
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥

तीक्ष्णव्यङ्ग्यमवलम्ब्य श्री डा० जगन्नाथपाठकमहाभागो युगस्यैतस्य विसङ्गतिमुन्मीलयति—

सञ्जातो बत चन्दनेन कलहो यत् .कर्दमस्याधुना
भेकः कश्चिदितो विवेकनिपुणो मध्यस्थतां प्राप्तवान् ।
ब्रूते पङ्कनिमग्न एव लभते साम्यं न तच्चन्दनं
साकं किञ्चन कर्दमेन तदिदं शृण्वन्तु धीराः क्षणम् ॥

आधुनिका अनेके कवयः स्तोत्रकाव्यानि च लिखितवन्तः । तेषां स्तोत्रेषु भावसौन्दर्यं कामप्यभिनवां शोभां परिष्वजते ।

रामकृष्णपरमहंसीये (युगदेवताशतके) कविर्वर्णकः स्तवीति—

वाणी मौनं भजति हि मनश्चञ्चलं पङ्गुभावं
बुद्धिर्यस्मिन् भवति हतधीः प्रातिभं चक्षुरन्धम्।
अप्रामाण्यं दधत इतराण्याप्तवाक्यानि यत्र
तत्साकारं गुरुचरणयोर्ब्रह्म सञ्चिन्तयामि॥
केचिद्विष्णोर्भुवनविदिताः केऽपि शम्भोस्तथान्ये
सूर्याग्नीन्द्रप्रभृतिमरुतां सन्ति चांशावताराः।
कृष्णः साक्षान्नरतनुधरं निर्गुणं ब्रह्ममात्रं
त्वं सर्वेषां गुरुगुणमयः कोऽपि पूर्णावतारः॥

भावा इह कियत्या नवयाभया मण्डिताः सन्तो विभ्राजन्ते। श्रीविद्याधरः शास्त्री बीकानेरस्थः कविवन्दनीयः स्वकीयायां लीलालहर्यां, यत्र परमतत्त्वम्प्रति नैसर्गिकस्याकर्षणस्य तेन च सह प्रवर्तमानस्याकस्मिकमनोयोगाभ्यासस्य तरङ्गानामेव सर्वसाधारणं चित्रणं चकास्ति, कथयति—

अनन्तेयं लीलाललितलहरी यस्य वितता
स कः सर्वैर्वन्द्यस्त्वमसि विदितश्चाप्यविदितः।
अजानन्तं तन्मां त्वदभिमुखमेवोन्नयति यत्
अलक्ष्यं तल्लक्ष्यं किमपि तव नित्यं विजयते॥

इदानीं रसचर्वणायाः परिवर्तितं रूपमिदानीन्तनीषु संस्कृतकवितासु शोभते। आचार्यभरतस्य रससूत्रमाधृत्य संस्कृतसाहित्यशास्त्रकारैः रसपरिपाकस्य काचिद् रूढा प्रक्रिया निर्दिश्यते। रसतत्त्वस्य चर्वणा तच्छास्त्रानुमतविध्यनुसारमेव सम्भवा भवति।

परमद्यतनो रससिद्धः संस्कृतकविर्न तस्मिन् रूढविधौ रज्यति। पाठका निरर्गलतया आनन्दं लभन्तामिति तस्य लक्ष्यम्। स्वाभिमतोद्देश्यपूरणाय सः प्रतिपाद्ये विधौ प्रतिपादने च मनोऽनुकूलानि परिवर्तनानि कुर्वाणो दृश्यते। प्रतिपाद्यदृष्ट्या सोऽधिक्षेपं किं वा व्यङ्ग्यमालम्बते। श्रीदेवासकरवर्णितकलिकौतुके तद् द्रष्टुं शक्यम्।

प्रतिपाद्यशैलीदृष्ट्यापि कविभिराधुनिकैर्भाषा परिवर्तितास्ति। संस्कृतबन्धे आंग्लभाषायाः शब्दान् लोकभाषाशब्दांश्च समावेश्य हास्यरसं तत्रावतारयन्त आधुनिकाः सम्प्रेक्ष्यन्ते। एतदर्थं निदर्शनत्वेन कृष्णकान्तमहाभागस्य श्लोकद्वयं निधीयते-.

श्मश्रुप्रदेशे तु विधाय हस्तं
'का हो गुरू!' इत्यभयं वदन्ति।
ये सन्ति सम्यङ्नकलप्रवीणाः
क्रीडेव तेषां सरला परीक्षा॥
पुरा किलासीद् विबुधोक्तिरेषा
'विद्यावतां भागवते परीक्षा।'
नियुक्तिकाले नवनीतलेपे
सम्प्रत्यहो सोऽसंगता परीक्षा॥

'छन्दः पादौ तु वेदस्ये' ति वदन्त आचार्याः काव्यरचनायाः कृते छन्दसां प्रयोगमपरिहार्यत्वेन मन्यन्ते। परमद्यतनसंस्कृतकाव्येषु छन्दोविचितिदृष्ट्या युगान्तरकारि परिवर्तनं किञ्चित् सञ्जातमस्ति। साम्प्रतिकाः केचन संस्कृतकयः संस्कृतकवितामपि छन्दोबन्धनान्निर्मुक्तां विधातुमीहन्ते, अतस्ते कवितां छन्दोविनिर्मुक्तां कुर्वाणाः प्राप्यन्ते। केचन मधुररागरागिनीषु, कवित्तसवैयारोलादिहिन्दीभाषायाश्छन्दःसु किञ्च गज़लकव्वाल्यादिष्वपि साम्प्रतं संस्कृतरचनां कुर्वन्तो वीक्ष्यन्ते।

रञ्जनसूरिदेवरचिता शारदश्रीः इहोदाहरणत्वेन निधातुं शक्यते। वस्तुतः संस्कृतकाव्येषु नवगीतानां लोकगीतानाञ्च प्रयोगः प्राचुर्येण वीक्ष्यते। श्री श्रीनिवासरथः, पण्डितो वासुदेवद्विवेदी, डा० वीरभद्रमिश्रः, डा० नलिनी शुक्ला (कर्णपुरे), डा० सुधाकराचार्यत्रिपाठी (मयराष्ट्रनगरे) आचार्यकृष्णदत्तचतुर्वेदी (अतर्रा उपनगरे), पं० प्रभातमिश्रः, डा० राजेन्द्र मिश्रः (प्रयागे), इत्येतदादिका अन्ये च शतशो दाक्षिणात्याः संस्कृतकवयो नवनवगीतेषु स्वां संस्कृतकवितां निवध्नन्तो दृश्यन्ते।

संस्कृतभाषायां वस्तुतो भावाभिव्यञ्जनक्षमता गुरुतमा वर्ततेऽत एव तत्र विविध-नवनवगीतानां लोकगीतानां च सफलतापूर्वकं प्रयोगो भवितुं शक्योऽस्ति। विस्तारभियात्रोदाहरणानि न प्रस्तूयन्ते।

अद्यतनस्य संस्कृतसाहित्यस्य तदेवं विविधं वैशिष्ट्यं प्राप्यते। एतस्मिन् काले देशान्तरस्य भाषासु रचिता ग्रन्थाः संस्कृतभाषायां विनिवद्धाः किञ्च संस्कृभाषाया ग्रन्था वहवो हि आंग्लादिदेशान्तरीयभाषासु पर्यवसिताः सन्ति।

नूनमाधुनिकः संस्कृतकविः स्वाभिमतनिवेदने सर्वथैव स्वतन्त्रः। अत्रेदमपि कथनमपेक्ष्यते यदाधुनिके युगे संस्कृतभाषायामेतादृशान्यपि रूपकाणि (नाटकानि) वहूनि दृश्यन्ते यत्र पुरातनमान्यता उपेक्षिताः सन्ति। साम्प्रतं तु तत्र भा… प्रकाशनं तथैव क्रियते यथाधुनिकानेहसि प्रचलितो वर्तते। किञ्चाद्यतनो नाट्यशास्त्रनिर्धारितनियमानामक्षरशः संक्षरणेऽपि न रुचिं निबध्नाति। साम्प्रतिकेन साहित्यकारेणाभिव्यक्तिस्वातन्त्र्यं पूर्णतया स्वायत्तीकृतमस्ति।

आधुनिकस्य संस्कृतसाहित्यकारस्य संस्कृतभाषा तस्य च संस्कृतरचना कामप्यभिनवामभिख्यां बिभ्राणा संसारमञ्चे विराजते—

नवीनशोभास्वनुरागदर्शिनी
स्वदेशसेवार्द्रमनःप्रमोदिनी ।
समग्रविश्वोदयधर्मरागिणी
प्रसन्नशब्दार्थबुधेन्द्रमोहनी ॥१॥

उदारचित्ता नवताभिकाङ्क्षिणी
पवित्रसद्भावविचारसेविनी ।
स्वसभ्यतासंस्कृतिकीर्तिवर्धिनी
सुचारुचारित्र्यविभाविलासिनी ॥२॥

नवीनमार्गाश्रितभावशोभिनी
विश्वाभिरामा शुचिवर्त्मगामिनी ।
स्वभावशुद्धा कटुताविनाशिनी
समन्वये नैजमनोनिवेशिनी ॥३॥

सतां प्रकर्षोदयचित्तधारिणी
मनोज्ञहृद्याखिलरूढिमर्दिनी ।
तपोऽभिरामर्षिविचारपोषिणी
स्वराष्ट्रभक्त्युज्ज्वलमोदशालिनी ॥४॥

प्रशस्तकार्यार्थप्रकर्षदर्शिनी
समस्तलोकस्य च तापहारिणी ।
पुरारिपादाम्बुजपूजनार्थिनी
कृपामयी संस्कृतवाक्पयस्विनी ॥५॥

वदान्यदृष्टिश्रयिणी मनस्विनी
स्वराष्ट्रसद्वृत्तविभाभिरञ्जिनी ।
चकास्तु लोके श्रुतिवर्त्मसानिनी
सदैव पूज्या सुरगीर्यशस्विनी ॥६॥

नैजैर्नितान्तनवमञ्जुलगेयकार्यै-
र्यैर्भारतस्य महिमा परिवर्धितोऽस्ति ।
ते संस्कृतस्य कवयः सततं जगत्या-
मस्यां जयन्तु समुदं स्ववचो भजन्तः ॥७॥

'सेतुबन्ध'-नाटक-समीक्षा

(आचार्यलक्ष्मीचन्द्रकौशिक:, एम०ए०, साहित्याचार्य :, वरेलीस्थ-
बरेलीकालेजस्य भूतपूर्वसंस्कृतविभागाध्यक्ष:)

अज्ञानान्धतमिस्रायां, प्रोल्लसद्भास्वदुज्ज्वलम् ।
विद्युदुन्मेष-संकाशं, मन्महे प्रातिभं महः ।।

प्रमोदास्पदं, गौरवास्पदं चेदं खलु, यत् १९७९ तमे ख्रैष्टाब्दे साहित्याचार्यादि-विविध - विरुदावलि - विभूषितानां, विद्वद्-वरेण्यानां कविवराणां गोस्वामिश्रीबलभद्रप्रसादशास्त्रिणां मर्मस्पृक्-कुशाग्रीयप्रज्ञोपज्ञं, 'रम्यां रामायणीं' कथामधिकृत्या-भिनवया तर्कदृशा लोकोत्तर-पुरुषोत्तमचरित-चर्चिताया अपि तस्याः कथायाः, स्वकीयायां, निर्मलायां, झटिति तत्त्वार्थ-दर्शन - शीलायामपूर्व - वस्तु-निर्माणक्षमायां, नवनवो-न्मेषशालिन्यां प्रतिभायां किमप्यपूर्वं सर्वोच्चं मानवीयजीवना-दर्शोन्मुखत्वं लौकिकत्वञ्च संविभाव्य, दशभिरङ्कैः सुविहित-कथावस्तुविन्यासं, नवीनं, सरसं मनोरमञ्च सेतुवन्धाभिधमन्वर्थं नाटकं नाट्य-तत्त्वविदां सहृदयानां कर-कमलेषूपायनी-बभूव ।

यथोपरिष्टान्मङ्गल-श्लोके निर्दिष्टं सर्वं किलैतद् दिव्यम-दिव्यं वा, आर्षमनार्षं वा, दृश्यं श्रव्यं वा, काव्यमयं वाङ्मयं, विश्वस्मिन् जगति निरन्तरं प्रवर्तमानां, सततं परिवर्तनशीलां, विविधाञ्च जीवनधारामाधारीकृत्य, प्रतिक्षणं भिद्यमानं, क्षणे क्षणे च नवतामुपेतं प्राकृतिकं परिवेशञ्चाधिकृत्य विरचितं,

परामार्थतत्त्व -विमर्श-परिपूत-प्रज्ञस्य, कवेर्मनीषिण: कस्याश्चिद् विलक्षणाया: प्रतिभाया. विलसि तं, विस्फूर्जथुर्वेति वाक्तत्त्व-विदां केषाञ्चिद् विपश्चिदपश्चिमानां विमर्श: । दार्शनिकदृशा त्वेतत् कवि-वेधस: प्रातिभं महो वा, शब्दब्रह्मण: किमप्यपूर्वं मनोहरञ्च विवर्तं वेत्यभिधातुं शक्यते । यदिदं पुरातनं प्रख्यातञ्च किमप्यैतिह्यमाधुनिकं वा किमपीतिवृत्तं, त्रिलोक-वन्द्यं वा कस्यापि सत्पुरुषस्य चरितमवलम्ब्य, दृश्यश्रव्ययो: काव्ययोर्विरचनं नाम, तत्सर्वं कामपि कथां व्याजीकृत्य, मानवीय - जीवनस्यानवद्यानामा दर्शप्रकर्षाणामभिव्यञ्जनं संकीर्तनञ्चेति मन्तव्यम् ।

जीवनं जगच्च निरन्तरं परिवर्तमानाभि र्देश-काल-व्यक्ति-परिस्थित्यादीनामत्यन्तं विशिष्टाभिरपरिमिताभिश्च सीभाभि: सर्वत: परिच्छिन्नं भवति । जीवनस्य महोदधावस्मिन् क्वचिन्मधुर--मसृण-मुग्ध-स्निग्घ - ललितप्रशान्त - मनोहराणां रागानुराग-विरागादि-भावानां लहर्य: समुल्लसन्ति, अन्यत्र दारुण-दुर्घटना-वशाद्, दुर्दान्त-दुर्दैव-दौरात्म्याद् वा निरवध्व-सीमासह्यागाध-कारुण्य - परिपूर्णानां घनीभूतानां मानवीय संवेदनानामुद्दामा: कल्लोला अनिशं भृशञ्च परिखेलन्ति; अपरत्र दैन्य-दारिद्र्यादि-दुर्दशा-ग्रस्तानां विवश निरीहासहाय-शोषित- दुर्बलानां मनुजनुषामदम्य-दुरन्त-कुण्ठा-संत्रासाक्रोश-यातनादिमहोर्मीणां बीभत्सो भीषणश्च विस्फूर्जथुरजस्र जरीजृम्भते । एवं मानवजीवनस्य परिवेशोऽयं दिक्काल-परिस्थित्यादीनामानन्त्याद्, वैविध्याच्च, कदाचित् कमनीयो मनोरम: कदाचिद् भयानको बीभत्सश्च प्रतीयते । तथैव, तस्मादेव कारणाच्च, प्रकृते: परिवेशोऽपि वैविध्यमानन्त्यञ्च परिदधाति । तयोरतिविशिष्टेऽस्मिन् संविधानके सहृदय-हृदय-

संवेद्यं ; कवीनां प्रतिभा-विशेष-प्रसादादुपलभ्यं किमपि पारमार्थिकं तत्त्वमनुपमं सौन्दर्यञ्चान्तर्निविष्टं, सर्वथा निगूढञ्च वरीवर्तते। कवेः कापि तत्त्वार्थदर्शिनी विचक्षणा शेमुषी स्वकीयया प्रौढयाऽनल्पया च कल्पनया, जीवनस्य जगतश्च तेषां नानाविधानां सन्दर्भाणां विशिष्टं देशं, कालं परिस्थितिञ्च सम्यक्तया संविभाव्य, तत्राधिष्ठितं पूर्वोक्तं तदप्रतिमं सौन्दर्यं, तान् विचित्रान् भावान्, तां सूक्ष्मां गभीराञ्च विचारपरम्परां निजेन विलक्षणेन प्रातिभेन चक्षुषा प्रत्यक्षीकृत्य, यथासामर्थ्यं स्वकीययां विशिष्टायां शब्दार्थसंयोजनायां 'विन्यास-विशेष-भव्यतया' तथा निबध्नाति, यथा तत्र मानव-जीवनस्य तत् परमादर्शतत्त्वं शतकृत्वः सहस्रकृत्वश्च बहुधा विद्योतते।

काव्यस्य नाट्यस्य वा माध्यमेन यदिदमुपरिनिर्दिष्टं शाश्वतस्य जीवनप्रवाहस्यादर्शस्वरूपाणां कवीनामभिव्यक्ति-सामर्थ्यस्य वैविध्यात्, तेषां प्रतिभातारतम्यवशाच्च, बहुधा मार्मिकं मनोहरञ्चाभिव्यञ्जनं नाम, तत्प्रायः कस्मिंश्चिद् राष्ट्रे, केषुचित् समाजेषु वा, परम्पराप्राप्तां, लोक-विश्रुतां, कामपि पुरातनीं कथां समाश्रित्य, काल्पनिकं किमपीतिवृत्तं समवलम्ब्य वा, सरलतया सम्भवतीति समेषामपि दृश्यश्रव्य-काव्य-विधायिनां कवि-प्रवराणामनुभव-सिद्धम्।

मर्यादापुरुषोत्तमस्य भगवतः श्रीरामस्य, लीलापुरुषो-त्तमस्य भगवतः श्रीकृष्णस्य च कथा भारतवर्षस्य धरित्रीं प्रतिकणं परिव्याप्तेति तु सुनिश्चतमेव। अनयोरपि रामकथा लोक-प्रियतायां सर्वातिशायिनीत्यत्र नास्ति कापि संशीति-भीतिः। अस्माकं देशे न कोऽप्येतादृशः सम्प्रदायो, न वा काऽप्येवंविधा परम्परा विद्यते, येमां लोकविश्रुतां रामायणीं कथां कथमप्युपेक्षितुं क्षमेत। फलतः, कथेयं जैनानां बौद्धा-

नाञ्च परम्परास्वपि, तत्तद्-धर्मानुरूपं किञ्चित् परिवर्तनमादधाना, पद्मचरित-महापुराण - दशरथजातकादि - ग्रन्थेषु दरीदृश्यत एव। भारतस्य प्रत्येकं प्रदेशेषु वङ्ग - कलिङ्ग - तामिलादिषु प्रचलित नां विविधानां भाषाणां वहुभिः कृत्तिवासकम्वनादि - कविप्रवरैरिमां कथामाश्रित्य वहूनि काव्यनाटकादीनि विरचितानि। राष्ट्र-भाषायां हिन्द्यां तु महाकवितुलसीदासस्य 'रामचरितमानसं' सुप्रसिद्धमेव। तस्माद् भगवतो रामस्य कथा भारतवर्षस्य कणं कणमनुस्यूतेति प्रमाणपरिशुद्धं वचः।

भारतवंशीयैः सह कथयं कम्वोज - जावा - सुमात्रा - मलेशियादि-देशेष्वपि गता, तेषामपि स्वकीया राष्ट्रव्यापिनी कथा संजातेति तथ्यमस्याः कथाया वैलक्षण्यं मार्मिकत्वञ्चाभिव्यनक्ति। सुरभारती-समुपासकानां महाकवीनां कृते तु कथेयं वस्तुतः कामधेनुरेव। अस्यां भाषायामिमामाश्रित्य वहूनि वाल्मीकीयाध्यात्माद्भुतागस्त्यादीनि रामायणानि, रघुवंश-सेतुबन्ध-जानकीहरण-रावणवध-रामायणमञ्जरी-रघुनाथाभ्युदयादीनि महाकाव्यानि, अभिषेक-प्रतिमा-कुन्दमाला-महावीरचरितोत्तररामचरितानर्घराघव-वालरामायण-महानाटकप्रसन्नराघवादीनि नाटकानि, रामायणचम्पूप्रभृतीनि चम्पू-काव्यानि च प्रादुर्भूतानि। अनेन सुविशालेन वाङ्मयेन सम्यक्तयैतत् प्रसिद्ध्यति यद् 'रामायणी कथा' संस्कृत-कवीनामजस्रं प्रेरणा-स्रोतः, सततमुपजीव्या च। अत एव शार्ङ्गधरः स्वकीये संग्रहे प्राह—

कवीन्दुं नौमि वाल्मीकिं, यस्य रामायणीं कथाम्।
चन्द्रिकामिव चिन्वन्ति, चकोरा इव साधवः॥ इति।

महाकविः त्रिविक्रमभट्टश्च ब्रवीति—

"सदूषणाऽपि निर्दोषा सखरापि सुकोमला ।
नमस्तस्मै कृता येन रम्या रामायणी कथा ।।"

तस्मान्महर्षिवाल्मीकेर्निम्नलिखितं पद्यं सर्वथा सत्यं सार्थकञ्च प्रतिभाति—

"यावत् स्थास्यन्ति गिरयः सरितश्च महीतले ।
तावद् रामायणकथा, लोकेषु प्रचरिष्यति ।।" इति ।

सेतुबन्धाभिधस्य नाटकस्यास्याधिकारिकं प्रासङ्गिकञ्च कथावस्तु शब्दब्रह्मणि प्रबुद्धस्यादिकवेः प्राचेतसस्य महर्षि-वाल्मीकेः सुविख्याताद् रामायणाख्यादादिकाव्यात् संगृहीतम् । अस्मिन् नाटके रामदिचरितस्य कथावस्तुसंयोजनायाः प्रधानमुद्देश्यं केन्द्रीयं विषयवस्तु वा, विभिन्नानामार्यानार्यैरक्षो-वानरादिसंस्कृतीनां समन्वयः, जीवन-यात्रायाः शाश्वतस्य मानवीयधर्मस्याभ्युदयः, परम्पराप्राप्तानां तत्काल-प्रचलितानां शैव-शाक्त-वैष्णवादि-सम्प्रदायानां व्यावहारिकं सामञ्जस्यं, लोकानां समुचित-स्व-जीवन-पथ-प्रदर्शनञ्चास्तीति स्वयं कविनैव स्वकीये कथामुखे स्पष्टतयाऽभिहितम् । अस्य कथामुखस्य नवमे पद्ये कविः कथयति—

आर्याणामिह हिंसकाक्रमणतो भीता दिशं दक्षिणां,
या आर्येतरजातयो बहुविधाः शांताः प्रयाताः पुरा ।
रामो धर्मसमन्वयस्य च तयोः संवर्धयन् प्रक्रियां,
सेतुं संस्कृतिमध्य एवमकरोत् तन्निर्मितं नाटके ।।"

कवेः सर्वधर्मसमन्वयात्मिका जीवन-दृष्टिरियमस्मिन् नाटके वहुशोऽभिव्यक्तिं गता । सर्वतः प्रथमं, नाटकस्य तृतीयेऽङ्के

रावण-मारीचयोः संवादे मारीचस्य निम्नलिखिते कथने दृष्टिरियं सुष्ठु प्रतिबिम्बिता दृश्यते—

"मारीचः-नान्यथा चिन्तयित्वा । संस्कृतेरेकस्मिन् पुष्पस्तबके गुम्फितानि विविधानि धर्मपुष्पाणि बहुतरं शोभन्ते । पश्य, तात ! अस्माकं धर्मे विहिता मूर्ति-पूजा, मातृदेवताश्वत्थार्चना आर्यैः प्रागेव स्वीकृता । अस्माकमादिदेवः शिवोऽप्यार्यधर्मे महादेवत्वं प्राप्तः । लिंगार्चनाऽपि प्रचारिता तैः । अधुनाऽऽर्य-संस्कृतेः स्वरूपोऽस्मत्संस्कृतिं विनाऽपूर्ण एव । अतस्तात ! तथा विधेयं येन सर्वधर्म-विकासे कोऽपि बाधा नोत्पद्येत । इयमेव मज्जीवनस्य चरमानुभूतिः ।" (पृ०४६)

एवमेव चतुर्थाङ्कस्य विष्कम्भे तापसकुमारयोः प्रियव्रत-सत्यव्रतयोः संवाद एकमतीव महत्त्वपूर्णमैतिहासिकं तथ्यमुद्घाटयति यत्—

"शनैः शनैरस्मिन् राष्ट्रे संस्कृति-द्वयस्य मिश्रणं जातम् । प्रायेणाधुनाऽऽर्यसंस्कृतेरनेकाः समुन्नतप्रक्रिया अनार्यसंस्कृतिप्रदत्ताः सन्ति ।"

ततश्च प्रियव्रतो ब्रूते —

"तदेतत्तु प्रियतरमेव धर्म-रचना युग-धर्म-समत्व-प्रतिपादने शक्ता । अनेन समन्वयेनैवास्मिन् द्वीपे श्रेयः सम्पत्स्यते ।"

सत्यव्रतश्चाशंसते —

"एवमेव स्यात् । भवतु नाम विश्वे सर्वधर्म-समन्वयेन मानव-धर्मस्योत्थानम् ।" इति ।

पञ्चमे चाङ्के प्रियतमायाः सीताया विरहेणातिशयितं विह्वलोऽपि लोकाभिरामो मर्यादापुरुषोत्तमो रामः स्वकीयं विश्वबन्धुताप्रसारस्य प्रमुखोद्देश्यं नैव विस्मरति। कथयति च —

"कथं नामैतद् विस्मरणीयं यदस्माकं हृदय-विजयाभियानमेतत् । युगधर्मसंधानेऽत्र जनानामार्य-धर्मेण सह सूत्रं संधानयन्तो - विश्वबन्धुता - प्रसाराय समागता वयम् ।" इति । **(पृ० ७७)**

अन्यत्रापि प्रायः सर्वेष्वेवाङ्केषु प्रमुखपात्राणां विविधान् संवादानियमेव भावना परितो व्याप्ता दरीदृश्यते । षष्ठेऽङ्के लक्ष्मणस्य कथने—

"न केवलमार्यावर्तस्य विश्वसंस्कृति---समुन्नतये जन्मार्यस्य"---

सप्तमे हनुमदुक्तौ—

"हिंसावृत्ति परित्यज्य सर्वधर्मसमन्वये ।
यद्विधेयं, तथा कार्यं राक्षसेन्द्र ! मतं हि मे ॥"

नवमेऽङ्के यदा सुग्रीवः सागरस्योपरि सेतुबन्धनं प्रस्तौति यदा च लङ्केश्वरेण रावणेन निष्कासितस्तस्यानुजो विभीषणः शरणागतवत्सलस्य रामस्य शरणमागच्छति, तदा रामस्य निम्नलिखिते संवादे ---

"हनुमान्---स्वामिन् ! निर्मितः सेतुः । रामः-- कीदृशस्तात ! (सर्वे साश्चर्यं पश्यन्ति) । हनुमान्--- आर्यानार्य-रक्षसां संस्कृति - सागरेषु । हनुमान्— अत एवार्येण विभिन्न-संस्कृति-सागरेषु निर्मितः सेतुः ।

सफलोऽद्य वनवासायासः। यतः—भिन्नमार्ग-प्रवृत्तानामार्यवानर-रक्षसाम्। अभूदार्यवरः सेतुः, सर्व-धर्म-समन्वये॥ हनुमान्—नाथ! एतदपि ज्ञातव्यम्। यद् विभीषणागमनेन सिद्धं नोऽभीसिप्तम्। राघवेन्द्रस्य संस्कृतिसमन्वय-यज्ञस्येयं पूर्णाहुतिः। यतः-धर्म-समन्वय-मार्गे विहितः सेतुर्विभीषणेनाद्य। यद् रक्षःकुलकेतुः प्राप्तो नः प्रीतये ह्येषः॥'

अस्मिन्नेवाङ्के रामस्य निम्नाङ्किताया घोषणायां यत्—

"सर्वधर्म-समृद्ध्यर्थं रामः प्रव्रजितो वने।"

उपसंहारे च लक्ष्मणस्य निम्नलिखिते कथने—

"शोभनमेतत् संसूचितम्। तद्वयं सर्वे गत्वा गणेशमावाहयामः। महदेतज्जातम्—न केवलं वानर-राक्षसानां रामेण सेतुर्विहितः स्वधर्मे। स कर्मयोगेन बबन्ध सेतुं, महोदधौ मानवता-हिताय॥"

इत्यादिषु बहुषु स्थलेषु, विविधासु परिस्थितिषु चोपरि निर्दिष्टा सर्वधर्म-संस्कृति - समन्वयभावनेयं सर्वातिशायिनी सर्वप्रधाना चाभिवर्तत इति निश्चप्रचम्। नाटकस्यास्य पर्यालोचनेनैतत् तथ्यमपि सर्वथा सुस्पष्टमेव यदत्रास्यां समन्वयस्य प्रक्रियायां देवेषु दक्षिणोत्तरवर्तिनां जनानां मङ्गलविधायको

---

१. द्र०, "आर्याणां च, राक्षसानां च संस्कृतेः।
सेतुबन्धे स्थितो देवः, स्वयं सेतुरभूदसौ॥"

२. द्र०, (क) "लक्ष्मणः—(दूरं विलोकयन्) अहो!
दक्षिणापथे संस्कृतिसेतुरसौ महर्षिरगस्त्य इत एवाभिवर्तते"

—दशमोऽङ्कः : पृ० १६०

(ख) "अगस्त्यः—वर्धतां विश्व-बन्धुत्वं, लोकधर्मः समेधताम्।
जयत्यार्यवरो रामः, प्रजामङ्गल-कारकः॥"

पृ० १६०, दशमोऽङ्कः।

रामेश्वरो महादेवः[1] ऋषिषु महर्षिरगस्त्यः,[2] आर्येषु मर्यादा-पुरुषोत्तमो रामः, अनार्येषु च वानर-कुलधुरंधरः सुग्रीवो, रक्षः कुलकेतुर्विभीषणश्च सुदृढां स्तम्भतामङ्गीकृत्यास्य विशालस्य समन्वयस्य प्रतीकतामादधाति । फलतः, पूर्णतयाऽन्वर्थयमस्य नाटकस्य **'सेतुबन्ध'मिति** संज्ञा, सर्वथा च **"नाम कार्यं नाटकस्य गर्भितार्थप्रकाशकमि'**त्यभियुक्तोक्तिमनुसरति ।

"सन्ति सिद्ध-रस-प्रख्या ये च रामायणादयः ।
कथाश्रया न तैर्योज्या स्वेच्छा रस-विरोधिनी ॥"

('ध्वन्यालोकः', ३ उद्द्योतः, काव्यमाला संस्क०, पृ० १८२)

इति नाट्यतत्त्वविदां नियममनुसृत्य, नाटककृता स्वकीयेऽस्मिन् नाटके रामायणस्य प्रख्यात इतिवृत्ते स्वेच्छातः कथाश्रयाणां घटनाक्रमाणां वाह्येषु स्वरूपेषु यत् किञ्चिदपि परिवर्तनं नैव कृतम् । जनस्थाने मुनीनामस्थिसंचयान् दृष्ट्वा रामस्य मुनि-रक्त-पिपासुकानां क्रूर-रक्षसां विध्वंस-प्रतिज्ञा, क्रोधाविष्टेन लक्ष्मणेन लङ्केश्वर-भगिन्याः सूर्पणखाया नासिकोच्छेदनं, खरदूषणात्रिशिरसां तदधिष्ठितायाः सुविशालाया वाहिन्याश्च विनाशो, मारीचस्य स्वर्णमृगमायां समाश्रित्य सूर्पणखापमान-प्रतिशोधार्थं कूटनीतिविशारदेन लङ्केश्वरेण रावणेन सीताप-हरणं, पतिव्रतायाः सीताया हृदयविदारके विरहे कथानायकस्य रामस्य तादृशं मर्मंतुदं विलपनं, सुग्रीवस्यार्यकौशलेन्द्रेण सहाग्निसाक्षिकं सौहार्दं, कपटेन बालिवधो, हनुमता बाहुभ्यां सागर-संतरणं, लङ्केश्वरेण रावणेन सह संवादो लंकादहनञ्च, विभीषणस्य शरणागतिः सागरे सेतुवन्धनं, राम-रावणयो-र्भीषणं युद्धं तत्र कुम्भकर्ण-मेघनाद-दशाननादीनां वधः, पुष्पकेन विमानेन सपरिकरस्य लक्ष्मणसीतादि-सहितस्य रामस्यायोध्यां प्रति प्रस्थानं, सेतुवन्धनसमये प्रतिष्ठापिते महादेवायतने देवा-

धिदेवस्य रामेश्वरस्य समर्चनञ्चेति परस्परं सुसम्बद्धा, विविधानां घटनानां परम्परा, नाटकस्य कथावस्तूनि यथारसं यथाक्रमञ्च, मनोहरेणातीव प्रौढेन च संविधानेन सम्यक्तया संयोजिता ।

वस्तुतो, भारतीयजनताया मानसं सुदृढमधिष्ठितायां सुप्रसिद्धायामस्यां कथायां स्वल्पमपि संशोधनं परिवर्तनं वा सर्वथाऽविश्वसनीयमसंभाव्यं वा प्रतीयेत, तस्मादेव हेतोश्च सहृदयानां रसानुभूतिं सर्वथा प्रतिबध्नीयादेवेति कृत्वैव शास्त्रकारैरत्र रसविरोधि-संशोधनं प्रतिषिद्धम् । किन्तु-

"अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम् ।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा ॥"

इति नयेन सुप्रसिद्धायामपि कस्याञ्चित् कथायामितिवृत्तवशात्, केनापि कारणेन, यदि किञ्चिन्मात्रमप्यनौचित्यं समागच्छेत् तदा सावधानतया तन्निराकरणार्थमन्तराभीष्ट - रसोचित-कथोन्नयोऽप्युत्प्रेक्ष्य इति ध्वनिप्रस्थापन-परमाचार्याणामानन्दवर्धनानां राद्धान्तः । अत एव तृतीय उद्द्योते—

"इतिवृत्तवशायातां त्यक्त्वाननुगुणां स्थितिम् ।
उत्प्रेक्ष्योऽप्यन्तराभीष्ट - रसोचित - कथोन्नयः ॥

(ध्वन्या० ३-११)

इति कारिकाया व्याख्यायामाचार्यः कथयति--

"तत्रेतिवृत्ते यदि रसाननुगुणां स्थितिं पश्येत्, तां भङ्क्त्वापि स्वतन्त्रतया रसानुगुणं कथान्तरमुत्पादयेत् । न हि कवेरितिवृत्तमात्र - निर्वाहेणतम पदलाभः । इतिहासादेव तत्सिद्धे ।"

(पृ० १८३) इति।

इमां सिद्धान्तसरणिं, तस्याः सर्व-व्यापकमौचित्यतत्त्वञ्च हृदि निधाय, कविना नाटकेऽस्मिन् प्राचीनतमाऽपि रामकथा स्वकीय-कथावस्तु-संयोजनायामभिनव - समीक्षात्मकदृशा पुनः पर्यालोचिता। रावणस्य रामस्य च प्रादुर्भावादपि पूर्वमादित्यैर्देवैरार्यैश्च सार्धं दैत्यदानवादि-संस्कृतीनां संघर्षः सततं प्रचलित आसीदिति बहुभिर्देवासुरसंग्रामैरेव सिध्यति। परस्परं सम्पर्कात्तत्र विरोधिनां संस्कृति-धर्माणां सम्मिलनं समन्वयश्चापि प्रारब्ध इत्यैतिहासिका वदन्ति। अत्र दैत्यराजस्य सुमालिनो दुहितुः कैकस्या विश्ववन्द्यस्य ब्रह्मर्षिपुलस्त्यपुत्रस्य महर्षिविश्रवसश्च, पितृणामनुज्ञया, दाम्पत्य-सूत्रबन्धनमेव प्रबलेन प्रमाणत्वेनावतिष्ठते। दक्षिणापथे नर्मदायाः परिसरे प्रतिष्ठितोऽस्य महर्षेः सुप्रसिद्ध आश्रम एव विभिन्न धर्म-संस्कृति-समन्वयस्य प्रक्रियायाः प्रधानं केन्द्रमासीदिति तु सुप्रसिद्धमेव। किन्तु प्रयोगोऽयं पूर्णतया सफलतां नैवाध्यगच्छत्, यतो हि पौलस्त्योऽपि वैश्रवणोऽपि रावणः केवलमनार्या-पुत्रत्वादेव तिरस्कृतोऽपमानितस्तस्मादाश्रमान्निष्कासितश्च। एकस्यैव पितुरपत्यत्वेऽपि तस्याग्रजः कुबेरः केवलमार्या-पुत्रत्वादेव दिक्पालपदेन सहैव कोषाध्यक्षत्वेऽपि प्रतिष्ठितः।[1] एवंविधस्य

---

१. द्रष्टव्यः सप्तमोऽङ्कः पृ० १०३।१०४ :—

"रावणः—कथमार्यैः सह सन्धिप्रश्नः? वायुनन्दन! अपि नाम जानासि कीदृशी तिरस्कारसरणिर्विसोढानेन रावणेन। बाल्येऽनार्यासुतत्वान्निष्कासितोऽहमध्ययन-मालाया आर्योपाध्यायैः। दूरतरुच्छायोपविष्टेनैव श्रुत्वाधीतानि मया सर्वाणि वेदशास्त्राणि।"

रावणः—परं हनुमन्! विस्मरामि नाम तानाघातान्, प्रतिभा-शक्ति-सम्पन्नोऽप्यसौ रावणोऽनार्यत्वाद् दिक्पाल-पदात् प्रवञ्चितः। देवानां चाटुकारोऽसौ मे भ्राता कुबेरो दिक्पालपदेन सहैव कोषाध्यक्षे प्रतिष्ठितः केवलमार्यत्वात्।"

घोरस्य पक्षपातस्यापमानस्य च प्रतिक्रियावशादेव तेजस्विना शस्त्र-शास्त्रविद्या-पारंगतेन विचक्षेण कूट-नीतिज्ञेन रावणेन यौवने स्वपौरुषमाश्रित्य, स्वकीयं जीवनस्य मार्गञ्च स्वयमेवावधार्य, प्राचीनां रक्षःसंस्कृतिं समुद्धृत्य, परिष्कृत्य च, तत्र गुणोन्मुखीं, परिश्रमप्रधानां, सर्वविधभेदभावरहितां, सार्वजनीनां सुव्यवस्थां विधाय, "वयं रक्षामः" इति सुदृढमुद्घोष्य, तस्या उन्नायकत्वं, प्रसारकत्वञ्चाङ्गीकृत्य, विश्वस्मिन् जगति रक्षःसंस्कृति-दिग्विजययात्रायाः सुमहदभियानं प्रारब्धम्।

उत्तरापथे दशाननेन प्रारब्धस्यास्यार्यावर्तविजयाभियानस्य मुख्यान्युद्बलकोपस्तम्भनानि नाटकस्योपक्रमे, प्रथम एवाङ्के निर्दिष्टानि, तथाहि दक्षिणापथ-स्वामिना किष्किन्धाधिपतिना वानरेन्द्रेण वालिना सह विहितानाक्रमण-सहयोग-संविधानः सन्धिः, नैमिषारण्ये दण्डकारण्ये च रक्षसां विशालौ सन्निवेशौ, दण्डकारण्ये लङ्केशभगिन्याः सूर्पणखाया आधिपत्यं, तद्-रक्षायै च पूर्वोक्तसन्धिव्यपदेशेनास्मिन् जनस्थाने चतुर्दशसहस्र सैनिकैः राक्षस-सेनापरिसरस्य निर्माणं, तत्र च दण्डकाञ्चल-सेनाध्यक्षस्य कूटनीति-कलाकुशलस्य, अकम्पनस्यान्येषाञ्च तदधिष्ठातॄणां खरदूषणत्रिशिरसां, विराधादीनाञ्च राक्षस-धुरन्धराणां नियुक्तिः, सर्वत्र च सम्पूर्णेऽप्यार्यावर्ते महतो गुप्तचर-प्रतिष्ठान-जालस्य प्रसारणमित्यादि (द्र०, प्रथमोऽङ्कः, पृ० १०-११)। एवंविधे तात्कालिके राजनीतिक-परिवेशे, भारतेऽस्मिन् वर्षे प्रबल-सैनिक-शक्ति-समन्वितया, रक्षःसंस्कृति-प्रचारकाणामनया सुदृढया व्यवस्थया, पाशविक-शक्ति-मदोन्मत्तानां, हिंसापरायणानामाततायिनां रक्षसामपरिमिताभिश्चात्याचारपरम्पराभिर्हिंसितेष्वहिंसाव्रतिषु निरीहेषु योग-समाधि-निष्ठेषु मुनिजनेषु वहुशो विध्वस्तेषु यज्ञेष्वाश्रमेषु

च, दक्षिणापथे वहुकालादगस्त्यसुतीक्ष्ण—प्रभृतिमहर्षीणां निर्देशकत्व सततमनुष्ठितं यज्ञीय-प्रक्रियादि-धर्माचरणस्य, आर्यानार्यसंस्कृति-समन्वयस्य च सुकृत्यं सर्वथा विपर्यस्तं वभूवेति नाटकस्य प्रथमेऽङ्के (पृ० ६-८) सविस्तरं प्रतिपादितम्। अंकोऽयमग्रिम-घटनानां पृष्ठभूमिमिवोपस्थापयति।

एवंविधायां राजनीतिक-पृष्ठभूमौ स्वयं राघवेन्द्रो राम एव स्वजीवनयात्रायाः शाश्वतधर्माभ्युदयात्मकं विभिन्न-विरोधि संस्कृतीनां समन्वयात्मकं, तत्र दुरन्तवाधाभूतानां दुष्टानामाततायिनाञ्च दलनात्मकं, परमं लक्ष्यमधिगन्तुमेव, रक्षसामवस्तादुक्तैरकथनीयैर्भयंकरैश्चात्याचारैर्धर्माचरण-प्रसंगे समुपस्थितां महतीं वाधाञ्च परिहर्तुमेव देवराजस्य महेन्द्रस्य कूटनीति-प्रसंगतोऽगस्त्यादिमहर्षीणाञ्च महता प्रयासेन सम्पन्नं, चतुर्दशवर्षाणि यावत्, वनवासं स्वेच्छातो, वोधपूर्वकमेव स्वीचकारेति नाटककारस्य नवीनेयमुद्भावना युक्तिसंगतैव प्रतीयते।

रामस्य राज्याभिषेक-भङ्गस्य प्रसंगेऽस्मिन् यदतीव स्पृहणीयमनुपम-त्यागमयञ्च चरित्रं, तत् खलु केकयराज-दुहितुर्महाराज्ञ्याः कैकय्या एव। तया हि धर्मसमुद्धारस्य महायज्ञेऽस्मिन् सर्वस्वमेवाहुतीकृतम्। स्वकीयादपि परमप्रियात् पुत्रात् तिरस्क्रिया, लोकाच्चासह्योऽपवादो लब्धः। दुर्दैवाच्च सर्वापन्निवन्धनं, निरन्तरागाध-यातनानुविद्धं वैधव्यमेव समासादितम्। तस्याः सक्रियसाहाय्येन विना तु महाराज-दशरथ-प्रदत्ता रामस्य वनगमनाज्ञा कथमपि साधनीयैव नासीदिति नाटकेऽस्मिन् महर्षिरगस्त्यः सत्यमेव ब्रवीति (पृ० ६)। चित्रकूट-परिसरे राममवलोकयितुमागतायास्तस्याः कीदृशी

हृदय-द्राविका, करुणामयी चावस्थाऽसीदिति रामस्याधोलिखिते पद्ये यथाकथञ्चिदभिव्यञ्जितमेव कविना—

"वैधव्याहृत-सर्वस्वाप्यपमानव्यथाकुला ।
असह्यदर्शनेवासीन्मल्लिका तडिदाहता ।। (१/१७)

अस्मिन् पद्ये मनोरममुपमालङ्कार-संयोजनं कीदृङ् मर्मस्पर्शि संजातमिति सचेतसां चेत एव प्रमाणम् ।

"हिंसकैराहते राष्ट्रे, संत्रस्ते जनमानसे ।
राजदण्डदधानेऽपि, राज्ञि राजन्वती न भूः ।। (१/१८)।

इत्यासीद् रामस्य सुदृढो विश्वासः । अतः पूर्वमेव महर्षि-विश्वामित्र-यज्ञ-विध्वंसकान् निहत्यैव, तेन दृष्टं यत् समस्तमेवार्यावर्तं राक्षसानामाक्रमणेन संत्रस्तं वर्तते । तस्मात्तेन निर्णीतं यत् साम्प्रतं तस्य राज्यारोहणं सवथैवासाम्प्रतम् (पृ० १०) । तस्मादेव हेतोस्तेन सुदीघ-वनवास-प्रवासः सहर्षमेव स्वीकृत इति नाटककारस्य धारणयं सर्वथा युक्ति-समन्वितैव प्रतिभाति ।

रामायणस्य मूलकथायां घटनासमुदायस्योत्तरोत्तरं क्रमशो विकासे, परस्परं सम्बद्धस्य घटनात्रयस्यानौचित्यं सुस्पष्टतयैव प्रतिभासते, तथा हि प्रथमं, तावद् रघुकुलधुरन्धरस्य मर्यादापुरुषोत्तमस्य धीरोदात्तनायकस्य रामस्य समक्षमेव नारी-सम्मानस्य समस्तां मर्यादामुल्लंघ्य सूर्पणखायाः कर्ण-नासिकोच्छेदनम्, द्वितीयं खलु, रक्षःसंस्कृतेस्तदसह्यापमानप्रतिशोधार्थं राक्षसेन्द्रेण, विश्वविजयिना, दासीकृत-सकलभुवनलोकपालेन, दशकण्ठन, परम-तेजस्विना, लङ्केश्वरेण रावणेन, स्वर्ण-मृग-मायाच्छलं, चौर्यप्रवृत्तिञ्चावलम्ब्य, पतिव्रतायाः सीताया अपहरणम्, तृतीयं किल, स्वयं राघवेन्द्रेण, कूट-कपट-क्रिया-कलापमाश्रित्य, तरुपार्श्वेन वालिहननम् । आसु घटनासु द्वयी नाटकस्य नायकेन सहापरा च प्रतिनायकेन सह सम्बद्धा।

नाटकस्य विविधेषु संवादेष्वेव तथ्यमिदं सुस्पटमेव यदेषा घटनात्रयी सम्बद्ध-पात्रयोः प्रकृत्या सह न केवलमसामञ्जस्य-मेवापि तु विपरीततामपि संबिभर्ति। धीरोदात्तप्रकृते रामस्य समक्षमेव कस्या अप्यवलायाः कर्णनासिकाच्छेदनरूपमत्यन्तं गर्हितं कर्म संघटेत, स्वयं राघवेन्द्र एव कपटेन वालिनं हन्यात्, सुदृढचारित्र्य-सम्पत्सम्पन्नोऽपि रावणो लङ्केश्वरो निरपराधां सीतामपहरेदिति कथमपि सम्भावितं नासीत्। यद्यपि विशिष्टेऽस्मिन् घटनाक्रमे घटनानां क्रिया-प्रतिक्रियास्वरूपत्व-मपि स्फुटमेव; पूर्वा प्रत्यपरा घटना प्रतिक्रियारूपतामप्याद-धाति; यद्यपि च नासिकाच्छेदन रूप - दुष्कृत्यस्यार्य - संस्कृति-दृष्ट्या सूर्पणखायाः स्वैरिणीत्वं, कामातुरता, स्वकीयां भोग-वाधां निराकर्त्तुं, सीतायां सपत्नीत्वमध्यारोप्य, तस्या वधो-द्योग इति कारणानि नाटककारेणोपन्यस्तानि; तथैव च सीतापहरणेऽपि रक्षःसंस्कृत्यपमानप्रतिशोधात्मको हेतुरुल्लिखि-तस्तथापि सूक्ष्मदृशा नाटकस्य परिशीलनेन सुव्यक्तमेवैतत् यद् घटनाक्रमेऽस्मिन् सर्वत्र कूटराजनीतिक-विवशतैव सर्वानपि पूर्वोक्तान् हेतूनतिशय्य, तेषां स्रोतस्तया, प्रधानेन मूलकारण-त्वेनोपतिष्ठते।

अस्माद् विवेचनात् स्फुटं यत् पूर्वोक्तसाहित्यशास्त्रीय-नयेनासां घटनानामनौचित्य-परिहार एव नाटकस्यास्य कथा-वस्तुसंयोजनायां नाटककृतः प्रधानं लक्ष्यमभूत्। एष च भगवत्या. प्रधानपात्राणां सर्वातिशायिन्याः कूटनीतिक-विवश-ताया एव महिमा, माहात्म्यञ्च यदिदमनौचित्यं नाटककारो यथाकथञ्चिन्निराकर्तुमशकत्। पूर्वोक्तशास्त्रीयमर्यादयाऽति-प्रख्यातेति वृत्तसमन्वितायां रामकथायां प्रायः परिवर्तनस्य संशोधनस्य च प्रतिषिद्धत्वादासां घटनायां राजनीतिकपृष्ठभूमि-

संशोधनमेव नाटककृतो विलक्षणप्रतिभा-व्यापार-संरम्भ-गोचरां विषयतां समापद्यत। इदमेव चास्य नाटकस्यासामान्यं प्रातिस्विकञ्च वैशिष्ट्यमिति तु विदन्त्येव विद्वांसः।

सहृदयानां मनोविनोदायास्य संविधानस्य किञ्चिन्निदर्शनमत्र पुरस्क्रियते। द्वितीयाङ्कस्य विष्कम्भे दुर्मुख-विल्वलयोः संवादेन, रामस्य पञ्चवटीनिवासाद् दण्डकारण्ये जनस्थानमार्यजनस्थानं सम्भूतमिति वर्णितम्। तत्र विल्वलः कथयति—

"अधुना यज्ञधूमैरन्धीभूतमिदं वनम्। देवार्चनानुष्ठानैः शङ्खनादैर्बधिरीक्रियन्ते राक्षसानां कर्णाः। दण्डकारण्यमिदानीं तापसधनुष्टंकारेणाभयारण्यमार्यजनस्थानं जातम्। न कोऽपि राक्षसेभ्यो बिभेति...।"

(पृष्ठ १९)

दक्षिणापथे राघवेन्द्रस्याद्भुतोऽयं महाप्रभावोऽष्टमेऽङ्के मन्दोदरी-रावणयोः संवादेऽपि प्रतिविम्वितः। तत्र मन्दोदरी ब्रूते—

"नाथ! यथा श्रुतं मया तापसोऽसौ न केवलं युद्धकलाप्रवीणः स्वधर्मदीक्षा-कुशलोऽपि वर्तते। सर्वं दक्षिणापथमस्य प्रभावेणार्यधर्मे दीक्षितं जातम्। युद्धहिंसा विरोधे बहूनि रक्षःकुलानि लङ्कायामपि प्रच्छन्नार्याणि जातानि।"

(पृष्ठ १२२)।

अत्र लंकायां विभीषणो दक्षिणापथे च मारीचः प्रधानं निदर्शनम्। स्वभावत एव, दक्षिणापथे प्रतिदिनं प्रवर्धमानेन, रामस्यानेन महाप्रभावेण, सीमाप्रहरिणो विराधस्य च वधेन, रक्षःसंस्कृति-संरक्षको रावणोऽतीव चिन्तितः संजातः।

फलतस्तेन जनस्थाने रक्षःसंस्कृति-प्रचारे प्रसारे च मुख्यतया प्रतिबन्धकीभूतयोस्तापसयोर्विनाशाय, **"कूटनीतिप्रहारो निर्णीतः"**—(पृ० २०)। तेन स्वकीया भगिनी तापसौ वशीकर्तुं प्रेषिता। परन्तु दैवदुर्विपाकान्न केवलं प्रहारोऽयं राघवेन्द्रे लक्ष्मणे च विफलीभूतः, प्रत्युताकाण्ड एव सूर्पणखाया दुर्व्यवहारेण वीभत्से तस्याः कर्णनासिकाच्छेदनरूपे दुष्कृत्येऽपि परिणतः। अस्या घटनाया प्रतिक्रियायामेवाग्रिमा सीताहरण-वालिवधादिघटनापरम्परा प्रादुर्भूतेति नाटकस्याग्रिमेष्वङ्केषु सर्वथा स्पष्टमेव।

तृतीयेऽङ्के प्रकटीभवति यत् सीताहरणरूपा घटनाऽपि लङ्केश्वरस्य रावणस्य कूटनीतिक-विवशताया एव दुष्परिणाम आसीत्। विष्कम्भकादनन्तरमङ्कस्योपक्रम एव प्रधानमन्त्रिणो माल्यवतो राक्षसेश्वरस्य रावणस्य चाधस्तादुद्धृतः संवादः, सर्वप्रथमं लंकेशस्य, रक्षसां महतोऽपमानस्य प्रतिशोधार्थं, रक्षः संस्कृतेर्दिग्विजययात्राया उत्तरापथे च शिवाराधनस्य संकल्प-मेवाभिव्यनक्ति—"माल्यवान्– आश्वसतु नाम स्वामी। रक्षसां सेना सज्जीकृता वर्तते। समुद्र-मार्गेण भारतस्य दक्षिणे पुलिनेऽवतरणव्यवस्था साधिता। केवलं स्वामिनः समादेशमेव प्रतीक्षते।

रावणः—अहो! देवलोकविजयवाहिनी पुनरिमान् मर्त्यान् विजेतुं सन्नद्धेति विजृम्भन्ते मे भुजदण्डानि। आर्यावर्त—विमर्दनाय स्वयं कालो निमन्त्रितस्तापसेन। स्यान्नाम पुनरुत्तरापथे शिवाराधनम्। अस्तु नाम रक्षःसंस्कृतेर्दिग्विजययात्रा।

(पृ०-३८)

किन्तु यथाऽत्रैव दण्डकाञ्चलसेनापतिनाऽकम्पेन प्रतिपादितमभियानमिदं विविधाभिर्बाधाभिः सम्बद्धत्वात् सुकरं नासीत्, यतो हि सागरोऽसौ लङ्का संरक्षकोऽपि वहिर्याने बाधक एव, वायुमार्गेण च सैन्याभियानं दुष्करं सम्भाव्यते। चिरकालादार्यभक्तो भल्लूकराजो जाम्बवान् दक्षिणापथे रक्षसां मार्गविरोधक इति प्रवला सम्भावना विद्यत एव। यदि च खरदूषणत्रिशिरसां वधाच्चतुर्दशसहस्रराक्षससैन्यविध्वंसाच्च, दक्षिणापथे रावणशक्तिसंक्षयमनुसन्धायाऽतुलपराक्रमेण राघवेन्द्रेण सह सन्धिं विधाय च, वानराणां शक्ति-संवर्धने सावधानोऽसौ किष्किन्धाधिपतिर्बालिः पूर्वसन्धि-विरोधं कुर्यात् तदा रक्षसां कृते स्थितिर्विस्फोटका भविष्यति। यतः—

"बालिना सह युद्धे चेत्, सैन्यशक्तिक्षयो भवेत्।
आर्यावर्तजयस्यैवं लक्ष्यं किमधिगम्यते ?" (३।६)

अतः शत्रूणामनायासं विनाशाय, कूटनीतिप्रक्रियैव श्रेयस्करी। अनया मारीचस्य स्वर्णमृगमायाप्रपञ्चमाश्रित्य सीतापहरणाद्, **'एका क्रिया द्व्यर्थकरी प्रसिद्धे'** ति न्यायात् सूर्पणखाया अपमानप्रतिशोधोऽपि भवेत्, सलक्ष्मणस्य रामस्य विनाशाच्चार्यावर्तविजयाभियानमपि साफल्यमापद्येत।[1] मारीचेन सह रावणस्य निम्नलिखितेन संवादेनापि राक्षसेन्द्रस्येयं कूटनीतिक-विवशता स्फुटीभवति—

"मारीचः—कीदृशः प्रतिशोधः, राक्षसेन्द्र!
...रावणः-सीतापहरणरूपः, सूर्पणखापमान-प्रतिशोधः।

---

१. द्र०, तृतीयोऽङ्कः, पृ० ४१ : "अकम्पनः—इयमेव सीता भगिन्या अपमानस्य चास्या आपदो मूलकारणमत्र दण्डके वर्तते। अस्या अपहरणं तापसविनाशस्यापि मूलकारणं भविता।

राज्यान्निर्वासितो रामस्तापसोऽसौ सलक्ष्मणः।
सीतावियोग-संतप्तः, प्राणान् संत्यक्ष्यति ध्रुवम्॥

यतस्तद्वियोगेन रामो जीवनधारणेऽक्षमो भविता रामे मृते तस्यानुजस्यापि गतिस्तादृशी भवितैव । × × × मारीचः---शान्तं पापम् । रक्षःसंस्कृतेः संरक्षकस्येदृशी चौर्यप्रवृत्तिः । अबलापमान-प्रतिशोधो ऽबलापमानेन ? किमिदं विश्वविजयिनो रावणस्य कृते नायशःकारणं भविता ? × × × रावणः--- मातुल ! न मेऽबलापमानप्रवृत्तिस्तथापि कूटनीतिक-कारणादेवं विधीयते । यतः—

साध्यप्रकरणे विज्ञाः कार्यसाफल्यसाधकाः ।
साधनेषु प्रवृत्तेषु न किञ्चिद् दोषदर्शिनः ।"

(पृ० ४६-४७)

छलेन वालिवधेऽपि नायकस्य राघवेन्द्रस्यैवंविधैव कूटनीतिक-विवशता षष्ठेऽङ्के दरीदृश्यते । 'समानशीयव्यसनेषु सख्यमिति न्यायेन धर्मपत्न्यपहरणरूपस्य समानव्यसनस्य साधर्म्याद् रामसुग्रीवयोरग्निं साक्षीकृत्य, या मैत्री सम्पन्ना, तस्याः प्रधानतया त्रीणि लक्ष्याण्यभूवन्, प्रथमन्तु बालिनं निहत्य किष्किन्धाधिपत्ये सुग्रीवस्याभिषेकस्तस्य स्वकीय-भार्यायाः पुनः संप्राप्तिश्च, तदनन्तरं वानरादीनां विशालसेनायाः साहाय्येन लङ्काभियानं, तत्र सकुलस्य रक्षसाधिपतेः रावणस्य वधः, अन्ते च रावणकारागारात् सीताया विमुक्तिः यदि कूटनीति मनादृत्यात्र रघुकुलक्रमागता, सडिण्डिमघोषं शत्रुं समाहूय, धर्म्या सम्मुखीना च समरसमायोजनाऽनुसृता स्याद्—यथा सुग्रीवेण सह सन्धिं विधाय स्वयं रामेण प्रस्तावितं—(द्र० पृ० ८२-८३), तदा सर्वाण्यपीमानि लक्ष्याणि सर्वथा विपर्यय-स्तानि भवेयुः । प्रसङ्गेऽस्मिन् निम्नलिखिते रामसुग्रीवयोः

संवादे वानरेन्द्रेण कृतं तात्कालिक-राजनीतिकपरिस्थितेः सुविचारितं तात्त्विकञ्च विश्लेषणं सावधानतयाऽवधातव्यम्—

"सुग्रीवः—बालिव्यवस्थाव्यवहारतो राज्ये सर्वत्र जना आतङ्किता अवसरं प्रतीक्षन्ते। प्रजाऽद्यापि मयि स्निह्यति। सेनायाः सद्भावोऽपि मयाऽर्जितः। अतो यदि प्रत्यक्षयुद्धघोषणा क्रियते चेत् बालिनिर्देशेन युद्धेऽवतीर्णा समग्रसेना विपत्स्यते। विनाशेन तस्याश्च विजिताऽपि किष्किन्धा वीर-शून्या लङ्काभियानेऽस्माकं कथं सहायिका भविता। यतः---

"लङ्काभियान-काले, भवितास्माकं बलं यदीयं तत्।
समरेऽत्रैव निहत्य, स्वयमामन्त्रणं विनाशस्य॥"

(पृ० ८३)।

रामः--सुविचारितं वानरेन्द्र! ×× सुग्रीवः- यथावगतमेव यद् बाली रावणेन सह विहित-सन्धि र्वर्तते। अनेन दुरभिसन्धिना न केवलं वानरसेना, रक्षःसेनाऽपि युद्ध-सम्मुखीना सम्भाव्यते।..राम:- सत्यमुक्तं वानरेन्द्र! तदेतदभियानमनेन दुष्करं सम्पत्स्यते।..सुग्रीवः-अस्मिन् युद्धे किष्किन्धा पक्ष-त्रय-विरोधस्य युद्ध-स्थली भविता। लङ्काया दृढ-रक्षा-पक्तिं विधाय, रावणः स्वसेनया किष्किन्धा-युद्धं विस्तारयिता। उभयथापि वानर-सेना विनाशेनैकतो लङ्काभियानं खपुष्पायितं भवितैवापरतो दशकण्ठसेना-कृते, सुकरमार्यावर्ताभियानं भविष्यति।... रामः- वानरेन्द्र! सर्वत्र ते बुद्धि-चातुरी प्रतिभा-प्रौढतामेव

प्रकटीकरोति । तदत्र कीदृशं विचारितम् । सुग्रीवः- आर्य ! अत्र कूटनीति-प्रकरणेनैव बाली हन्तुं शक्यते ।" (पृ० ८४) । ++ मायाविनः प्रकरणमाश्रित्य बालिनाऽहं बहुवारं ताडितो गदा-युद्धे । तं गत्वाऽहं पुनर्गदायुद्धायाकारयामि, कालमप्रतीक्षमाणः स सत्त्वरेण मां हन्तुमागमिष्यति । तदैव--'तरुपार्श्वगतेनैव, युध्यन्नेव मया सह । त्वया बाली निहन्तव्यो बाणेनैकेन राघव !' ।।" "रामः-अहो सुग्रीव ! कथमेतद् राघवेण सम्भाव्यते ?

शरसन्धाने शिथिलं प्रहरति लक्ष्य-स्थितं न यः शत्रुम् ।
तरुपार्श्वेन निहन्ता रामोऽसौ बालिनं, हा धिक् ।।

रामो रणे शूरो न खलु कूट-कलापे । तदावेदयतु नाम बालिने यदसौ दाशरथिर्द्वन्द्वे तमाह्वयति । ... ... सुग्रीवः :- राजनीति - विशारदेनाप्यार्येण कथमेतद् विस्मर्यते यदसौ बाली कारणमविज्ञाय कथं द्वन्द्वे प्रवृत्तो भविता । युद्ध-घोषणा चेत् क्रियते, तदा पूर्ववत् योजना-विनाशः । 'सति योजनाविनाशे लङ्कायानं कथं नु सम्भाव्यम् ? लङ्कागमनाभावे भविता मुक्तिर्न जानक्याः ।।" (पृ०, ८५, ८६) ।

सुदीर्घेणानेनोद्धरणेनैतत् प्रायः सुस्थिरमेव भवति यद् वालिहननस्य प्रसङ्गेऽस्मिन् कूटनीतेः समाश्रयणादृते, राघवेन्द्रस्य कृते नावर्तत किञ्चित् विकल्पान्तरम् ; न चाविद्यत किञ्चिदन्यः पन्थाः । वस्तुतः, कूटनीतिक - विवशताया व्यापारेण वालिनो व्यापादनेऽस्मिन् मर्यादापुरुषोत्तमेन तेना-

गाधाऽरुन्तुदा, महती पीडैवानुभूयते स्म । अतः स लक्ष्मणं प्राह —

"राम :— स्यादेवं लक्ष्मण ! तथापि कपट-व्यापारेण बालिनो व्यापादनं भिनत्ति मेऽन्तरात्मानम् 'सुग्रीव-युद्धे सहसा मदीयाशुगेन विद्धः पतितो धरायाम् । मर्माणि 'धिक्' शब्द-शरैर्विभिन्दन् विस्मर्यते नैव मया कपीन्द्रः ॥" इति ।

तस्य घनीभूताऽन्तर्व्यथाऽन्यत्रापि प्रकाशिता कविना, तथा हि—

"राम :- (उपविश्य) वत्स लक्ष्मण ! ईदृशीयं वनवासपरिणतिर्भविता, स्वप्नेऽपि न मया कल्पितासीत् । यत :-

"सीतापहरणेनैव ज्वलितं मानसं मम ! बालिहिंसा-वसादाग्निः कुरुते भस्मसादिव ॥" पृ० (८६)।

लक्ष्मणश्चात्र समाधत्ते— **"मर्यादापुरुषोत्तमस्य केवलं रामस्यैतद्वचनं, न खलु नामार्यावर्त-रक्षाव्रतिनः कौशलेन्द्रस्य । एतदपि नाम कथं विस्मर्यते यदस्य बलमाश्रित्य, रावणस्य कृते कदाप्युत्तरापथाक्रमणं कीदृक् सुकरमासीत् ?"** (पृ० ६१)। **सर्वथा वेधसो बलीयसी स्पृहैवैषा । अत्र रामोऽयं केवलं निमित्त-मात्रमेव[1] बभूव ।"** (पृ०८६)।

---

१. द्र०, षष्ठोऽङ्कः, ',रामः—यथा रोचते विधात्रे । अहमत्र निमित्तमात्रम् ।" + + पृ०, ८६ : रामः— ... ... अथवा लक्ष्मण ! भाग्यलिपिरेव प्राधान्येन वर्तते । यतः—

मनुष्यभाग्य-व्यवसायिना लिपि-
र्यथा निबद्धा विधिनास्य मस्तके ।
तथा हि वात्या तृणवन्नियन्त्रितः
करोत्यसौ जीवन-यापन-क्रियाम् ॥"

अग्रिमेषु चतुर्ष्वङ्केषु रामायणीयेतिवृत्त-परम्परानुरूपमेव कथावस्तु संयोजितं क्रमशः। अत्र नाटक-कर्तुः काचिन् मौलिकी परिकल्पना न दृश्यते। अतोऽत्र समालोचनादृशा न वहु वक्तव्यम्। सप्तमेऽङ्के नेपथ्येन राक्षस-द्वयस्य संवादं संयोज्य **'बाहुभ्यां सागरं योऽतरदतुलबलो ध्वंसकः सिंहिकायाः'** (७/१) इत्यादिपद्येन समासतो हनुमतो बाहुभ्यां सागर-संतरण-सिंहिकाध्वंसन - सीतान्वेषण - वाटिका - विनाशनादि विलक्षणकार्य - कलापान् संसूच्य, हनुमद्रावण - संवादस्य, लंकादहनस्य च पूर्व-पीठिकैव निर्मिता। अत्र नाटककृतो दृश्य - संयोजनया, विलक्षणाभिश्च वचोभङ्गीभिर्वानरेन्द्रस्य हनुमतोऽद्भुतोऽप्रतिमश्च पराक्रमः प्रत्यक्षायमाण इव वाभासते। तद्तथा **"(नेपथ्ये) अग्नि-दाहेन दंदह्यमाना भोः! भोः राक्षसाः! पश्यत, रे पश्यत, कीदृशमस्य कृत्यं विकट-मुखस्य मर्कटस्य! भस्मीकृतं नगरं, ध्वस्तानि सौधानि, नष्टानि साधनानि, पश्यत, रे पश्यत।**

लीलालाङ्गूललोलस्फुरदनलचलद्रोचिषां ज्वाल-मालः,
हुंकारोत्पात-लङ्काशिखर-गत-मरुद्-वेग-बिभ्रत्-प्रतापः।
वह्निध्वस्तोच्चसौधाध्युषित-जन-विपच्चीत्कृति-व्याप्त - लोको,
भाग्यव्योम्नीव दीप्तो ज्वलितकपिरयं रक्षसां धूमकेतुः॥'

दशमेऽङ्के युद्ध-स्थली-वर्णने, रामरावणयोर्युद्ध-वर्णने चेयमेव विशिष्टता सर्वत्र संलक्ष्यते।

निरङ्कुशैर्विषधरसदृशैर्लङ्कायाः प्रशासकैः शान्तं लङ्काजीवनं सीतापहरणकाण्डेन कथं युद्धोन्मुखीकृतमिति

सूचयितुं, नाटककृताऽष्टमाङ्कस्योपक्रम एव प्रातरेव दुःस्वप्न-संदर्शन-विह्वलाया महादेव्या मन्दोदर्या मनोविनोद-व्याजेनाऽऽहितुण्डिक-दृश्यं संयोजितम्। अत्र मुद्राराक्षसस्य द्वितीयेऽङ्के संयोजितस्यैवंविधस्य दृश्यस्य प्रभावस्तु स्फुट एव। तादृशमेवाकाशभाषितमप्यत्रोपलभ्यते। तदाप्युभयोर्दृश्ययोरुद्देश्यन्तु सर्वथा भिन्नमेव। अतः प्रशंसनीयमेवैतत् संयोजनम्। मन्दोदर्या दुःस्वप्नोऽपि भविष्यद्घटनासंसूचकत्वात् सार्थक एव। लङ्कादहनादनन्तरं, न केवलं राजमहिष्या मन्दोदर्या एवापितु साधारणजनताया अपि मानसं कियत् संक्षुब्धमजायतेति सागरस्यापर-प्रान्ते लङ्कामाक्रान्तुमुद्यतायाः सुग्रीवाधिष्ठिताया विशाल-शत्रु-वाहिन्या उपस्थितिमाकलय्य विभीषणस्यानेन कथनेन सुस्पष्टमेव—

"विभीषणः- तात! किमियं दुःस्वप्न-संदर्शनाकुला केवलं मे भ्रातृ-जायैव, सकलमेतल्लङ्काजीवनं, न केवलं नक्तं, दिवा-दुःस्वप्ने विक्षिप्तं वर्तते।"

(पृ० १२५)

अङ्कस्योपसंहारे च **"हन्याद् रक्षो-विराधं खरमतुलबलं नासिकां यो भगिन्याश्छेत्तुं शक्तः प्रसह्य, प्रखर-शर-हतो येन बाली क्षणेन"** (८।१४) इत्यादिना पद्येन राघवस्य शौर्यं वर्णयन्तं विभीषणं शत्रु-पक्षपातिनं मत्वा तं प्रच्छन्नार्यत्वेन चाधिक्षिप्य, दशग्रीवसंरक्षिताद् राष्ट्रात्तस्य निर्वासनमपि सुष्ठुतया वर्णितमेव। एवमेव नवमेऽङ्के विभीषणशरणागतिः सागरस्योपरि सेतु-निर्माणं, दशमे च रामरावणयोर्भीषणं युद्धं, तत्र लङ्काधिपतेः रावणस्य वधादीनां

घटनाक्रमश्च स्वकीययौजस्विन्या पद्धत्या प्रत्यक्षवत् सहृदयानां पुरस्तात् समुपस्थापितो नाटकेऽस्मिन् नाटककारेण ।

'न हि रसादृते कश्चिदर्थः प्रवर्तते' इति भरतमुनेः सिद्धान्तः । **'शृङ्गार-वीर-शान्तानामेकोऽङ्गी रस इष्यते'** इति च 'साहित्य-दर्पणे' विश्वनाथ-कविराजेन निर्धारितम् । तदनुसारं नाटकेऽस्मिन् उत्साहस्थायिभावको धर्मवीरो युद्धवीरश्चाङ्गी रसः । अन्ये च शृङ्गार-करुण-विप्रलम्भ-भयानकादयो रसास्तस्याङ्गानि । नाटकस्य प्रारम्भे नान्दीं प्रस्तावनामन्ते च भरतवाक्यमङ्कानामुपक्रमेषु च विष्कम्भकान्, यथास्थानञ्चाकाश-भाषितं नेपथ्यादिकं संयोज्य, कविनात्र भारतीयैव नाट्य-निर्माण-पद्धतिरङ्गीकृता। घटनानां प्राकृतिकः परिवेशोऽपि यथास्थानं सम्यक्तया संयोजित एव। प्रकृतेर्वर्णनमत्र मनोरमं, सजीवं, संश्लिष्ट-विम्बग्रहणात्मकञ्च संलक्ष्यते। अनेन वर्णनेन च संघटितानां घटनानां स्वाभाविकता चारुता, प्रभविष्णुता चोत्तरोत्तरं परिवर्धत एवेति सूक्ष्मदृशा विभावयन्तु सहृदयाः। मर्यादापुरुषोत्तमो रामोऽत्र धीरोदात्तो नायको धीरोद्धतो लङ्केशो रावणश्च प्रतिनायकः। पुण्यशीला, पतिव्रतानां सर्वोच्चमादर्शं पुरः समुपस्थापयन्तीव, भगवती सीताऽत्र नायिका, रक्षःकुलालङ्कारभूता, पतिव्रतानामग्रगण्या मन्दोदरी च प्रतिनायिका। न केवलं प्रधानपात्राणामेवापि तु लक्ष्मण-विभीषणादीनामपि चरित्रचित्रणमत्रोत्तरोत्तरविकासस्य स्वाभाविकतायाः प्रौढतायाश्चोच्चकोटिमाटीकते। ओजस्विनी विषयानुकूला चात्र विविधानां संवादानां पद्धतिः सम्बद्ध-पात्राणां विविधगुणगणानां गरिमाणं, लोकोत्तरं शौर्यं, भव्यां विचार-परम्परामुदात्ताञ्चाचारसुषमां प्रकाशयति।

तस्मान्नाटकमिदं मनोरमकथागुम्फनमाधुरी-धुरीणं, नवाभिनवपरिकल्पनालङ्कृतं, भव्यभावावेष-सम्भृतञ्चाधुनिकेषु, वस्तुतोऽनुपममपूर्वञ्च सम्पन्नमिति निःसंदिग्धमेव प्रतिभासते।

नाटकस्य पञ्चमेऽङ्के नायकं राममाश्रित्य करुणविप्रलम्भरसस्य काऽपि पवित्रमाऽभिव्यक्तिः सततं महाकविभवभूतेरुत्तररामचरितं स्मारयति। तथा हि—"**रामः-सैव जानकी मया प्रहारिता लक्ष्मण !**

या साकेत-सुखं विहाय विभवं, भूत्वा तपस्वि-प्रिया,
याता दण्डकमुग्रसत्त्वमपि हा ! विश्वस्य मद्विक्रमम्।
तां वै व्याघ्रमुखे मृगीमिव रिपोरङ्के क्षिपन् कातरां
रामोऽद्यापि धनुर्धरो भुवितले जीवत्यसौ निष्ठुरः॥

लक्ष्मणः-आर्य ! धैर्यमालम्ब्यताम्। आर्य क्षत्रियोऽसि, कथं नाम मोहेन सीतान्वेषणोद्यमः शिथिलीक्रियते

रामः- (अनाकर्ण्य) हा देवि सीते ! हा मय्यनुरागिणि वैदेहि ! त्वां विना शून्या दिशः तमो-वृतं जगत्, नीरसा रसा, निष्फलं जीवनं, निर्बलो रामः। त्वां विना कथं मेऽयोध्यानिवृत्तिः अरण्यमेव शरणमथवा मृत्युपाश एव। तदा गच्छ सीते ! क्षमस्व, वियोग-प्रतिशोध-ज्वालावलीढं, पश्य गतायुषं रामम्—

हा हा ! देवि ! द्रुमतरुलतासिन्धु-शैला विशाला
द्रष्टुं त्वामाकुलितमनसा मार्गयन्तीव मार्गम्।
आगच्छार्ये ! करुणहृदये ! राममेनं क्षमस्व
शीतस्पर्शैः किसलयकरैः संस्पृशन्ती ममाङ्गम्॥(पृ०७३)

इत्यादि। यद्यपि भवभूति-प्रोक्तदिशा, ग्रावाणमपि रोदयितुं, वज्रहृदयमपि च दलयितुं क्षमा, 'पुटपाकप्रतीकाशा' सीताया

अपहरणाद् रामस्यातीव करुणामय्यवस्थाऽऽसीत्, तथापि तस्यामपि तस्य विलपनं, शक्तिशैथिल्यं नैव सूचयति स्म। अस्य विलपनस्य हेतुस्त्वन्य एवाभूत्। तं स्वयं राम एव निम्नाङ्कित उद्धरणे निर्दिशति—

'लक्ष्मण! किमेतत्? करुणहृदयस्य विलपनं, रामस्य शक्ति-शैथिल्यं सूचयति। न हि न हि भ्रातः! नैतानि सीता-विरह-विलपनानि। इमानि तु दशकण्ठ-कूट-पराभूतस्यार्यक्षत्रिस्य पराभवाश्रूणि, यदस्य सीतासंरक्षण-व्रतिनोऽङ्कादपहृता जानकी। विश्वास-भ्रंशाद् विनष्टा सीता, कलङ्कितं रघुकुलम्। अयमेव दहनो मां तापयति। यत्—

रावणो नश्यते, वापि जानकी मुक्तिमाप्नुयात्।
सीतापहार-दुर्वृत्तं कथं लोके विनंक्ष्यति॥
इति कृत्वा पराभूति-ज्वाला दहति मानसम्।
वृथा क्षात्रं, धनुः शौर्यं, यदा सीतापहारिता॥' (पृ० ७६)

अस्याः समीक्षाया उपक्रमे केन्द्रीयां भावनामधिकृत्य यदवोचाम, तस्य प्रकाशे रामस्य विलपनहेतुमभिलक्ष्य कवेरियं नवीनोद्भावना सर्वथा युक्तियुक्तैव प्रतिभाति, तस्य प्रतिभाया मौलिकत्वञ्च सूचयति। एवमेव नाटकेऽस्मिन् भयानकादयोऽन्येऽपि रसाः प्रतिपाद्यविषयानुरूपं, सर्वाङ्गीणां सौन्दर्य-सम्पदं, प्रौढताञ्चादधानाः सम्यक्तयैवाभिव्यञ्जिताः। ताञ्च मूल एव विभावयन्तु सहृदयाः। तेषां विवेचनन्तु, विस्तरभिया, नात्र वितन्यते।

सप्तमेऽङ्के लङ्कादहनादव्यवहितपूर्वमशोकतरुतले स्वकीयं दुर्भाग्यमनुध्यायन्त्याः सीतायाः, दशमे चाङ्के युद्धभूमौ पतितस्य,

शक्त्याघातप्रकुपितस्य राघवस्यामोघेन ब्रह्मास्त्रेणाहतस्य रावणस्य च विविधानां भावनावेशानामतर्द्वन्द्वं स्वकीयं किमपि विशिष्टमेव सौष्ठवमवगाहते।[1] अत्र क्रमशो नारीजीवनस्य विडम्बना, भौतिकशक्तेः प्रतापैश्वर्य-समृद्धेश्च, येषां मदेन मुधैवोन्मत्तोऽयं दुर्जनोऽसंख्यानि दुष्कर्माणि विविधाञ्चारुन्तुदानत्याचारान् समाचरति, क्षणभंगुरता, साभिप्रायेण, सशक्तेन सरलेन च वाचां प्रवाहेण संदृब्धा। नाटकेऽस्मिन् यथाप्रसङ्गं बहूनि सूक्तिरत्नान्यपि समुल्लसन्ति, तद्यथा—

सद्यः प्रकुरुते विद्वानागतस्य प्रतिक्रियाम्।
विलम्बितस्य कार्यस्य कालः संहरति श्रियम्॥ (३/८)

'मरणं जीवनधर्मो यावज्जीवेदुपार्जयेत् कीर्तिम्। सर्वं नश्वरमेका कीर्तिर्लोकान्तकालेऽपि।' (५/१६)

"त्रुटीनां दर्शनं, ज्ञात्वा स्वीकृतिः, परिशोधनम्। दर्शनं

---

१. द्र०, (क) सप्तमोङ्कः, पृ० १०९-११। × × × "अहो! कीदृशीयं नारीतिहासपरिकल्पना? विनाशमूलमेव सर्वत्रेयं दृश्यते। वनवास-प्रसङ्गे कैकयी, सीता-हरण-प्रसङ्गे सूर्पणखा, तद् रामरावणयोर्युद्धप्रसङ्गे किमियं सीता कारणं भविता? नारीजीवन, कीदृशी ते परिणतिः। तवैतद् यौवनं पुरुषमाकर्षति मातृत्वं विश्वं सृजति, पददलितापि त्वमेव लक्ष्मीस्त्वमेव दुर्गा, त्वमेव महामायान्नपूर्णेति सर्वत्र पूज्यसे। त्वमेव प्रकृतिरूपा पुरुषं नर्तयन्ती प्रतीयसे।"

(ख) दशमोऽङ्कः, पृ० १५२ : (ततः प्रविशति बाणाहतः पतितो रावणः) रावणः—आः किमेतदापतितम्? प्रतापैश्वर्यसमृद्धं मत्सम्मुखे विनष्टं सकलमेव रक्षःकुलम्। शक्त्योपार्जितं दिग्व्याप्तं यशः सकलं धूलिधूसरीभूतम्। क्व गतो भ्राता कुम्भकर्णः? क्व गता मे भटा यूथपा राक्षसाः? क्वासि पुत्र मेघनाद? देहि मे प्रतिवचनम्। न कोऽपि, सर्वं विनाशितं गर्वितेनैश्वर्यमत्तेनानेन रावणेनैव। मयैव निष्ठुरेण सत्परामर्शः सदैव तिरस्कृतः।" इत्यादि।

महतामेतज्जीवनस्य मनस्विनाम् ॥' (७/१८)
अधीतान्यपि शास्त्राणि, बुद्धेर्वैदग्ध्यमेव च। अहंकार-मतेः सर्वं, सर्वथा निष्फलं भवेत् ॥ (१०/१९)
इत्यादीनि।

नाटकस्य कथावस्तुनः प्रवाहे केचित् कवेः समसामयिकाः प्रसङ्गा अप्यत्र प्रतिविम्बिता अभूवन्, तथाहि-प्रस्तावनायामेव-**'आपणेषु महार्घत्वं वस्तूनामिह विद्यते। तस्कराः कृत्रिमाभावैर्लुण्ठन्ति वणिजो जनान् ॥'** (१/७) इति पद्येनोपक्रम्य शर्करा-घृतादिभोज्यपदार्थानां कृत्रिमाभाव-विधायकेषु दुर्जनेषु च दानवत्वं समारोप्य सूत्रधारेण निम्न-लिखिता प्रतिज्ञा कृता—

"चौरान् लोकविनाशकर्मनिरतानेतांस्तथा लुब्धकान्,
क्षिप्रं, नाशयितुं समाजसरितो नक्रान् प्रतिज्ञातवान्।
आलोक्याहततापसास्थिनिचयानुद्यद्धनुर्दण्डके, रामो
दाशरथिर्यथैष विपिने रक्ताशनान् राक्षसान् ॥

दानवानां रक्षसाञ्च विनाशधर्म्यात् प्रतिज्ञेयं दण्डकारण्ये तापसानामस्थिनिचयानवलोक्य रामस्य प्रसिद्धया प्रतिज्ञया सह सुसम्बद्धा भवति, सूत्रधारप्रयोगतः पात्र-प्रवेश-सूचनादत्र प्रयोगातिशयरूपा प्रस्तावना। विश्वनाथादयस्त्वत्रावलगिता-भिधां प्रस्तावनां मन्यन्ते। तथैव तृतीयेऽङ्के मारीचस्य—

'बद्धवैरो यदा धर्मो जातिर्वा संस्कृतिर्भवेत्।
विहितस्वार्थसम्बन्धा विनाशायैव केवलम् ॥'

(३/२१) इति पद्ये भारतवर्षस्याधुनिकी सामाजिक-परिस्थितिः प्रतिविम्बितेति कथयितुं शक्यते। अन्यत्र च **"विकृत-निज-विवेका यत्र भूपा मदान्धा, विगलित-मति-मन्दा मन्त्रिणश्चाटुकाराः** (३/१२) इत्यादि,

"वन्दीकृत्य प्रजा-वाणीं हितां प्रज्ञां विपश्चिताम्। वर्तते चाटुकारैर्यो भूपालः स विनश्यति ।।' (६/१९)इति, **'नश्यति हिंसापरकं शासनमुन्मूलयति प्रजा ह्यसन्तुष्टा। कूलङ्कषेव सरिता वृक्षान् निरङ्कुशान् महीपालान् ।'** (७/१२), इति **'केवलं प्रतिशोधाय क्रियाशीलं प्रशासनम् । प्रजाहिते निरुद्दिष्टमल्पकालिक-मुच्यते ।'** (७/१४) इति च विविधेषु सन्दर्भेषु, क्रमशो माल्यवद्-राम-हनुमतां कथनेषु, रावणस्य वालिनश्च राज्य-स्थितिमधिकृत्य, रामायणीकथा-प्रसङ्गानुकूलं, कविना यदुक्तं, तत्र मन्यामहे, नाटकस्य प्रणयनकाले भारतवर्षस्य यादृशी राजनीतिक-स्थितिराविर्भूताऽऽसीत्तस्याः प्रतिध्वनिरिव श्रूयते । कथावस्तुनोऽङ्गभूता सती, खल्वेवंविधा समानकालीना प्रासङ्गिकता न दोषावहा, प्रत्युत नाटकस्य विविधेषु दृश्येषु कामपि चमत्कृतिमेवानयति, रसानुभूतौ च सहृदयानां साहाय्यमेव विदधातीत्यस्माकं मतम् ।

संवादानां प्रवाहेऽनवधानतया नाटकस्य वाक्यसंयोजनायां केचिद् दोषा अपि समापतिताः । तेषामपि दिङ्मात्रमत्र निर्दिश्यते **'यदि' 'चेदि'**त्यव्ययोः पर्यायवाचित्वान्निम्न-लिखिते वाक्येऽनयोरेकतर एव प्रयोक्तव्यः—

'अतो यदि प्रत्यक्ष-युद्ध-घोषणा क्रियते चेद् बालिनिर्देशेन युद्धेऽवतीर्णा समग्र-सेना विपत्स्यते ।' (पृ०, ८३); अग्रिमे (८४) पृष्ठे—**'दशकण्ठ-सेना-कृते'** इत्यत्र **'दशकण्ठसेनायाः कृते'** इत्येव साधीयान् प्रयोगः। **'लंका विनाशोन्मुखे विद्यते'** (पृ०, ९७) इत्यत्र **विनाशो-न्मुखमिति'** साधु । **"किमुत नापश्यद् हनुमन् ! सीता-**

ऽशोकवाटिका मध्यास्ते' (पृ०, १०३) इति वाक्ये हनुमतो मध्यमपुरुषत्वा'**दपश्यः**' इति पदं प्रयोक्तव्यम्। यदि हनुमन्तं प्रत्यादराभिव्यञ्जनमभिप्रेत्य, गम्यमानं '**भवान्**' इति पदं कल्पयित्वा वाक्येऽस्मिन् प्रथमपुरुष-क्रियापदस्य प्रयोग इति समाधीयते, तथापि व्यङ्ग्स्यार्थस्य स्पष्टतया प्रतिपत्तयेऽत्र '**भवान्**' इति पदमवश्यमेव प्रयोक्तव्यम्। एवमेवान्यत्रापि बोध्यम्। '**लंकेश मा क्रीडित्वाग्निना, अनेन लङ्का भस्मसाद् भविता।**' (पृ० १०८); '**मा मा त्वयेत्थं चिन्तयित्वा**' (पृ०, ३०); "**मान्यथा सम्भाव्य**"(पृ० ८७) इत्यादिवाक्येषु '**क्रीडित्वा**' '**चिन्तयित्वा**' '**सम्भाव्य**' इत्यत्र 'क्त्वाल्यप्'-प्रत्यययोः प्रयोगश्चिन्त्य एव, '**माङि लुङ्**' **(३-३-१७५)** इत्यनेन 'लुङ'-लकारस्य विधानात्। "**अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा**' (३-४-१८)। इति नियमात् प्रतिषेधार्थकयोरलंखल्वोरुपपदयोरेव '**क्त्वा**' भवति न तु माङ्युपपदे। अत एवोत्तरकृदन्तप्रकरणे सिद्धान्तकौमुद्यां श्रीभट्टोजिदीक्षिताः प्राहुः—

"**अलं खल्वोः किम्? मा कार्षीत्। प्रतिषेधयोः किम्? अलङ्कारः।**' इति

तस्मात् "**नान्यथा चिन्तयित्वा**' (पृ०, २३ ३०, ४६, ७१) '**नान्यथा मां सम्भाव्य**' (पृ० ७५) इत्यत्रापि क्त्वाल्यप्प्रत्यययोः प्रयोगो दुष्कर एव। तथापि, सम्भवतो महाकवि-भासरचितेषु रूपकेषु तथाविधप्रयोग दर्शनात्, भाषायाः प्रवाहे प्रयोग-सरणिरियं सम्भाव्यैव प्रायः संवाद-प्रधानेषु नाटकेषु। चेच्छब्दो वाक्यादौ न प्रयुज्यते, परमद्यत्वे '**चेत् कृष्णं नंस्यसि स्वर्गं यास्यसी**' ति बहवो

विस्रब्धं प्रयुञ्जते' इति कृत्वा व्यवहारविदो वैयाकरणाः- '**चेदरुचिस्ते ततो दूरीकरोमि**' (सेतुवन्धम्, पृ०, ११६) इति वाक्यं प्रति विप्रतिपद्येरन्, तथाप्येवंविधा प्रथा प्रचलितेति तेऽपि मन्यन्त एव। इयमेव प्रथा कविनाऽत्रानुसृतेति सर्वमनवद्यम्। गुणवहुलेऽस्मिन् नाटके वाक्यसंयोजनायामेवंविधाः सरभस-संवाद - प्रवाह-वशात् सहसैव समायाता दोषास्त्वकिञ्चित्कराः, सर्वथा नगण्या एव। 'कथा-मुखे' च निम्नलिखिते पद्ये—

"छन्दोभङ्गेऽपि शक्तिप्रवणरसभरो यत्र शब्द-प्रयोगः,
श्लोके बद्धः स्वभावात् स्वयमिह रचना-प्रक्रिया संविधाने।
अन्यत्रापि क्वचिच्चेत् सहज-कविमनोभावभूमौ प्ररूढा,
दृश्यन्ते काव्यदोषा अवनतशिरसा स्वीक्रियन्ते मया ते',॥

स्वयं कविनैव ते विनम्रतया स्वीकृताः। अतः सर्वथा मर्षणीया एव सहृदयैः। अस्माभिश्च केवलं विदुषां मनोविनोदाय वा, वाग्विलासार्थमेव वा, किञ्चिदस्मिन् दोषदर्शने पराक्रान्तमिति क्षन्तव्यम्।

'**हरिरनन्तः, कल्पभेदेन तस्य कथा लीलाश्चाप्यनन्ता**' इति तावदास्तिकानां विश्वासः। अत एव कथामुखे कविरपि ब्रवीति—

'अजोऽप्यसौ निर्गुण ईश्वरः सतां,
हिताय धर्माभ्युदयाय सर्वदा।
पुनः पुनर्बद्ध इव स्वमायया,
करोति कृत्यान्यवतीर्य देहिनाम्॥
चरित्रमेतत्पुरुषोत्तमस्य वै,
धरावतीर्णस्य विभोरजन्मनः।

गृहे गृहे रामकथाभिरन्वितुं,
बिभर्ति सद्धर्मलतां जगत्त्रये ।।' इति ।

यथा चास्मिन्नेव निवन्धे प्रागेवावेदितमनादिकालतो धरित्र्यामस्यां प्रवाहरूपेण कयाप्यदृश्य-शक्त्याजस्रं भृशञ्च प्रवाहितजीवनं जगच्चापि पूर्वोक्तहेतुसमुदायवशाद् वैविध्यमानन्त्यञ्चादधाति । अयं वस्तुतो हरिरेव यो विश्वस्य रङ्गमञ्चेऽस्मिन् स्वमायया युगपदेव मर्यादापुरुषोत्तमस्य रामस्य, रावणविभीषण-लक्ष्मण-सीतामन्दोदर्यादीनां च संक्षेपतः, सम्पूर्णस्यापि मानवीय-जीवनस्य, विविधा भूमिका आस्थाय, वागङ्गसत्वादिभिश्चतुर्विधैरभिनयैः सर्वविधाञ्जीवनेऽस्मिन् परिस्यूतानादर्शान् सम्यगभिव्यञ्जयन् सहृदयानां हृदयानि, विगलितकुण्ठा-संत्रासनैराश्यादि-नश्वरजगत्प्रपञ्चानि, वेद्यान्तरसम्पर्कशून्यान्यभिनव-नव-रसानामसन्दानन्द-संदोहैः संवलितानि च विदधाति । तादृशो हरेरेव सर्वव्यापि लोकोत्तरमपि सार्वभौमं **'मनुष्यसामान्यगुणान्वितं'** विचित्रं चरितं सेतुवन्धाभिधेऽस्मिन्नाटके तर्कदृशा समीक्षितं, संकीर्तितं, चर्चितञ्च ।

मानवीयजीवनस्य लोककल्याणमूलं सर्वधर्म-सर्वसंस्कृतिसमन्वयात्मकं परमं लक्ष्यं,—यन्नूनं, न केवलमार्यधर्मार्यसंस्कृति-प्रसारकस्य भगवतो रामस्यैवापितु, 'वयं रक्षामः' इत्यादिकमुद्घोष्य राक्षसधर्म-रक्षः-संस्कृतिसमुन्नायकस्य प्रचारकस्य च रावणस्यापि जीवनयात्राया परमः समुत्प्रेरको मन्त्रः, सर्वातिशाय्यादर्शश्चासीत्—तदेव स्वकीयस्यास्य नाटकस्य केन्द्रीयं प्रतिपाद्यविषयं, कथ्यं वा निर्धार्य, महता प्रयासेन कूटनीतिप्रसङ्गतः, कतिपयपूर्वनिर्दिष्टकथाप्रसङ्गानामनौचित्य-परिहारपूर्वकं, तर्कसङ्गतं, घटमात्क्रमेण सुश्लिष्टं कथावस्तु संयोज्य, सपद्येवोपर्युक्तं केन्द्रीयं कथ्यमभिलक्ष्य,

मनोरमया साभिप्रायया च दृश्य-संयोजनयाऽद्भुतं विलक्षणञ्च नाट्यरूपं निष्पाद्य, गभीरयाऽन्तर्दृष्ट्या समेषामपि प्रधान-गौणपात्राणां प्रातिस्विकं, स्वालक्षण्य-विषयकं, समुचित-संवेदना-संवलितं सरसं मनोरमञ्च चरित्र-चित्रणं प्रदर्श्य, विषकम्भकचूलिकादिभिरर्थोपक्षेपकैः 'नेपथ्ये' आकाशभाषि-तादिभिर्नाट्यशिल्पैश्च घटनाक्रमाणां परिवेशान् सजीवान् सप्राणाञ्च विधाय, नाटककृता कविना चानेन गोस्वामि श्रीवलभद्रप्रसादशास्त्रिणा रामकथायाः सम्पूर्णमानवीय सदसदादर्शानां प्रतीकात्मतां प्रदर्शयता, नाटकेऽस्मिन् स्वकीया कुलक्रमागता वाग्देवतैव समभ्यर्चिता । महदाश्चर्यकरञ्चैतद् यद् दशभिरङ्कैः सुविस्तृतेऽत्यस्मिन्नाटके कवेर्नवनवोन्मेष-शालिन्यां शैल्यां किञ्चिन्मात्रमपि शैथिल्यं नैवाभिलक्ष्यते। अतः कविरयं सर्वेषामपि सुरभारती-समु पासकानां विदुषां सहृदयानाञ्च कोटिशो धन्यवादान् प्रशंसाञ्चार्हति। **'चक्रव्यूह'**मिति खण्डकाव्यस्य, **'नेहरूयशःसौरभ'**मिति महाकाव्यस्य च प्रणयनादनन्तरमेव सेतुबन्धाभिधस्य प्रतीका-त्मकस्यास्य नाटकस्य विरचनमस्य कवेः कल्पनायामुर्वरतां, प्रतिभायाञ्चोर्जस्वितां सूचयति ।

भारते भासतां भारती संस्कृतिः

(डा० वनेश्वर पाठकः, एम० ए०, डी० लिट्०
संस्कृत विभागाध्यक्षः
सेंट जेवियर्स कालेज, राँची, विहारः)

विश्वबन्धुत्वभावेन सम्भाविता,
सादरं सर्वलोकैश्च सम्मानिता ।
प्राच्यपाश्चात्त्यविद्वत्कुलैरादृता,
भारते भासतां भारती संस्कृतिः ॥१॥
वैदिकैरार्षवाक्यैः समुद्भाविता,
धर्मशास्त्रैः पुराणैश्च संवर्धिता ।
व्यासवाल्मीकि-भासादिसम्पोषिता,
भारते भासतां भारती संस्कृतिः ॥२॥
कालिदासेन सम्यक् समाराधिता,
काव्यनाट्यादिभिश्च ;प्रकाशं गता ।
सूर-गोस्वामि-मीरादिभी रक्षिता,
भारते भासनां भारती संस्कृतिः ॥३॥
जाह्नवी- भानुजा - नर्मदा- गोमती-
तुङ्गभद्रादितोयैः परं पाविता ।
तीर्थराजे त्रिवेण्या जलैर्लालिता,
भारते भासतां भारती संस्कृतिः ॥४॥

मोक्षदैः सप्ततीर्थैः सुसंसेविता,
विन्ध्य-सह्यादिभिश्च प्रतिष्ठापिता ।
पावनैः क्षेत्रभागैर्महत्त्वं गता,
भारते भासतां भारती संस्कृतिः ॥५॥

यत्र देवास्तथा दानवा मानवाः,
किन्नरा यक्षगन्धर्वरक्षोगणाः ।
पूजिता वन्दिताः कीर्तिता वर्णिताः,
भारते भातु सा भारती संस्कृतिः ॥६॥

यत्र धर्मार्थकामाश्च मोक्षान्विताः,
जीवने मानवीयेऽर्हतामापिताः ।
पौरुषत्वेन सर्वैर्जनैराश्रिताः,
भारते भातु सा भारती संस्कृतिः ॥७॥

यत्र नित्योत्सवैः सुव्रतैः पर्वभि-
र्होलिका-सहुंल-श्रावणी-पोङ्गलैः ।
भारतीया जना उल्लसन्मानसाः,
भारते भातु सा भारती संस्कृतिः ॥८॥

यत्र वेदोऽखिलो धर्ममूलं तथा,
धर्मग्रन्थाश्च संस्कारसन्दीपकाः ।
ज्ञान - विज्ञान- तेजोबलाधायिका,
भारते भातु सा भारती संस्कृतिः ॥९॥

यत्र वर्णाश्रमेषु गुणैः कर्मभिः,
संविभक्ताः समे भारतीया जनाः ।
पालयन्ति स्वकीयांश्च धर्मान् सदा,
भारते भातु सा भारती संस्कृतिः ॥१०॥

भारतीया जना गर्वभावोन्नतै-
र्मस्तकैः संस्थिता भूतलेऽस्मिन् यथा ।
याऽधुनाऽपीक्ष्यते श्रद्धयाऽन्यैर्जनैः,
भारते भातु सा भारती संस्कृतिः ॥११॥

यत्र विश्वश्रुता राष्ट्रिया एकता,
वर्त्तते भारतीयेषु भावात्मिका ।
भुक्तिदा मुक्तिदा शक्तिदा शान्तिदा,
भारते भातु सा भारती संस्कृतिः ॥१२॥

यत्र सत्यस्य संरक्षणे मानवाः,
नानृतं संश्रयन्तीह कृच्छ्रेऽपि वै ।
यत्र प्राणव्ययेनापि वाग् रक्ष्यते,
भारते भातु सा भारती संस्कृतिः ॥१३॥

यत्र धर्मं तथा स्वाभिमानं जनाः,
नैव लोभेन कष्टेन केनापि वा ।
त्यक्तुमिच्छन्ति कष्टं सहन्ते मुदा,
भारते भातु सा भारती संस्कृतिः ॥१४॥

यत्र सत्यस्य धर्मस्य संरक्षको
रामचन्द्रो हरिश्चन्द्रकर्णादयः ।
यत्र राणाप्रतापः शिवाजी गुरुः,
भारते भातु सा भारती संस्कृतिः ॥१५॥

यत्र दुर्गा सदा शक्तिसञ्चारिणी,
यत्र शैलेन्द्रजा शीलसंवर्धिनी ।
यत्र सीताग्निपूता तथा पद्मिनी,
भारते भातु सा भारती संस्कृतिः ॥१६॥

देववाणी-परिषद्वार्ता

१. विद्वदभिनन्दनम्

२७-५-१९८२ तारिकायां दिल्लीविश्वविद्यालयस्य टैगोर-सभाभवने देववाणी-परिषदा विद्वदभिनन्दनं समायोजितम्। भव्येऽस्मिन् समारोहे केन्द्रीय-शिक्षामन्त्रालये उपपरामर्शकत्वेन (संस्कृते) प्रोन्नताः डा० शास्त्रपुरम् रामकृष्ण (सी० आर०) स्वामिनाथमहाभागाः, शिक्षामन्त्रालयेन शास्त्रचूडामणि-योजनान्तर्गतं सभाजिताः साहित्य-वेद-व्याकरण-शास्त्राणाम् विश्रुता विद्वांसः डा० रमेशचन्द्रशुक्ल-श्रीलालनकृष्णपण्डया- श्री मोहनलालगौड़महोदयाश्च समभिनन्दिताः । समारोहस्याध्यक्षपदं राष्ट्रियसंस्कृतसंस्थानस्य निदेशकैः डा० रामकरण शर्म्ममहोदयै मुख्यवक्तृपदञ्च राजधान्याः श्री लालबहादुर शास्त्रिकेन्द्रीयविद्यापीठस्य प्राचार्यवर्यैः डा०मण्डनमिश्र-महाभागैः समलंकृतम् ।

समारोहोऽयं वैदिकमङ्गलाचरणेन समारब्धः। तदनन्तरम् परिषन्महासचिवेन डा० रमाकान्तशुक्लमहोदयेन ललित-गीर्वाणवाण्या समारोहस्य परिषदश्च परिचयपुरस्सरमभ्यागतेभ्यो हार्दिकं स्वागतं व्याहृतम् । अवसरेऽस्मिन् काशीविद्यापीठस्य संस्कृत-विभागाध्यक्षेण डा० अमरनाथपाण्डेयमहाभागेन दिल्लीविश्वविद्यालयस्य संस्कृतविभागे प्रवाचकाभ्यां, डा० ब्रजमोहन चतुर्वेद-डा० सत्यपालनारंगमहाभागाभ्यां, दिल्ली

विश्वविद्यालये गुजराती-विभागाध्यक्षेण डा० महेन्द्रदवेमहोदयेन, दिल्लीविश्वविद्यालयस्य महाविद्यालयेतरच्छात्राणाम् विभागाध्यक्षया डा० रुक्मिणी महाभागया राष्ट्रियसंस्कृतसंस्थानस्य उपनिदेशकेन श्रीत्रिलोकीनाथधरमहोदयेन, 'संस्कृत-सेवा-संस्थानम्' इति संस्थायाः महासचिवेन श्रीरामदयालशास्त्रि-महोदयेन, 'विश्वसंस्कृत-प्रतिष्ठानम्' इत्यस्य दिल्लीशाखायाः सचिवेन श्रीरामप्रकाशदास महोदयेन, इन्द्रप्रस्थीयसंस्कृतपरिषदध्यक्षेण श्रीरामकृष्णभारतीमहाभागेन, आगराजनपदान्तर्गत-'बरहन' नगरनिवासिना श्रीओमप्रकाशत्रिवेदिमहाभागेन अन्यैश्च प्रायः पंचदशसंख्याकैः विद्वद्भिः गद्यपद्यमयाः स्वविचाराः अभिव्यंजिताः विदुषामभिनन्दनं च कृतम्। मुख्यवक्तृमहोदयेन डा० मण्डनमिश्रमहोदयेन चतुर्णामपि विदुषाम् विशेषपरिचयपुरस्सरम् एतादृशां समायोजनानाम् महत्त्वं प्रतिपादितम् कथितं च यदेषाम् अभिनन्दनेन वयं सर्वेऽपि संस्कृतानुरागिणः गौरवान्विताः अनुभवामः।

अध्यक्षवर्य्येण डा० रामकरणशर्म्ममहोदयेनविद्वांसः उत्तरीय-श्रीफलसम्मानपत्र-प्रदानेन च सम्मानिताः।

अभ्यागतानाम् आभारप्रदर्शनम् परिषदः महासचिवेन डा० रमाकान्तशुक्लेन कृतम्। तेन च परिषदः भविष्यत्-कालीनाः परियोजनाश्चाणि तत्र सम्प्रस्तुताः।

त्रिहोरावधिकेऽस्मिन् भव्ये समारोहे राजधान्याः देशस्य विभिन्न भागेभ्यः समागताः विशिष्टाः विद्वांसः संस्कृतानुरागिणश्च समुपस्थिताः आसन्।

समारोहस्य संचालनम् परिषदः सहसचिवेन रवीन्द्र नागरेण सम्पादितम्।

(प्रस्तोता-रवीन्द्रनागरः, सहसचिवः, देववाणी-परिषद्, दिल्ली)

२. संस्कृतवार्तालाप-श्लोकपाठप्रशिक्षणशिविरम्

देववाणी-परिषदस्तत्त्वावधाने २-७-१९८२ तारिकायां संस्कृतवार्तालाप-श्लोकोच्चारण-प्रशिक्षण-शिविरं समारब्धम्। अस्मिन् शिविरे विशेषतः शिशूनां कृते संस्कृत-वार्तालापस्य श्लोकोच्चारणस्य प्रशिक्षणं प्रदीयते। शिविरस्योद्घाटनं कुर्वद्भिः परिषदध्यक्षैः डाक्टर कृष्णकान्त शुक्लमाहभागैर्भणितं यत्संस्कृतस्य धारामजस्रां सम्पादयितुं शैशवादेव बालानां हृदये संस्कृतं प्रति आकर्षणं समुत्पादनीयम्। ये बालकाः काभिश्चिद् विवशताभिः परीक्षापाठ्यक्रमेषु संस्कृतं पठितुमवसरं न लभन्ते तेषां कृते एतादृशकार्यक्रमाणामायोजनं संस्कृतसेविभिः संस्थाभिरवश्यं करणीयम्। संस्कृतवाङ्मयस्य परिचयो नूनं भारतस्यात्मनः परिचय एवास्ति।

परिषन्महासचिवेन डा० रमाकान्तशुक्लेन विज्ञापितं यत् पञ्चदशदिवसीयेऽस्मिन् सारस्वतानुष्ठाने अनेकेषां विदुषां विदुषीनाञ्च सहयोगो लभ्यते। विंशतिप्रायाः शिशवोऽस्मिन् शिविरे समुपतिष्ठन्ति।

१६-७-८२ तारिकायां शिविरमिदं सम्पन्नतां गमिता।

(प्रस्तोता—रवीन्द्र नागरः)

३. देववाणी-परिषदः सहसचिवस्य विदेशयात्रा

देववाणी-परिषदः सहसचिवः किञ्च नवदिल्लीस्थ-श्रीलालबहादुरशास्त्रिकेन्द्रीयसंस्कृतविद्यापीठे पौरोहित्यधर्म-शास्त्रविभागे प्राध्यापकः एम० ए०—साहित्याचार्याद्युपाधि-समलङ्कृतः श्रीरवीन्द्रनागरमहाभागः इङ्लैण्डदेशस्य

बोल्टननगरे भारतीयसंस्कृतिसंस्कृताध्यापकरूपेण कर्मकाण्ड-पण्डितरूपेण च तत्रत्यवेदमन्दिरप्रबंधकैः समाहूतः। श्रीनागरमहाभागस्तत्र वर्षत्रयपर्यन्तं स्थातुं प्रार्थितः। तस्य विदेशयात्रा ३१-७-१९८२ तारिकायां सम्भाव्यते। श्रीनागर-महाभागेन साकं तस्य धर्मपत्नी श्रीमती दीप्तिनागरमहाभागा किञ्च सुपुत्रः चि० अनुरागनागरोऽपि इंग्लैण्डं प्रतिष्ठेते। देववाणी-परिषत्परिवारः श्रीनागरमहाभागानां यात्रायाः साफल्यं कामयते।

(रमाकान्त शुक्लः)

संस्कृतनाटिकाप्रस्तुतिः

राजधान्याः संस्कृतनाट्य-मंचः अद्यत्वे संस्कृतनाटिका-मेकां छायाङ्कितां विदधाति। दिल्लीदूरदर्शन-केन्द्रात् कतिपय-दिवसेष्वेव प्रसार्यमाणा "वेताल-विक्रमे" ति नाम्नीयं नाटिका संस्कृत-नाट्यमञ्चसचिवपदमलंकुर्वन्त्या श्रीमत्या कमलारत्नम् महाभागया रूपान्तरिता, श्रीमत्या कमलिनीदत्तमहाभागया च निर्दिष्टा निर्मिता चास्ति। अस्यां नाटिकायां डा० टी० एस० रुक्मिणी-डा० नित्यानन्द-डा० सुरेश्वरकृष्णशास्त्रि-बलदेवानन्दसागरप्रभृतिभिः ख्यात-कुशीलवैः विविधा भूमिका अङ्गीक्रियन्ते।

नाटिकेयमगस्तमासस्य कस्यामपि तारिकायां दिल्ली-दूरदर्शनकेन्द्रात्प्रसारयितुं शक्यते। रुचिमन्तो दर्शकास्तत एव निश्चितां तिथिं ज्ञातुमर्हन्ति।

अर्वाचीनसंस्कृतम्

(R.N. 34554/79)

(त्रैमासिक पत्रिका)

❀

१. प्रकाशन का स्थान — नयी दिल्ली

२. प्रकाशन की आवधिकता — त्रैमासिक

३. मुद्रक तथा प्रकाशक का नाम,
राष्ट्रीयता तथा पता : डा० रमाकान्त शुक्ल
(देववाणी-परिषद्, दिल्ली-कृते)
भारतीय
६, वाणी-विहार, नयी दिल्ली ११००५९

४. सम्पादक का नाम,
राष्ट्रीयता तथा पता : डा० रमाकान्त शुक्ल
भारतीय
६, वाणी-विहार, नयी दिल्ली ११००५९

५. उन व्यक्तियों के नाम और पता
जो इस पत्रिका के मालिक या
साझेदार हैं अथवा जो इसकी
सारी पूँजी के एक प्रतिशत से
अधिक के हिस्सेदार हैं। : देववाणी-परिषद्, दिल्ली
६, वाणी-विहार, नयी रिल्ली ११००५९

मैं डा० रमाकान्त शुक्ल, यह घोषणा करता हूँ कि उपर्युक्त विवरण मेरी जानकारी और विश्वास के अनुसार सही है।

डा० रमाकान्त शुक्ल
महासचिव, देववाणा-परिषद्, दिल्ली
प्रकाशक

'अर्वाचीनसंस्कृत'-विषये विदुषां विचाराः

(१)

"अर्वाचीनसंस्कृत"स्य प्रकाशनं संस्कृतलतिकायाममृतप्रोक्षणम्। अस्य लेखाः सर्वेऽपि श्रमेण सहृदयतया च विनिर्मिताः। अवश्यमेतस्य लेखकाः प्रकाशका इवैव, प्रशंसापात्रम्।

......एतेनोपक्रमेणाश्वस्तास्तिष्ठामः 'संस्कृतज्ञाः केवलानुत्सवानेवायोज्य न सन्तुष्यन्ति, ते हि व्यवस्थितां योजनामपि बिभ्रति, पालयन्ति च तत्पूर्त्तिमार्गानी'ति।

—डा० रेवाप्रसाद द्विवेदी
काशीहिन्दूविश्वविद्यालयस्य प्राच्यविद्याधर्मविज्ञानसङ्काये
साहित्यविभागाध्यक्षः

(२)

'अर्वाचीनसंस्कृत'स्य अङ्कः साम्प्रतमेव प्राप्तः। संस्कृतस्य यौवनमीदृशैव प्रकाशनैः साधयिष्यते। प्रायेण जनाः सस्कृतेऽर्वाचीनं नूतनं च साहित्यं नास्तीति विश्वसन्ति। पुराणमित्येव न साधु सर्वमिति वदता कालिदासेन नूत्नः पन्थाः परामृष्टव्य इति समुपदिष्टम्। तदेवात्र समादृतमिति महते प्रमोदाय प्रेक्षावताम्।

—डा० रामचन्द्र द्विवेदी
जयपुरस्थराजस्थानविश्वविद्यालये संस्कृतविभागाचार्यः

(३)

'अर्वाचीनसंस्कृतम्' नाम त्रैमासिकं पत्रं समुपलब्धम्; आद्यन्तमवलोकितं च। अद्यत्वेऽपि सुरभारतीसेवातत्पराणां कवीनां काव्यविषये सुपरिचिताः सन्तो विद्वांसः संस्कृतभारतीमहर्निशं प्रवर्धमानां, न केवलं जीवन्तीं श्वसन्तीं वा, मंस्यन्तेऽनया पत्रिकया इति मे द्रढीयान् विश्वासः। पत्रिकाया अस्याः प्रकाशनप्रसङ्गे मम शतशो वर्धापनानि।

—डा० ब्रह्ममित्र अवस्थी
इलाहाबादस्थडाक्टरगंगानाथझाकेन्द्रीयसंस्कृतविद्यापीठे

देववाणी-परिषदा प्रकाशिताः संग्रहणीया ग्रन्थाः

१. अर्वाचीनसंस्कृतमहाकाव्यविमर्शः (प्रथमखण्डः) रु० १५.००
(सं० : डा० रमाकान्तशुक्लः)
२. ,, ,, ,, (द्वितीयखण्डः) रु० ३०.००
३. ,, ,, ,, (तृतीयखण्डः) रु० ३०.००
४. कर्णभूषणम् (डा० सी०आर० स्वामिनाथन्) रु० ५.००
५. भाति मे भारतम् (डा०रमाकान्तशुक्लः) रु० ४०.००
६. श्रीकृष्णचरितम् (डा० रमेशचन्द्रशुक्लः) रु० ३०.००
७. सुगमरामायणम् ,, ,, रु० ३५.००
८. हरविजयस्य साहित्यिकमध्ययनम् रु० ६०.००
(डा० कृष्णकान्तशुक्लः)
९. श्रीमदप्पयदीक्षितचरितम् रु० २०.००
(डा०हरिनारायणदीक्षितः)
१०. भारतस्वातन्त्र्यसंग्रामेतिहासः (डा०र०च०शु०) रु० ३५.००
११. सदाशयसमुच्चयः (टी०वी०परमेश्वरअय्यरः) रु० १५.००
१२. आभाणकमञ्जरी (,, ,,) रु० १५.००
१३. मेघदूत : एक विश्लेषण (डा० देवीदत्त शर्मा) रु० २०.००
१४. रघुवंश : एक विश्लेषण (,, ,,) रु० २०.००
१५. अभिज्ञानशाकुन्तल : एक विश्लेषण (,,) रु० २०.००
१६. कालिदास की कला और संस्कृति (भाग २) रु० ६०.००
(लेखकः डा० देवीदत्त शर्मा)
१७. जय भारतभूमे ! (डा० रमाकान्तशुक्लः) रु०. ३०.००
१८. राधाकृष्णरसायनम् रु० ४०.००
(श्री ओट्टूर उण्णि नम्बूदिरीपादः)
१९. अर्वाचीनसंस्कृतसाहित्यपरिचयः (यन्त्रस्थः)
(सं० डा० रमाकान्तशुक्लः)

प्राप्तिस्थानम्

'देववाणी-परिषद् दिल्ली', ६ वाणी-विहारः, नयी दिल्ली-५९

'देववाणी-परिषद्, दिल्ली'–कृते डा० रमाकान्तशुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नई दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा '६, वाणी-विहार, नयी दिल्ली-११००५९'तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (४/३)। सम्पादकः डा० रमा कान्त शुक्लः। प्रकाशनतिथिः १५-७-१९८२।

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिक पत्रम्)

चतुर्थवर्षे चतुर्थोऽङ्कः

१५ अक्टूबर १९८२

प्रधानसम्पादकः

डा० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः,

सांख्ययोगाचार्यः

प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

परामर्शदातृमण्डलम्

(१) डा० रामसुरेशपाण्डेय:
एम०ए०, पीएच० डी०, व्याकरणाचार्य:
(२) डा० कृष्णकान्त शुक्ल:
एम०ए०, पीएच० डी०, साहित्याचार्य:
(३) प्रा० उमाकान्त शुक्ल:
एम० ए०, साहित्याचार्य:, सांख्ययोगाचार्य:,

विषय-सूची

	लेख:/रचना	लेखक:	पृष्ठाङ्क:
१.	सम्पादकीयम्	सम्पादक:	२०९-२१०
२.	*Editorial*	*Editor*	२११-२१२
३.	अभिनवहनुमन्नाटकम्	डा० रमेशचन्द्र शुक्ल:	२१३-२९२
४.	'भाति मे भारतम्' : काव्यदर्शनम्	डा० शिवदत्त शर्मा चतुर्वेद:	२९३-३०२
५.	भाति मे भारतो भारतेऽनारतम् (कविता)	आचार्य वेदानन्द झा	३०३-३०४
६.	व्यवधानम्	अध्यापक केशवचन्द्र दाश:	३०५-३०६
७.	देववाणी-परिषद्वार्ता		३०७-३०८
८.	अर्वाचीनसंस्कृतविषयकसूचना		३०८

वार्षिकग्राहकशुल्कम्

विंशतिरूप्यकात्मकम् *Rs. 20:00* (भारते)
पौण्डद्वयं डालरपञ्चकं वा (विदेशेषु)

Annual Subscription
Rs. 20.00 (In India)
5 Dollars or 2 Pounds (Abroad)

'देववाणी-परिषद्, दिल्ली'–कृते डा० रमाकान्तशुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नई दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा '६, वाणी-विहार, नयी दिल्ली-११००५९'त: प्रकाशितम्-अर्वाचीनसंस्कृतम्(४/४)। सम्पादक: डा० रमाकान्त शुक्ल:। प्रकाशनतिथि: १५-१०-१९८२।

सम्पादकीयम्

अर्वाचीनसंस्कृतस्य चतुर्थवर्षे चतुर्थोऽङ्कः पाठकानां करकमलेषु समायाति। अस्मिन्नङ्के आचार्यरमेशचन्द्रशुक्लप्रणीतम् 'अभिनवहनुमन्नाटकम्' डा० शिवदत्तशर्मचतुर्वेदलिखितो 'भाति मे भारतम् : काव्यदर्शनम्' इतिशीर्षको लेखः, आचार्यवेदानन्दझारचिता 'भाति मे भारती भारतेऽनारतम्' इतिशीर्षका छन्दोबद्धा कविता, अध्यापककेशवचन्द्रदाशेन मुक्तछन्दसि रचिता 'व्यवधानम्' इति शीर्षका कविता, 'देववाणीपरिषद्वार्ता' च प्रकाश्यन्ते।

'अभिनवहनुमन्नाटकम्' हि आचार्यरमेशचन्द्रशुक्लानां प्रथमा प्रकाशिता नाट्यकृतिः। इतः पूर्वमेभिः शतककाव्य-खण्डकाव्य-महाकाव्यादीनां रचना कृता। अस्य नाटकस्य प्रदर्शनं लेखकेन स्वातन्त्र्यदिवससमारोहावसरे अभिलषितमासीदिति कृत्वा तेन रामभक्तस्य हनुमतः राष्ट्रियभावनापोषकं स्वरूपं प्रस्तुतम्। अत्र हनूमान् आदर्शमानवरूपेणावतार्यते। यत्सत्यं, नाटकस्य साफल्यं तदैव भवति यदा तस्याभिनयोऽपि भवेत् किन्तु केवलं पाठ्यनाटकानामपि महती परम्परा विद्यते। सन्त्यनेकानि नाटकानि एतादृशानि येषामेकदाप्यभिनयो नैव जातः। अभिनयार्थं रङ्गनिर्देशकानां प्रयत्ना अपेक्ष्यन्ते। निर्देशककौशलात् क्वचित्कठिनानामपि नाटकानां सारल्यं निष्पाद्यते। अभिनवहनुमन्नाटके विद्यमानं श्लोकबाहुल्यं, दीर्घसंवादमयत्वं, दृश्यविधानं चापि निर्देशककौशलात् अभिनययोग्यं कर्तुं पार्यते। रेडियोनाटकरूपेणाप्यस्य नाटकस्य प्रस्तुतिर्भवितुं शक्यते। नाटकस्य बहवः संवादाः तुलसीदासरचितरामचरितमानसात्प्रभाविताः सन्ति, अतस्ते लोकमानसं स्प्रष्टुं क्षमाः। आचार्यशुक्लमहाभागानामन्याः कृतय इवेयमपि कृतिः राष्ट्रियभावं पोषयितुं यतते। अभिनवहनुमन्नाटकस्य रङ्गमञ्चे प्रस्तुत्यर्थं नाट्यनिर्देशकाः सादरमाहूयन्ते।

'भाति मे भारतम् : काव्यदर्शनम्' इत्यस्मिल्लेखे डा० शिवदत्तशर्मचतुर्वेदमहाभागैरेतत्पंक्तिलेखकस्य 'भाति मे भारतम्' नामकं काव्यमवलम्ब्य स्वविचाराः प्रस्तुताः। डा० चतुर्वेदमहाभागाः १९८१ तमेशवीयेऽब्दे

२१ अक्टूबरत: २६ अक्टूबरपर्यन्तं काशी-हिन्दू-विश्वविद्यालये समायोजितस्य पञ्चमविश्वसंस्कृतसम्मेलनस्याङ्गभूतस्य संस्कृतकविसम्मेलनस्य संयोजका आसन्। तत्रानेन जनेनापि उक्तकाव्यात्कानिचित्पद्यानि प्रस्तुतान्यासन्। डा० चतुर्वेदमहाभागैः गद्यपद्याभ्यामेतत्काव्यमत्र समीक्षितम्। यतो हि काव्यस्यैतस्य सर्वप्रथमं प्रकाशनमस्मिन्नेव पत्रे सञ्जातमतस्तद्विषये पाठकानां प्रतिक्रिया अपि, कटुका वा मधुरा वा, अत्र स्थानं लब्धुं साधिकाराः सन्ति।

'भाति मे भारती भारतेऽनारतम्' इत्यस्यां कवितायामाचार्यश्रीवेदानन्द-झामहाभागैः संस्कृतभारत्याः शोभा वर्णिता। 'व्यवधानम्' इत्यस्यां मुक्तच्छन्दसि निबद्धायां कवितायां कविना यथार्थस्य सव्यङ्ग्यं चित्रणं कृतम्। देववाणीपरिषद्वार्ता मासत्रयावधौ जातानां परिषत्कार्यकलापानां सूचनां ददाति।

अनेनाङ्केनार्वाचीनसंस्कृतस्य चतुर्थवर्षपूर्तिर्भवति। आशासे, आयत्यामपि लेखकानां पाठकानाञ्च सहयोगः सुलभो भविष्यति।

विदुषामाश्रवः
रमाकान्त शुक्लः
(प्रधानसम्पादकः)

१५-१०-१९८२

EDITORIAL

With the presentation of this fourth number *Arvācīna-saṁskṛtam* completes its fourth year. The present number incorporates in its pages, the dramatic expression of Dr. Ramesh Chandra Shukla's creative genius in *Abhinava Hanumannāṭakam*. On its critical side is the systematized critique entitled *Bhāti Me Bhāratam : Kāvyadarśanam* by Dr. Shiv Dutta Sharma Chaturvedi. The rhythmic versified melody of Acharya Vedanand Jha's poem *Bhāti Me Bhāratı Bhārate'nāratam* is equally contrasted by Adhyapaka Keshva Chandra Dasha's satire *Vyavadhānam*. He treates free verse for his poetic medium. Towards the end appears *Devavāṇīpariṣadvārtā*—the news bulletin of Devavani Parishad, Delhi.

Abhinava Hanumannāṭakam is the first dramatic work by Dr. Ramesh Chandra Shukla. His earlier creative works are chiefly epics, narratives and lyrics (Viz., collection of hundred verses)

As he intended its stage performance on the occasion of Independance day celebrations, he obviousely presents Hanuman's character enriched with patriotic sentiments. He inspires us with national feelings and attracts as a human character exhibiting a vivid sense of ideal incarnate of human existence.

Fundamentally, it is true, that a play has a close bearing for its significance and success on stage craft. A great tradition, however, exists of closet plays whose vigour lies in poetic imagination. Many a play of closet nature still are in vogue which have not yet faced the light of stage. As Dr. Shukla has courted earlier the poetic muse, the present play abounds in Shlokas with scenes affected by lengthy, exuberant dialogues, depriving it many of its stage considerations. But, the success of the enactment of drama depends on the endeavours of able directors who can give fresh or simplified interpretation to its complex pattern of

poetic exuberance. It has all the properties of a distinctive play and can be produced as a radio play also. The dialogues are responsive to the ethical and aesthetic charm of *Rāmacaritamānasa* and draw their inspiration from its reservoir to appeal the general sensibility of comman mind. Like his other poetic works, Dr. Shukla in this play also inspircs and provokes the dominance of national and patriotic ideas. The directors are honourably invited for producing the play on stage.

In the article entitled *Bhati Me Bhāratam : Kāvya-darśanam'* Dr. Shiv Dutt Sharma Chaturvedi, in the form of critical revaluation, has given his impression about *Bhāti Me Bhāratam* composed by the writer of present lines. Dr. Chaturvedi was the organizer of the Sanskrit Kavi Sammelanam held as an integral part of Fifth Vishva Sanskrit Sammelan under the auspices of B.H.U, in Oct. 1981, where a few verses from the book under review were also recited by the writer of present lines. Dr. Chaturvedi has woven out both in prose and poetry a critism of the work.

The fact is that the poem first appeared in this journal. Consequently, the opinions or reactions of readers, contradictory, bitter or sweet as they may be, have a right for their fuller expression with any amount of receptivity in this journal.

In the poem *Bhāti Me Bhāratī Bhārate'nāratām* Acharya Vedand Jha has given an expression to the charm and spell of Sanskrit language in an artistic melodious tone. The poem *Vyavadhānam* discovers the crude reality of modern times in satiric humour through a modern poetic media, the free verse.

With this volume the fourth year comes to an accomplishment. It is hoped that our readers and writers will extend their cooperation in the forthcoming endeavours as usual.

Rama Kant Shukla
(Chief Editor)

15-10-1982

श्रीः

अभिनवहनुमन्नाटकम्

प्रथमोऽङ्कः

यत्राभान्त्यनिशं हि बुद्‌बुदसमाः ब्रह्माण्डभेदाः क्वचित्
क्वाप्याभान्ति च सीकरा इव विरिञ्चयाद्याः सुराः संभ्रमात् ।
चिद्रूपा लहरीव शक्तिरतुला विद्योतते च क्वचित्
सभ्यान् वो नटराजराजभगवान् गौरीपतिः पातु सः ॥

यो नो वाञ्छति सम्पदं न भवनं रत्नं न मुक्तां मणिं
न क्षौमं न च भूषणं न मधुरं भोज्यं प्रियं पायसम् ।
ईशोऽसौ सरलः कृपामयमनाः भक्तिं प्रभुः काङ्क्षति
दातोदारपिता जगद्धितशिवो वो रक्षतात् सर्वदा ॥

(नान्द्यन्ते)

सूत्रधारः (नेपथ्याभिमुखं विलोक्य) आर्ये ! यदि नेपथ्यविधानमवसितं तावदित आगम्यताम् ।

(प्रविश्य)

नटी : आर्यपुत्र! इयमस्मि । आदिशतु आर्यः किमनुष्ठातव्यमस्ति ?

सूत्रधारः अस्त्यद्य स्वातन्त्र्यदिवससमारोहः । अस्मिन् पावने महीयसि महसि आचार्यरमेशचन्द्रशुक्लविचरिताभिनवहनुमन्नाटकमस्माभिः प्रदर्शयितव्यमस्ति सभ्यजनहृदयहारिणोऽभिनयानभिनीय परमनिपुणतापूर्वकम । रामस्य

भक्तो हनुमान् स्वजनुषा केनाप्यनुपमेन गौरवेणास्मद्राष्ट्रं वर्धयाम्बभूव; अतः हनुमच्चरणारविन्दयोः प्रणतिं सादरमर्पयद्भिरस्माभिः स्वदेशमुद्दिश्य कापि गीतिर्गेया।

नटी : आर्यपुत्र! यद् आज्ञापयति तदवहिततयानुष्ठेयं भवेत्। मम सख्यः, आयान्तु भवत्यः। सीताकान्तप्रणतिमतिविख्यातमहिमकपिकुलशिरोमुकुटमणिहनुमन्तमभिवन्द्य वयं स्वभारतस्य गरिमाणं गायाम।

(सर्वा गायन्ति)

सीतारामाङ्घ्रिभक्तः शुभमतिसुभगो ज्ञानिनामर्चनीयः
शौर्योदन्वान् मनस्वी गुणगणरुचिरो हेमशैलाभदेहः।
संसारार्थानधीनो रिपुगिरिकुलिशं राक्षसारण्यवह्निः
उद्धर्ता दीनपुंसां भववितयशा नूयते वायुसूनुः॥

सीतोदन्तेन रामं गतहृदयरुजं योऽकरोद् वीरकर्मा
सौमित्रिं चौषधेनावत बलजलधिर्यश्च दग्धारिलङ्कः।
धर्मभ्रातुर्दयालोर्भरत इव सदा यः प्रियो राघवस्य
साधूनां श्रेष्ठमित्रं हितमयचरितो नम्यतेऽसौ हनूमान्॥

सुग्रीवञ्च कृती विधाय सुहृदं श्रीरामचन्द्रप्रभोः
यस्तं कारयति स्म बालिविपदो मुक्तञ्च पृथ्वीपतिम्।
दत्त्वा मन्त्रमनोज्ञमेव मतिमांश्चाकारयन्नीतिवित्
नीत्वा मित्रविभीषणञ्च सविधे रामस्य लङ्केश्वरम्॥

तं श्रेष्ठं रघुनन्दनस्य कृतिनं साधुस्वभावं प्रियं
भक्तं लोकहितश्रितं सुविमलस्वान्तं सुधीवल्लभम्।
दातारं सुमतेर्मलीमसमतेश्छेत्तारमीड्यं वयं
भक्त्या सादरमद्य वज्रवपुषं पूज्यं नमामो भृशम्॥

नटी : सख्यः, जयतु भारतं जयतु भारतमस्माकम् ।

ऋषिमुनिवृन्दसुसेवितचरणाम्बुज ए ।
मृदुलमनोज्ञमनः शुचि मम भारत ए ॥
शरणसमागतमानवहितपोषक ए ।
कलितललितरुचिरम्य, जय जय भारत ए ॥
नयसृतिपथिक तपोधन सुकृतप्रिय ए ।
रुचिरसरलशुभमानस, जय भारत ए ॥
हरिपदवारिजजगतीप्रियभूषण ए ।
श्रुतिस्मृतिबोधितपथगत, जय भारत ए ॥
कृतमुदितसुजन, दण्डितशठदुर्जन ए ।
प्रकृतिमधुरचरितोज्ज्वल, जय भारत ए ॥
द्विविधचित्रविपिनाजिर, कृषिबन्धुर ए ।
ज्ञानसुधांशुचकोर: जय जय भारत ए ॥
अतिशयचारुविचार जय जय भारत ए ।
हृद्यविहगमृगजीवन, गिरितटिनीप्रिय ए ॥
प्रतिमानवविलसित सुन्दर प्रिय भारत ए ।
शमदममञ्जुलशुभ्र जय जय भारत ए ॥
हनुमच्चरणकमलरत प्रिय भारत ए ।
जगदखिलमौलिशेखर, जय जय भारत ए ॥

(सर्वासां गमनम्)

(नेपथ्ये)

वन्दामहे विमलमानसवंद्यवृत्तां
तेजस्विनीं परममान्यतपस्विनीं त्वाम् ।
त्वं लोकमङ्गलकरं रघुनाथभक्तं
दत्वा करिष्यसि सुतं जगतीं प्रशस्ताम् ॥

सूत्रधारः : (निशम्य) अहो किं नु खलु शब्दोऽयं दिवि श्रूयते ! (विचिन्त्य) ज्ञातं ज्ञातम् । गिरिवेङ्कटे तपश्चरन्तीं दिवौकसः स्तुवन्ति मुहुरञ्जनाम् ।

समीरदेवस्य कृपामवाप्तुं
स्वकाङ्क्षितार्थं शुभवेङ्कटाद्रौ ।
तपश्चरन्तीं परुषं नितान्तं
स्तुवन्ति देवा अधुनाञ्जनां ताम् ॥

(सूत्रधारो निष्क्रामति)

(प्रस्तावना समाप्ता)

प्रथमं दृश्यम्

(विपिनाभिरामोत्सङ्गे शोभमानस्य महीधरस्योपत्यकायां तपश्चरन्ती अञ्जना तत्पुरतः सन्तिष्ठमानः पवनदेवः)

पवनदेवः : देवि, अहं त्वदीयेन कठोरेण तपसा भृशं परितुष्यामि। त्वमभिमतं वरं याचस्व । त्वामहमवश्यं विधास्यामि पूर्णमनोरथाम् ।

अञ्जना : देव, कामयेऽहमनुपमबुद्धि-बल-भगवद्भक्ति-गुणसंशोभितमर्भकम् ।

पवनदेवः : अञ्जने, अहमेव तव सूनुर्भूत्वा त्वां विश्वविदितां करिष्यामि ।

(जवनिकापातः)

द्वितीयं दृश्यम्

समित्पाणिः बन्धो कुशपाण, पुण्यदिनमिदम् । अद्य अञ्जनायां जातस्य जातकस्यास्ति शुभनामकरणसंस्कारः।

कुशपाणिः : अहह, अत एवानन्दप्रदस्तूर्यशब्दः संश्रूयते । सुन्दर्यश्चाञ्जनाया राजमन्दिरे गायन्ति नृत्यन्ति च ।

समित्पाणिः : शृणु तावत् सखे, विपश्चित्प्रवराणां च शुभाशंसन-
वचांसि ।

भूयादयं तव सुतः प्रभुरामभक्तः
प्रीतिप्रदः सखिषु युद्धमहीष्वजेयः ।
ज्ञान्यग्रणीः भवतु बुद्धिगुणोदधिश्च
सर्वत्र भूमिभुवने भवतान् महीयान् ॥

मित्र कुशपाणे, एहि आवामपि एतदानन्दमयं महः सम्भावयावः । अहह, श्रवणप्रीतिकराणि सन्ति मधुराणि गीतानि, नयनमनोहारीणि च नवनवनृत्यानि ।

गायत गायत नृत्यत नृत्यत, सख्यः सानन्दम् ।
जातं सूनोर्जननं चेतस आनन्दकरम् ॥ गायत...
एतत् पुण्यमयं बहुमोदमयं दिनमद्यतनम् ।
सुभगः सूनुः कल्याणकरः प्रियलोकधनम् ॥ गायत...
धन्या धन्या भारतभूमिर्जातानेन क्षेमकरी ।
धन्योऽयं केशरितातो धन्याञ्जनिकाऽऽनन्दकरी ॥ गायत...
आयुष्मन्तं मतिमन्तं बलवन्तं हनुमन्तम् ।
भक्तं रामस्याप्त्वा लोको धन्यो गुणवन्तम् ॥ गायत...
ज्ञानालोकप्रियधाम श्रुतिसेव्यं हनुमन्तम् ।
सञ्जाता धन्येयं क्षोणी लब्ध्वा धृतिमन्तम् ॥ गायत...

(जवनिकापातः)

तृतीयं दृश्यम्

(माता अञ्जना, पिता केसरी, पुत्रश्च हनुमान् मञ्चमध्यासते)

अञ्जना : प्रियवत्स, तपोवनादागतास्तपोधनस्यर्षेर्हारीतस्य कतिपये शिष्याः 'अहरहस्त्वं तपोवनं प्रयाय आश्रम-

वासिनामृषीणां मुनीनाञ्च तपोयजनभजनाध्ययनादि-कर्माणि उपप्लवैर्व्याहिंसि'- इति कथितवन्तः। इदन्तु प्रियवत्स, नोचितं कदापि । अस्मत्कर्तव्यन्त्वस्ति ऋषिमुनीनां पर्युपासनम्, तेषां कार्येषु साहाय्यं प्रदाय तन्निषेवणम् ।

केसरी : अन्यच्च अप्रियं तत् संवृत्तं तत् त्वया न श्रुतम्। अनेन वत्सेन क्रियमाणैः प्रत्यूहैर्दूयमानाः 'अयं हनुमान् ऊर्जस्वलोऽप्रमेयवलो वर्तते। कथमेष तच्छक्तेभ्रंशनीयः; परमिदमपि नोचितं स्यात्; अयन्तु भाविन्यनेहसि गुरु-गुरुतराणि कार्याणि, विश्वहितावहाः श्रेयस्करीः समाज-कल्याणकरीश्च सेवाः करिष्यति, दुर्जनान् पापपरान् हनिष्यति; रामं सेवमानस्तान्यभिनन्दीनयानि कृत्यान्य-नुष्ठास्यति यैर्दिव्यै राश्चर्यकरै रध्यवसायैः रामस्य कृपा-पात्रं भवन् सर्वमपि संसारं प्रीणयिष्यत्यत एष विस्मृत-स्मृतवलः—कृतस्मारणस्मृतसामर्थ्यः—करणीय' इत्येतद् विमृश्यते भृगोरङ्गिरसश्च कुलस्य दूरदर्शिनः शमधना अपि महर्षयः संरब्धा भूत्वा वत्समेनमेवमशपन्—

"बाधसे यत् समाश्रित्य बलमस्मान् प्लवङ्गम।
तद्दीर्घकालं वेत्तासि नास्माकं शापमोहितः॥
यदा ते स्मार्यते कीर्तिस्तदा ते वर्धते बलम्॥"

अञ्जना : हन्त इदन्तु, मामतितरामदुनोत् । वत्स, एतेन तु तवाहितमेव संवृत्तम्। विरम एतादृशेभ्यस्त्वं त्वदहित-करेभ्योऽसत्कार्येभ्यः । त्वं कठोराणि तपांसि तप्त्वा प्राप्तोऽसि। आवयोर्भृशं प्रियोऽसि। तव किमप्यनिष्टं स्वप्नेऽपि नावां मातापितरौ सोढुं क्षमौ ।

(अन्ये चानेके ब्रह्मचारिण आयान्ति)

प्रथमो ब्रह्मचारी : हनुमांस्तु परमचापल्यं नितराञ्चौद्धत्यं दर्शयति। अयमरण्ये मृगराजस्य वालधिमाधृत्य तं भ्रामयति समन्तात्। कुञ्जरमपि धृत्वायं तस्य वलं ज्ञातुमहरह एव प्रयतते। एतद्विधानि विस्मयकारीणि पौरुषाणि त्वस्य दैनिकक्रीडान्तर्गतानि ज्ञेयानि।

द्वितीयो ब्रह्मचारी : कदाप्ययं विशालमपि शाखिनं समूलमुन्मूलयति।

तृतीयो ब्रह्मचारी : सर्वाण्यप्यगम्यानि काननान्येतच्चरणचूर्णितानि सन्ति।

चतुर्थो ब्रह्मचारी : विशालपरिणाहानपि नदानयं हेलया लङ्घते। एतादृङ् न कश्चिद् हिंस्रोऽपि श्वापदो योऽस्मान्न विभेति। अयं मां धरिष्यतीत्याशङ्क्य स वेपमानकलेवरः सन् नितरां रंहसा पलायते।

पञ्चमो ब्रह्मचारी : अस्त्ययं हनुमान् अलौकिकसत्त्वसम्पन्नः। प्रशंसनीयानाञ्च गुणानां धाम। अयं प्राणभृतां सुहृत् तेषाञ्च प्रियो गोप्ता। दुर्बलं यदा निपीडयन्तं कमपि वलवन्तमीक्षते तदा सपदि तं तस्मात् पाति। न परकष्टमयं सोढुं शक्नुते।

(सर्वे स्वरेणैकेन श्लाघन्त एव हनुमन्तम्)

एष वत्स हनुमानिव वीरो,
वीक्ष्यते बलवतां नहि कोऽपि।
शक्तिभृद् विविधसद्गुणरम्यः
शुद्धचित्तशुभबुद्धिमनोज्ञः ॥

अत्र कोऽपि न मुनिर्न च साधुः
नो ऋषिर्न च सुधीश्च तपस्वी ।
श्लाघते न सुतरां बलिनं य-
श्चेतसा हि समुदं हनुमन्तम् ॥
भानुरस्त्यपर एव जगत्यां
शङ्करोऽस्ति हनुमानिति नूनम् ।
दिव्यवायुरपरोऽनुपमोऽत्र
सर्वथैव भुवि जेतुमशक्यः ॥

द्वितीयोऽङ्कः

प्रथमं दृश्यम्

(मञ्चे अञ्जना हनुमांश्च निषीदतः)

अञ्जना : वत्स, साम्प्रतं तव वयो विद्यार्जनार्हम् । अतस्ते पितृपादास्त्वां विद्यामध्येतुं गुरुकुलं प्रेषयिष्यन्ति। श्वः उपनयनसंस्काराेचिता पुण्यतिथिः । तत्र त्वदीयो यज्ञोपवीतसंस्कारो भविता । पुत्र, गुरुकुलमधिवसंस्त्वं परमश्रद्धया भक्त्या चामितया गुरुजनान् सेवमानो विद्यामधीयीथाः । भक्तिश्रद्धापूर्वकं गुरून् भजमानोऽन्तेवासी सत्वरमेव सर्वेषु वेदेषु, सर्वेषु शास्त्रेषु, कलासु च सर्वासु पारदृश्वा भवति । भवन्ति च तद्गृहीताः विद्याः कीर्तिकारिण्योऽभिमतफलदात्र्यश्च । अस्ति भगवान् सूर्यदेवोऽखिलागमनिगममर्मज्ञः । विद्यामादातुं त्वं तस्यैव सेवायां प्रेषयिष्यमाणोऽसि। वत्सप्रिय, अधिगुरुकुलं सविनयं निवस । आचार्यान् स्वपितरमिव, अध्येतॄंश्च सर्वान् स्वबन्धूनिव

मन्यमानस्तेषु शिष्टसमुदाचारपुरस्सरं व्यवहर। चाञ्चल्यं न चोच्छृंखलतां कदाप्याचरणे समावेशय।

हनुमान् : मातः, यथा त्वमाज्ञापयसि तथैव विधास्यामि। मातस्तत्रवसन् गृह्णंश्च शास्त्राणि किं वन-गिरि-निर्झर-सरिदादिविविधरूपाणि बिभ्राणां प्रकृतिं विलोकयितुं तत्र च विचरितुं गुरुजनैर्भवितुं शक्नुयामाज्ञप्तः ?

अञ्जना : कथं न वत्स, गुरवः स्वयमेव यदा तदानध्याये प्रकृतेर्मनोरमाणि दृश्याणि दर्शयितुं शिष्यान् नयन्ति। तत्र वसंस्त्वं नियतेऽहनि, पर्वणि च, अवकाशेऽपि विशिष्टे न केवलं प्रकृतिं, परमैतिहासिकनगर-ग्राम-दुर्ग-मन्दिर-सरोवरादीनि च विलोकयितुमादिष्टो भविष्यसि। एतावदेव न, यदा तदा देशान्तरेभ्यः आगतानां विद्वत्तल्लजानां भाषणान्यपि श्रोतुं सदवसरं लभमानस्त्वं गुरुकुले विविधज्ञानमपि संग्रहीष्यसि।

हनुमान् : जननि, चरित्रोत्थापनकारिणीनां विश्वबन्धुत्वोद्भाविनीनां राष्ट्रप्रेमसञ्चारिणीनां मङ्गलमयसंस्कारस्थापनकुशलानां पुराणेतिहासकाव्यादिषु शोभमानानां कथानामाख्यायिकानां, सूक्तीनां, सुभाषितानाञ्च श्रवणकाले मदीयं मानसमतितरां भगवतो रामस्योपासनायां प्रावीवृतत्। अपि किमहं विद्यार्जनानेहसि स्वोपास्यदेवस्यार्चने ऽनुमतो भवेयम् ?

अञ्जना : अवश्यमेव सहर्षमनुमतो भविष्यसि। गुरवस्तु ते तदर्चनातो भृशं प्रसन्नतां प्राप्स्यन्ति।

(केसरिण आगमनम्)

केसरी : वत्स हनुमन्, विद्यामध्येतुं द्रागेव त्वं प्राप्तगुरुकुलप्रवेशो

भविष्यसि। अतः श्वः शुभमुहूर्ते तव यज्ञोपवीतसंस्कारो भविता।

हनुमान् : अम्बयेदमेवाभिहितमधुनैव। एतन्निशम्य मम हृदयं भृशं प्रसीदति। भवन्तौ मातापितरौ उपनयनसंस्कारस्य शुभवेलायां स्वशुभाशीर्भिर्मामनुगृह्णीतां, येनाहं स्यां रामभक्तिरतो ज्ञानवान् वेदादिशास्त्रविशारदः शक्तिमान् गुणवांश्च।

मातापितरौ : तदानीं साम्प्रतमपि आवयोः शुभाशिषः :—

भूयाः महान् प्रियसुत ! त्वमिह क्षमायां
ज्ञानाम्बुधिः सुविदितश्रुतिशास्त्रवेत्ता।
धीमान् पराक्रमधरोऽरिविजेतृशौर्यः
सद्रक्षको भवहितोद्यत-रामभक्तः॥

पिता : वत्स, त्वं नेदं विस्मर

अज्ञानं गुरवो हरन्ति कृपया शिष्यस्य कृत्स्नं द्रुतं
धृत्वा ज्ञानविभां शुभां सुविमलां विश्वोपकारक्षमाम्।
कल्याणं कुरुते नितान्तममितं शिष्योऽपि विद्योज्ज्वलः
तस्मान्नास्ति परं गुरोर्गुरुतरं नः संस्कृतिर्मन्यते॥

माता : इदमपि न विस्मरणीयं, वत्स !

मातुः पितुश्च शुभमङ्गलकामनाभिः
पुत्रस्य जीवनमहो क्षितिमण्डलेऽत्र।
गच्छद् विकासमनिशं लभते परत्र
श्रेयो भृशं निखिलराष्ट्रगतं यशश्च॥

(जवनिकापातः)

द्वितीयं दृश्यम्

(गुरुकुलोद्यानेऽनेके छात्राः समवेताः सन्ति)

छात्रेष्वन्यतमश्छात्रो विद्याधरः :

बन्धो कुशाग्रधिषणो हनुमन्नसि त्वं
विद्यानुरागहृदयः प्रतिवासरं त्वाम् ।
पश्यामि पुस्तकगृहे नियते हि काले
ग्रन्थान् पठन् रुचिमता हृदयेन नित्यम् ॥

वेदनिधिः : त्वं सेवसे गुरुजनान् मनसा नितान्तं
तेभ्यः पठन् हि विविधश्रुतिशास्त्रवृन्दम् ।
संवाहनेन समिधः फलपुष्पनीरा-
ण्यादाय वृष्टिसमये च हिमे निदाघे ॥

मेधाव्रतः : क्रीडाभिभाषणकलाप्रतियोगितासु
विद्यालये च विविधे च विशिष्टकाले ।
प्रीणासि पूज्यगुरुवृन्दमथो वयस्यान्
तीक्ष्णां धियं प्रबलशक्तिगुणान् प्रदर्श्य ॥

हनुमान् : एषा कृपास्ति करुणामनसां गुरूणां
सद्भावना च भवतां सुहृदां समेषाम् ।
स्निग्धाधियाति हि यतो जन एष इष्टां
श्लाघ्यां प्रियां सफलतां मम मित्रवर्य्याः ॥

सोमः : आयाहि प्रिय वयस्य हनुमन्, वेत्स्येव त्वं श्वस्तव समावर्तनसंस्कारसमारोहस्तत्रगुरुजनाः शुभाशंसाभिस्त्वां वर्धयन्तस्त्वद्गृहान् प्रस्थातुमाज्ञापयिष्यन्ति । उत्सवविषयकं कार्यं महत् ; तस्य सज्जास्माभिः करणीयास्ति । बन्धो, आसाद्य स्वनिकेतनं त्वमस्मानपि

वयस्यान् समये समयें स्मरिष्यसि इत्येतदाशास्महे।

(जवनिकापातः)

तृतीयं दृश्यम्

(गुरुकुलस्य कुलपतिः, विद्वांसः, अतिथयः, छात्राश्च सर्वे स्व स्व स्थाने निषीदन्ति)

(मण्डपः फलपुष्पपल्लवध्वजपताकादिविविधमनोहरोपस्करैरलङ्कृतोऽस्ति)

(चत्वारश्छात्रा वेदमन्त्रैर्भगवन्तं वन्दन्ते)

ओ३म् अग्ने नय सुपथा राये
अस्मान् विश्वानि देव वयुनानि
विद्वान् युयोध्यस्मज्जुहुराणमेनो
भूयिष्ठान्ते नम उक्ति विधेम।
ओ३म् स्वस्ति न इन्द्रो वृद्धश्रवाः
स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः
स्वस्ति नो बृहस्पतिर्दधातु ॥
ओ३म् भद्रं कर्णेभिः शृणुयाम देवाः
भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवा ँ स्वस्तनूभि-
र्व्यशेमहि देवहितं यदायुः ॥

(एकश्छात्रः सरस्वतीवन्दनां कुरुते)

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥

अज्ञानं तिमिरं विनाश्य कृपया ज्ञानं प्रकाशं मतौ
या भक्तस्य सरस्वती विकिरति स्वस्य द्रुतं भारती ।
या मातेव जनं स्वभक्तिनिरतं सम्पालयन्ती सदा
कीर्त्या च प्रथितं करोति जननीं वन्दामहे तां वयम् ॥

कुलपतिः : विशिष्ट एष समावर्तनसमारोहः । अद्यात्र गुरुकुलस्य सर्वेष्वपि अन्तेवासिषु श्रेष्ठः प्रकृष्टोऽन्तेवासी सहर्षं शुभाशंसाभिर्मङ्गलमयीभिर्भावनाभिः प्रीत्या हनुमान् ससमावर्तनं संवर्धनीयोऽस्ति । अत्र—

वेदेषु शास्त्रसकलेषु च दर्शनेषु
प्राप्तं कलासु विविधासु च मल्लयुद्धे ।
वैदुष्यमद्भुतमनेन जगद्विजेतृ
श्रेष्ठं सुधीहनुमता बुधवन्द्यवंद्यम् ॥

शस्त्रास्त्रेषु च भाषणेऽखिलविधौ योगे च धर्मागमे
सर्वत्रैव च राजनीतिपरके कार्यप्रकर्षे नये ।
दाक्षिण्ये तरणे वनस्पतिकुले सर्वौषधानां गुणे
वेत्ताऽयं हनुमानभूद् गुरुकुलं धन्यं ह्यनेनाभवत् ॥

अहं सहर्षं हनुमन् प्रयातुम्
आज्ञापयामि स्वनिकेतनं त्वाम् ।
स्वयं बुधो ज्ञानिगणाग्रणीस्त्वं
कीर्तिं प्रदातुं त्वमिहागतो नः ॥

हनुमान् : अहो कृपालो गुरुवन्दनीय
भवत्कृपा मामुपलब्धविद्यम् ।
व्यधादुदारा भगवन्निदानी,
मयास्ति देया गुरुदक्षिणा का ॥

कुलपतिः—

वत्स त्वं मनसा गिरा च सततं स्वैः कर्मभिर्मञ्जुलैः
रामं स्थावरजङ्गमैकशरणं संसेवमानः प्रभुम्।
राष्ट्रं भारतसर्वराष्ट्रतिलकं नित्यं समुत्थापयन्
ज्ञानेन स्वधिया बलेन च गुणैस्तद्विश्ववंद्यं कुरु॥

कार्यं त्वदीयमिदमेव हि दक्षिणा ते
ज्ञानस्य धाम च बलस्य महानिधिस्त्वम्।
तेजोऽमितं च निदधासि महच्च वर्चो
रामस्य भक्तिमतुलामवदातरूपाम्॥

हनुमान् : आज्ञामिमां हि भवतः परिपालयिष्ये
नित्यं स्वजीवनमहं मनसा प्रवृत्तम्।
तत्राभिवंद्य मम पूज्य गुरो विधास्ये
वन्दे मुहुर्मुहुरहं भवतोऽङ्घ्रिपद्मे॥

(पटक्षेपः)

(नेपथ्ये)

ओ३म् द्यौः शान्तिरन्तरिक्षँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वँ शान्तिः शान्तिरेवशान्तिः सामा शान्ति रेधि। ओ३म् शान्तिः शान्तिः शान्तिः॥

चतुर्थं दृश्यम्

(विद्यासु निष्णातो भूत्वा हनुमान् यदा गुरुकुलाद् गृहमागतस्तदा पुरनरनार्यस्तमभिनन्दन्त्यो वर्धापयन्ति गायन्ति च सहर्षम्:—

(क) मातः करुणामयि केसरिसूनौ
ज्ञानिनां मुकुटे गुणशौर्यनिधौ
भारतपावनगौरवरूपे
जगतीहितकारिणि दिव्यबले
उज्ज्वलहृदये मङ्गलभवने
रामचरणाम्भोजमिलिन्दे
मातः करुणामनिशं किर शुभ्रां
लोके जयताद् हनुमान् जयतान्नः ।।

(ख) नराः--पृथ्वीं नागपतिर्द्युतिं दिनपतिश्चाह्लादभावं विधुः
व्योम व्यापकतां गिरिश्च गुरुतां गाम्भीर्यमम्भोनिधिः ।।
नार्यः--तोयं शैत्यमथानलश्च दहनं वायुर्गतिं बिभ्रति
वीरः केशरिनन्दनस्तु सकलानेतान् गुणान् रक्षति ।।

(ग) नराः—रामस्यातुलभक्तिमेष निदधद् विद्यानवद्योदयः ।
धीरः स्वर्णमहीध्रदेहवसुधाधन्योऽञ्जनानन्दनः ।।
नार्यः-लोकोऽस्मिन्नभिभाति दुष्टविपिनस्याग्निप्रचण्डोच्छ्रितः ।
सत्राता सुहृदां सतां प्रियसखा धीमान् समुज्जृम्भते ।।

(घ) सर्वेऽपि युगपत्—

हरतु हरतु तिमिरमतिदुस्तर-
मवनितलवितनमिदम् ।
हनुमन् जनतार्तिदलनपटो
गमयतु नाशमिहत्यतमः ।।
कष्टमतिशयभरं कुरु सम्प्रति संवृतं
सृज सृज जगति तेजोऽजस्रं
भवतु चरणसरोजयुगं तव शरणं
जयतु जयतु केसरिनन्दन सततम् ।।

(पटक्षेपः)

पञ्चमं दृश्यम्

(माता अञ्जना, पिता केसरी, हनुमांश्चोपविशन्त्युद्याने स्वस्वासने)

हनुमान्— साकेतराज्याधिपतेः क्षमायां
विख्यातनाम्नो दशपूर्वकस्य ।
रथस्य ज्येष्ठात्मजरामचन्द्रं
निषेवितुं कामयते मनो मे ॥
मदीयमातर्मम पूज्य तात
स्वाज्ञां प्रदायातिमुदा भवन्तौ ।
सुतं स्वकीयं कुरुतां कृतार्थं
शीघ्र विनीतं हनुमन्तमेतम् ॥

अञ्जना— धन्योऽसि वत्स मम काङ्क्षति मानसं ते
चेत् सेवितुं दशरथात्मजरामचन्द्रम् ।
आज्ञापयामि मनसा समुदं तदर्थं
गच्छ स्वजीवनमिदं सफलं कुरुष्व ॥

केसरी— श्लाघ्योऽसि वत्स हनुमन् यदि राघवस्य
संसेवनाय हृदये तव कामनास्ते ।
प्रीत्या प्रयाहि सुकृतस्थित मानसस्य
भूयाज्जनुः क्षितितले सफलं तवेत्थम् ॥

(जवनिकापातः)

तृतीयोऽङ्कः

प्रथमं दृश्यम्

(दशरथाधिपतेः प्रासादे रामो विराजते, तस्य पुरः प्रणतमौलिर्भवन् हनुमान् स्थितोऽस्ति)

हनुमान् : औदार्यमञ्जुल महाभुज नाथ राम
कारुण्यवन् मृदुल दीनदरिद्रबन्धो ।
त्रातः सतां च शरणागतवत्सल त्वां
भक्त्यानुगो नमति धर्मधरं हनूमान् ।।
समागतस्त्वां शरणं जगद्धित---
स्थितं प्रभोऽयं रघुवंशसम्भवम् ।
विदेहपुत्रीदयितं धनुर्धरम्
अनुग्रहं स्वं कुरुतादिहानुगे ।।

रामः : गुणा प्रभूता हनुमन् महान्तो
मतीश्च तीक्ष्णा त्वयि वेदविद्या ।
विश्रान्ति चैतच्छ्रुतमेव सम्यङ्
मनो मम त्वां परिवीक्ष्य हृष्टम् ।।
मयात्र लोके हनुमन् बहूनि
कार्याणि कार्याणि बुधेन्द्र शीघ्रम् ।
कुरु प्रतीक्षां मम वीर सौम्य
ह्यनेहसो युक्ततरस्य तस्मात् ।।
कृतोऽन्तरङ्गे हनुमन्नतोऽधुना
मया सहर्षं प्रियवातनन्दन ।
न सोऽस्ति दूरे मम वीर कालो
यदास्ति कार्यं जगतीह कार्यम् ।।

लङ्केश्वरस्य रावणस्य ऋषिमुनिव्यथाकारीणि कुकृत्यानि पृथिवीमनुक्षणं दुन्वन्ति । तमहं द्रागेवोद्धृत्य भुवि धर्मं स्थापयितुमभिलषे । एतस्मिन् लोकहितकरे महति कार्ये तव प्रशस्तं साहाय्यमपेक्ष्यते । दशाननो महाबलिनि बालिनि प्रीयते । स दुर्मतिर्बाली स्वानुजस्यैव सुग्रीवस्य शोणितं पिपासति । तद्भयत्रस्तः सुग्रीव ऋष्ययूकं महीधरमधिवसति । त्वमृष्यमूकं प्रस्थाय सुग्रीवस्य साचिव्यं भज । अहं विदितभारताहितपरकरावणकुमन्त्रसर्षिविश्वामित्रस्य यज्ञं रक्षन् सुबाहुं ताडकां चोद्धरिष्यामि । ततः सत्वरमेव दण्डकारण्यं गत्वा त्रिशिरः खरदूषणादिभयङ्कराधममतिराक्षसान् व्यापाद्य गिरिमृष्यमूकमायास्यामि । तत्र त्वं सुग्रीवं मम मित्रम् कारयित्वा ममाभीष्टसिद्ध्यां साहाय्यकृद्भव ।

हनुमान् : **आज्ञां प्रभो पालयितुं कृपालो**
गच्छामि पृथ्वीधरमृष्यमूकम् ।
सेवां विधास्यामि भवत्प्रदत्तां
बुद्ध्यापि चित्तेन बलेन चापि ॥

द्वितीयं दृश्यम्

(ऋष्यमूकोऽद्रिः; तत्र स्वमन्त्र्यादिभिः सह सुग्रीवस्तिष्ठति; हनुमानायाति तत्र)

सुग्रीव : मान्य विप्र ! भवति ऋष्यमूकमागते सति, मद्धितपराः सुहृदो भवन्तं भवदीयाञ्चानुपमां विशिष्टतां महनीयां विद्वत्ताञ्चाधिकृत्याभिहितवन्तः; निशम्य तां मम मनो भृशं नन्दति ।

मेधाविनां मान्य पवित्रचित्त
वेदादिशास्त्रेषु सुधीऽद्य साधो ।
प्रीतोऽस्मि सम्प्रेक्ष्य महामतिं त्वां
प्रीत्या करोमि प्रिय स्वागतं ते ॥

हनुमान् : धन्योऽहमद्य ! भगवतोऽनुकम्पयानन्तया कस्माच्चित् प्राक्तनात् सुकृताच्च भवदीयं पुण्यदर्शनं जातम् । भवत आकृतिं प्रेक्ष्य, यशस्विन् तर्कये, भवन्तं कोऽपि साम्प्रत माधिर्व्यथयति । स चेन्न गोपनीयतरस्तदा तत्र जिज्ञासास्ति मदीया ।

सुग्रीवः : अद्यत्वेऽहं स्वभ्रातुर्वालिनो भयात् क्वापि न शान्तिं विन्दामि । सर्वस्मिन्नपि काले सर्वत्र च तस्माद् विभ्यदितस्ततो भ्रमामि । स ममासून् जिघृक्षति । अस्ति स इदानीं मम महानरातिः ।

हनुमान् : कस्माद् कारणाद् वाली भवति शत्रुत्वधियं निबध्नाति ?

सुग्रीवः : पुरा द्वयोरप्यावयोर्भ्रात्रोर्महाननुरागः स्नेहश्च विपुलः प्रावर्तत । परमेकदा मायावी नाम दनुजो मदीयं भ्रातरं वालिनमुच्चैर्योद्धुमाजुहाव ।

हनुमान् : ततस्ततः ।

सुग्रीवः : स तस्य प्रत्यर्थितामसहमानस्तमभिभवितुं प्रदुद्राव । मायावी तद्भयभीतो भवन् कन्दरां प्रविवेश । बन्धुर्वाली "कन्दरायाः द्वारि त्वं तावत् सन्तिष्ठस्व; अहं मायाविनं निहत्य यावन्नागच्छेयम्, अत्र मां त्वं दिनानि पञ्चदश प्रतीक्षस्व" इत्येतदभिधाय गह्वरं प्रविवेश । तमहं तत्र मासमेकं प्रत्यैक्षिषि । मायाविना मम बन्धुर्निहत इत्याशङ्क्य दरीद्वारं बृहच्छिलयावृत्य प्रतिनिवृत्तः ।

हनुमान् : ततस्ततः ?

सुग्रीवः : तां घटनामाकर्ण्य प्रजा मां सिंहासनासीनं कृतवती। परमितो मायाविनं व्यापाद्य वाल्यागमत्। स मां सिंहासनस्थं वीक्ष्य रक्तनयनो भूत्वा व्यापादयितुं मां प्रचक्रमे। तदा मया सर्वैव यथार्थवस्तुस्थितिर्निवेदिता परं न तस्य संरम्भोऽशाम्यत्। स मम भार्यामन्यच्च सर्वां मम सम्पदं हृत्वा सम्प्रति मयि शत्रुधियञ्च वद्ध्वा न स्वकीयं मनो मम व्यापादनात् विरमयति। तद्भयादेवोद्विग्नः सन् भ्रमामि। एषास्ति बलवती चिन्ता या मां दिवानिशं भृशं बाधते।

हनुमान् : सम्प्रति भवान् मा स्म भैषीत। स वाली मतङ्गमुनिशापात् तस्याश्रमं नागन्तुं शक्नोति। अस्माभिस्तत्रैव गन्तव्यम्। भवांस्तत्र शान्तिपूर्वकं वस्तुं प्रभवेत्।

सुग्रीवः : मतङ्गर्षिणा कस्मात् कारणात् बन्धुर्वाल्यशप्यत ?

हनुमान् : वालिदुन्दुभिदानवयोरेकदा महद् भीषणं जन्यं प्रावर्तत। तत्र बाली दुन्दुभिं निजघान। हतस्य च दुन्दुभेरुपरतं वपुर्वाली रंहसा चिक्षेप। तस्य दानवस्य शोणितस्यन्दिमृतो देहो मतङ्गस्यर्षेराश्रमे निपपात। तदा तद्वपुः क्षरितासृग्बिन्दवो मुनेर्गात्रमदूशयन्। ध्यानबलाद् ऋषिः सर्वमपि ज्ञात्वा चेद् बाली ममाश्रममागमिष्यत् तदा तच्छिरः शतशो विदीर्णमभविष्यदिति शशाप। अतः स न तदाश्रमं याति।

सुग्रीवः : अयन्तु भवता मद्धिताय साधूपायः प्रतिबोधितः। अस्माकं तत्र वासः स्यान्निरापदः। क्षिप्रमेव तत्रवत्स्यामः। भवदागमनात् प्रागेव परं मन्मन्त्रिणा

वालिनो देशांतरगमनं सूचितं; सः चिरसमयानन्तरं ततो निवर्त्स्यंते। अतः कञ्चन कालन्तु वयमिहैव स्थातुं शक्नुमः अहं प्रार्थये यद् भवान् मम मन्त्रिवरो भूत्वा मयि विद्वन्, अनुगृह्णातु।

(जवनिकापातः)

चतुर्थोऽङ्कः

प्रथमं दृश्यम्

(ऋष्यमूकमधितिष्ठन्ति सुग्रीवो हनुमान्, अन्ये च तन्मन्त्रिणः)

सुग्रीवः : यस्माद्दिनादिह भवान् हनुमन्नुपेतो
विघ्नान् हरन् अनुदिनं प्रददच्च धैर्यम्।
आश्वासयन् बहुकथाकथनेन राज-
नीत्या च मामुपकरोति भृशं मनीषिण्॥

बुद्धिः पवित्रनिशिताबलमद्भुतञ्च
चेतो महत् सुजनता शशिकौमुदीव।
ज्ञानेऽद्वितीय इह भूभुवनेऽस्ति विद्वन्
लब्ध्वा भवन्तमहमस्मि हि धन्यभाग्यः॥

सम्प्रेक्षतां वनपथे ककुभि प्रतीच्या-
मागच्छतः सपदि कौ हनुमन् युवानौ।
तेजस्विनौ परमसुन्दरवीरसिंहौ
किं प्रेषिताविह रिपूत्कटबालिना तौ ?

यात्वा स्थितिं सपदि बोधयताद् भवान् मां
कृत्वेङ्गितं समुचितं त्वरया वयस्य ।
तौ प्रेषितौ बलवता रिपुबालिना चेद्
यास्यामि काननगतं विवरं निगूढम् ॥

हनुमान् : ज्ञातव्यमाशु विदितं धरणीश कृत्वा
धीमन् भवेयमिह शीघ्रमुपस्थितोऽहम् ।
सङ्केत एव विहितो ह्युचितो भवेद्वा
त्याज्यं न धैर्यमतिकष्टयुतेऽपि काले ॥

द्वितीयं दृश्यम्

हनुमान् : वीरावलौकिकनितान्तमनोज्ञरूपौ
कोदण्डभृद्बलविभूषितदेहरम्यौ ।
प्रेक्ष्येव राजतनयौ सुभगौ भवन्तौ
ज्ञातुं मनोऽभिलषते कृपया वदेताम् ॥

भयावहं काननमेतदस्ति
कठोरहिंस्रैः पशुभिः परीतम् ।
गिरेश्च पन्था बहुविघ्नयुक्तो
वने भवन्तौ भ्रमतः किमर्थम् ॥

निशम्य वाचामविलम्बिताञ्च
सुसंस्कृतामद्भुतविज्ञताश्रिताम् ।
मनो मदीयं प्रियलक्ष्मणाधुना
महीसुरेऽत्रातितरां प्रसीदति ॥

वैदुष्यबन्धुरसुचारुपदार्थभव्यां
श्रुत्वा रिपोरपि गिरां हृदयं कठोरम् ।
शक्नोति हन्त भवितुं परिवर्तितं हि
छेत्तुं समुत्सुकमरातिशिरोऽतिशीघ्रम् ॥

वार्तां विधेहि सह लक्ष्मण भूसुरेण
विद्वद्वरेण मतिशक्तिसुशोभितेन ।।
वर्चस्विना श्रुतिविदावनिगौरवेण
ह्येतेन सम्प्रति वनक्षितिमागतेन ।।

लक्ष्मणः : साकेतराज्यविदितक्षितिपस्य विप्र
धर्मात्मनो दशरथस्य सुताववेहि ।
आदेशरक्षणनिमित्तमिहागतौ नौ
एषोऽस्ति राम इति नाम च लक्ष्मणोऽहम् ।।

वस्तुं चतुर्दश समाः मम बन्धुरामः
आज्ञप्त एष जनकेन सुतः स्वकीयः ।
ज्येष्ठो हृतात्र विपिने मम बन्धुजाया
केनापि सा जनकजा परिमार्ग्यते हि ।।

देयोऽधुनात्रभवता कृपया स्वकीयो
विद्वन् प्रियः परिचयो मम रामबन्धुः ।
ज्ञातुं भवन्तमभिकाङ्क्षति नौ बुधेन्द्र
साहाय्यमिष्टमभिमार्गणकार्यहेतोः ।।

हनुमान् : औदार्यसागरकृपामय सेवकोऽयं
बोद्धुं क्षमो न भवति स्म भवन्तमीड्यम् ।
स्वं व्यस्मरत् पतितपावनमीशमेषः
मन्दं जनं परमिमं क्षमतां प्रभो मे ।।

कालो गतोऽधिकतरः प्रभुदीनबन्धो
दृष्टस्य नाथ भवतो हि पितुर्निकेते ।
एतस्य मेऽत्रभवतो भगवन् महीयन्
याचे क्षमामहमतः शरणं भवन्तम् ।।

वीराग्रणीः सदयलक्ष्मण किङ्करं मा-
मेतं भवान् सम्प्रति चापि मार्ष्टु ।
सुग्रीवमद्रिशिखरे निवसन्तमत्र
सौभाग्यवन्तमधुना कुरुतां भवन्तौ ॥

सन्त्रासितो वसति सम्प्रति बालिनासौ
भ्रात्रा निपीडित इहातितरां विषण्णो-
ऽप्यन्यायिनाह्रियत तस्य धनं च भार्या
कृत्वा कृपां तमभयं विदधातु राम ॥

आकर्ण्य बालि विहितं भृशगर्हणीय-
मन्यायमेति हृदयं मम तीव्रदुःखम् ।
सुग्रीव-कष्ट-विनिवारणहेतुनाहं
सार्धं त्वया बुधचलाम्यधुनैव विप्र ॥

(जवनिकापातः)

तृतीयं दृश्यम्

(ऋष्यमूकाद्रिशिखरे रामं लक्ष्मणञ्च फल पुष्पपत्र-नारिकेल-कदलीप्रभृति विविधोपचारैः सुग्रीवः पूजयन् दृश्यते, तेन च सह हनुमदादिमन्त्रिणोऽपि किञ्चान्ये परिजनाः सन्तिष्ठन्ते)

सुग्रीव : राम भवन्तमयमादरभक्ति-युक्तः
सुग्रीव ईश भवतोऽनुचरोऽनुगानाम् ।
नत्वा प्रभो सविनयं भवतः करोति
प्रीत्याभिनन्दनमथ प्रियपूजनञ्च ॥

धन्यं जनुर्जगति मेऽद्य वदान्य जातं
प्राप्याघनाशनपटुं शुभदर्शनं च ।

भृत्येषु नाथ करुणामय मन्यतां मा-
मेतं जनं प्रणतमौलिरहं स्तवीमि ॥
नाथागतोऽस्मि शरणं सदयं भवन्तं
धर्मैकरक्षणनिमित्तगृहीतदेहम् ।
विश्वाभिराम गुणगौरव गेयवृत्त,
मां पातु देवनयपालनसक्तचित्त ॥

रामः : अन्यायलग्नमतिकुत्सितकर्मभाजा
यद् बालिना भवति कल्मषिणा कृतं तद् ।
विज्ञापितं हनुमतादित एव कृत्स्नं
प्राणान् हरिष्यति शरो मम बालिनोऽयम् ॥
योऽयूयुजद् दुरितकर्मसु जीवनं स्वं
सोऽवाप्स्यते तदनुरूपफलं कुमार्गी ।
यः पुण्यकर्म विदधौ निजजीवने ना
सः प्राप्स्यते तदनुकूलफलं सुमार्गी ॥

हनुमान् : सुग्रीवमेतमधुना सुहृदं विधाय
तस्याद्य जन्म सफलं विदधातु नाथ ।
वैश्वानरो भवतु कर्मणि चात्र साक्षी
संस्थाप्यते स भगवन् भवतोर्हि मध्ये ॥

रामः : एवमस्तु ।
अद्यप्रभृत्येव ममास्ति जातः
सुग्रीव एषः क्षितिपो वयस्यः ।
वह्नेः समक्षे शपथेन वच्मि
कष्टं तु चास्यास्ति ममैव कष्टम् ॥

(पटक्षेपः)

चतुर्थं दृश्यम्

(सलक्ष्मणो रामः स्फटिकशिलामध्यास्ते, तत्पुरः प्रणतमस्तकौ निबद्धाञ्जली सुग्रीवहनुमन्तौ सन्तिष्ठेते)

हनुमान् : प्रभो, हतो भवता बाली; सुग्रीवो हि विपद्भ्य उद्धृत्य राजा कृतः। वालिकुमारोऽङ्गदश्च युवराजो विहितः। विना भवदीयां कृपां न कदापि सर्वमिदं सम्भवमासीत्। केन प्रकारेण भवतोऽसीममनुक्रोशमिमं नृपतिः सुग्रीवः स्तुवीत। अयञ्च तन्मन्त्री हनुमान् कथं नु भवच्चरणाम्भोजयोः कृतार्थतां प्रकटीकुर्वीत !

रामः : हनुमन्, इदन्तु सर्वं वस्तुतस्तु भवद्वबुद्धिवलस्यैव मधुरं फलम्। भवतः साहाय्यमन्तरेण सर्वमप्येतत् कुतः सम्भवमासीत्। भवन्तं ज्ञानगुणनिधिमवाप्य सुग्रीवः स्वमहापत्सागर सुखेनोदतरत्। विपत्समुद्रं तरितुं तस्य कृते भवान् समर्थः पोतः संवृत्तः।

हनुमान् : करोति भद्राणि भवान् स्वयं प्रभो
समस्तपुंसामनिशं हि वस्तुतः।
परं निमित्तं विदधाति मानवं
कृपालुचेताः जगतः सुहृद् भवान् ॥

सुग्रीवः : सत्यं प्रभो मम विपत्तिविनाशनाय
यं सत्प्रयत्नमकरोदुचितं हनूमान्।
तत्राधुना किमु वदेयमहं महीन्दो-
ऽनैषीद् भवन्तमिह मद्धितहेतुना सः ॥
कृत्वा कृपां मयि मदीयकठोरकष्टं
विध्वंसितं भगवता भवतातिशीघ्रम्।

मौलिर्भवच्चरणयोः प्रणतोऽस्ति नाथ
दीनार्तिनाशनपटो मम वन्दनीय ॥
योग्यस्तु नास्मि भवतो भवितुं वयस्यः
संसारभोग्यविषयेषु रतोऽतिमन्दः ।
एषास्त्यनन्तकरुणा करुणामयस्य
दत्तः प्रभो मम कृते गरिमा य एषः ॥
सीता हि दण्डकवनाद्ध्रियते स्म माता
केनापि नाथ हृदयं व्यथते भृशं नः ।
सम्मार्गणाय कुशला बलबुद्धिभाज-
स्तस्याश्चराः सपदि सर्वदिशास्वटेयुः ॥
सेनाचराः परमयोग्यनवा युवानः
प्रेष्याः मदीयहनुमन् ! परिमार्गणाय ।
क्षिप्रं विदेहदुहितुर्निखिलासु दिक्षु
स्वाज्ञाधुना भगवता भवता प्रदेया ॥

हनुमान् : आदेश एष भवतो नृप मौलिवंद्यो
यास्याम्यहं जनकजां स्वयमेव राजन् ।
ह्यन्वेष्टुमाशु निजमित्रसमूहयुक्तः
सा क्वास्ति केन च हृतेत्यवगन्तुमेतत् ॥

सुग्रीवः : प्रभो ! सहस्रशो युवानो मातुः सीतायाः अन्वेषणाय भवतः सेवायां सन्त्युपस्थिताः। वयं तावन्न सुखेन शान्त्या च श्वासमेकमपि ग्रहीष्यामो यावन्माता सीता क्व, केन च सा हृतेत्येतन्न ज्ञातं करिष्यामः। यान् यान् यूनो यस्य नायकत्वे यां यां ककुभं गन्तुं भवान् आज्ञापयिष्यति ते ते तां तां ककुभं गमिष्यन्ति ।

रामः : सीतान्वेषणाय जिगमिषून् सर्वानपि जनान् नायकांश्च द्रष्टुमिच्छामि ।

(सर्वेऽपि नायका युवानश्च अजिरे उपस्थिताः भवन्ति)

सुग्रीवः : महामन्त्रिण् हनुमन्, प्रथमं पूर्वदिग्गामिनं नायकं तदधीनांश्च यूनो भगवतो रामस्याग्रे कृपयोपस्थापयतु ।

हनुमान् : वीरशिरोमणिविनत, एहि भगवन्तं रामं राजानञ्च सुग्रीवं प्रणम्य आदेशं शृणु ।

विनतः : एष विनतः प्रभो भवच्चरणयोः प्रणमति । राजन्, (प्रणामपूर्वकम्) आदिशतु कृपया सेवकमिमम् ।

सुग्रीवः : वीर विनत, भगवान् राम इच्छति यत् त्वं सीतां मातरमन्वेष्टुं प्राचीं प्रयाहि । ते भवन्निघ्नाः सैनिकाश्च भवन्तमनुयान्तु यान् भवान् निनीषति ।

हनुमान् : वरुणदिग्गामी नायकः सुषेण उपस्थितो भवतु ।

सुषेणः : (भगवन्तं रामं सुग्रीवञ्च राजानं नमति) राजन् अहमस्मि सुषेणः, आज्ञापयतु सेवकमिमम् ।

सुग्रीवः : भगवान् रामोऽभिलषते यत् त्वं मातृसीतान्वेषणाय प्रतीचीं दिशां याहि ।

हनुमान् : राजन्, एष शतबलिर्मातृसीतान्वेषणाय उदीचीं ककुभं यातुं भवदाज्ञामिच्छति । कृपयाज्ञापयत्विमम् ।

सुग्रीवः : याहि त्वमुदीचीम् । वीरवरेण्य हनुमन्, मातरं सीतां मार्गयितुं भवान् अभीष्टैः कुशलैः स्वसुहृद्भिः सह दिशमवाचीं स्वयं प्रयात्वित्येतदिच्छति भगवान् रामः ।

हनुमान् : भगवान् रामो यथेच्छति यथा च भवानादिशत्यहं स्वयं दक्षिणदिशं गमिष्यामि ।

राम : परिभ्रमन्नासमितस्ततो यदा
विदेहजायापरिमार्गणार्थम् ।
सलक्ष्मणः काननभीमदण्डके
निशाचराढ्ये पशुहिंस्रपुष्कले ॥

अहं जटायुं क्षणदाचरेश-
प्रताडितं प्रेक्षितवान् प्रपीडितम् ।
व्रणैरसौ बोधितवान् हृतास्ति सा
नृशंसलङ्कापतिनोन्मुखो दिवः ॥

प्रयाह्यवाचीं हनुमन्नतो दिशाम्
इतो ब्रवीम्यद्य समीरनन्दन ।
त्वं प्राप्स्यसे तां जनकक्ष्मापतेः
सुतां नगर्यां रजनीचरप्रभोः ॥

गृहाण धीमन्निदमङ्गुलीयकं
प्रयच्छ वातात्मज जानकीं प्रति ।
भृशं भवन् सावहितं प्रयाहि च
मदीयसंदेशमिमं नयस्व च ॥

'सीते त्वदीयविरहानलतापतप्तो
निद्रां लभे न निशि नो दिवसे च शान्तिम् ।
अग्निञ्च वर्षति शशी किमहं वदेयं
त्वं मानसे वससि तेन हि वेत्सि सर्वम् ॥

लब्ध्वैव ते कुशलवृत्तमहं हि हत्वा-
ऽऽनेष्यामि येन हरणं रिपुणा कृतं त्वाम् ।
क्षिप्रं विदेहतनुजे भव धीरचित्ता
सीते वदेयमधुना किमहं विषण्णः ॥

ममात्र कार्ये भवतो भवेद् ध्रुवं
सिद्धिः प्रधीन्द्रो हनुमन् क्षमो भवान् ।
गुणी समर्थो भवतो हि धी-बले-
ऽवयाम्यतो यात्वधुना ममाग्रहः ॥

हनुमान् : प्रयाति लब्ध्वा भवतः कृपां प्रभो
शुभामनुज्ञामथ चाशिषं भवेद् ।
जनस्त्ववश्यं सफलाभिकाङ्क्षितो-
ऽनुगः स्वकार्ये परिणूयते भवान् ॥

(पटक्षेपः)

पञ्चमोऽङ्कः

प्रथमं दृश्यम्

(दक्षिणसागरतटम्, महेन्द्राचलोपत्यका अङ्गद-जाम्बवद्धनुमदादिका उद्विग्नमनस उपविशन्ति)

अङ्गदः : मातरं सीतां मार्गयतामस्माकमनेकदिनानि व्यतीतानि, न मातुः सीतायाः अवाप्तिः सञ्जाता; तस्याः अप्राप्तौ, सति च मासे समाप्ते, यदा वयं निवर्त्स्यामहे राजा सुग्रीवो रामस्य कार्ये अप्राप्तसाफल्यान् अस्मान् वीक्ष्य, कदापि नास्मान् क्षंस्यते। स दण्डयिष्यति, किमहं करवाणि ? सम्प्रति तु मया स्वप्राणास्त्याज्याः ।

जाम्बवान् : युवराज ! न भवान् दूयताम् । भवन्तं दूयमानं विलोक्य वयं दूयामहे । मा स्म भैषीद्भवान् । भगवतो-

ऽनुकम्पया कार्ये सिद्धिः स्यात् । सीता प्राप्ता भवेत् ।

(सम्पातेः आगमनम्)

सम्पाति : अये के भवन्तः ? मां जटायोर्बन्धुं सम्पातिं भवन्तोऽवगच्छन्तु । अपि किमुदन्तं जटायोर्भवन्तो विदन्ति ? स न चिराद् विलोकितः ।

हनुमान् : आसीत् किं जटायुर्भवतो बन्धुः ? स तु धर्मात्मा रामस्य कार्ये स्वकीयानसून् अजुहोत् । स रावणस्य हस्तपञ्जरात् सीतामुन्मोचयितुं कठोरं प्रयासञ्चकार । परं रावणेन सः स्वचन्द्रहासेन न्यहन्यत ।

सम्पातिः : सीतोन्मोचनप्रयासं कुर्वाणः स रावणेन व्यापादित इत्येतदाकर्ण्याहं दुःखितः सुखितश्च भवामि । रामस्य कार्ये तदीयं शरीरं सोऽत्यजत् इत्येतद् ज्ञात्वा तु मनः सुखमनुभवति, परमहं स्वबन्धुजटायुरहितो जात इत्येतद् विज्ञाय दुःखितश्चास्मि ।

हनुमान् : यस्याः सीतायाः उन्मोचनाय प्रयस्यन् स भवद् बन्धुर्जटायुः प्राणानहौषीत् तामेवान्वेष्टुं वयमित आगताः स्मः ।

सम्पातिः : धन्या भवन्तः । रामस्य कार्यार्थं भवन्तो भ्रमन्तीत्येतन्मां प्रीणयति । भवन्तः सागरमुल्लङ्घ्य लङ्कायां सीतां प्राप्स्यन्ति । साम्प्रतमहं सागरतटं प्रयाय तत्र बन्धवे जटायवे तिलाञ्जलिं समर्प्य तं तर्पयिष्यामि ।

(सम्पातेर्गमनम्)

जाम्बवान् : हनुमन्, किं भवांश्चिन्तयति ? अस्ति भवान् अतुलबलानां धाम । किं न भवान् कर्तुं क्षमः ? किमस्ति

तद्, यन्न साध्यं भवतः। गुणसागरो बुद्धिसागरो बलसागरश्च भवान्। भवान् समुद्रमिममुल्लङ्घ्य मातुः सीतायाः कुशलतां ज्ञातुं प्रभवति। स्मरतु भवान् स्वकीयमपरिमितं बलं लोकोत्तराञ्च प्रतिभाम्।

हनुमान् : बन्धो जाम्बवन्! त्वया स्मारितं मम पौरुषम्। वस्तुतो भगवतोऽनुग्रहेणाहं समुद्रमुल्लङ्घ्य जनन्याः सीतायाः अन्वेषणं विधाय तस्याः कुशलतां ज्ञातुं प्रभवेयम्। भवन्तः सर्वेऽपि साम्प्रतं मामनुजानन्तु सहर्षं सशुभकामनां च।

संस्मृत्य रामचरणाब्जयुगं समोदं
लङ्कां प्रयाम्यसुररावण-राजधानीम्
तत्रैव रामदयितेति विधाय बोध-
मुल्लङ्घ्य सागरमिमञ्च पुनर्निवर्त्स्ये॥

(पटक्षेपः)

द्वितीय दृश्यम्

(नेपथ्ये)

सुरसे, हनुमान् सीता मन्वेष्टुं लङ्कां ढौकते। वयं ज्ञातुमिच्छामस्तस्य बुद्धिं बलञ्च। त्वं गत्वा तं परीक्षस्व। लङ्कायां सीताया मार्गणं, रामाभीष्टकार्यसाधनं तदैव भवितुमर्हति यदा प्रेषितोऽयं दूतो हनुमान् स्याद् अजेयबुद्धि-बलभृत्। हनुमति वर्ततेऽजेया धीः शक्तिश्चेत्येतद् वेत्तुं वयमुत्सुकाः स्मः। अतस्त्वं तं परीक्षितुं प्रतिष्ठस्व।

सुरसा : अहो, देवा हनुमत्परीक्षणाय मां नियुञ्जन्ति। अतोऽहं यामि।

(द्वौ देवौ प्रविशतः मञ्चे च तौ निषीदतः)

प्रथमो देवः : अद्य सुरसा हनुमतो धियं बलञ्च परीक्षितुं गतासीत् । अपि किं वेत्ति भवान्, तत्र किं संवृत्तम् ?

द्वितीयो देवः : जानामि । शृणोतु भवानवहिततापूर्वकम् । हनुमताप्रोक्ता सुरसा 'अहं मातरं सीतामन्वेष्टुं लङ्कां यामि । तामन्विष्य तस्या कुशलतोदन्तं लब्ध्वा भगवते रामाय च तत्सर्वं निवेद्य यदा कृतकार्यो भविष्यामि तदा भवत्याः आज्ञां सहर्षं पालयिष्यामि तत्कालं यावत् कृपया भवती प्रतीक्षताम् ।' परं सुरसा न तन्निवेदनमाद्रियते स्म । सा स्वाभिप्रेतमुद्दिश्य भृशमभिनिवेशमदीदृशत् । अन्ततो गत्वा हनुमान् स्वप्रतिभाकौशलेन सुरसां पराजिताञ्चकार । न हनुमति सा स्वप्रभावं स्थापयितुं शशाक । सा हनुमन्तं बुध्यां बले च पूर्णतया अजयमेव प्राप । अतस्तस्याग्रे सा नतमस्तका अभवत् । सा आशीर्भिस्तमनुजग्राह—

मतिगुणबलसिन्धो रामपादाब्जभक्त
पवनतनय मार्गास्ते शिवाः सन्त्वभीष्टाः ।
भवतु भवतु कार्यं गृह्यमाणं त्वया तत्
सफलमधिकशीघ्रं मानसाकाङ्क्षितं यत् ॥

इत्येतया शुभाशंसया तं कृतार्थं कृत्वा सान्तर्हितामगमत् ।

प्रथमो देवः : एतं व्यतिकरं निशम्य मम मनः पुनः पुनः स्तवीति हनुमन्तम् । वस्तुतः स एव धन्यो यो रामसेवायाः अग्रे अन्यानि सर्वाण्यपि महत्त्वानि अवजानाति । यः स्व सम्मानेषु सत्कारेषु लाभेषु च न स्पृहावान् सः

जगति क्व ? तस्य माता पितरौ धन्यौ पुण्यात्मानौ च यदीयः सुतो रामस्य भक्तो जितेन्द्रियो योगी लोभ-रहितश्च । अहं हनुमन्तं श्रद्धयाभिवादये। ततश्च किमघटत ?

द्वितीयो देवः : हनुमान् अग्रे छायाग्राहिणीं राक्षसीं सिंहिकां ददर्श। उत्पततां पतत्रिणां प्रतिविम्बं प्रताड्य व्यापन्नतां गतांस्तान् सोऽश्नन्तीं तामपश्यत् । प्राणिहितकारी हनुमांस्तां सत्वरमेवापिनट् ।

प्रथमो देवः : अहह, अयमपि हर्षप्रद उदन्तः । एहि बन्धो, इतस्ताव्चलेव । अये आकाशवाणी, आकाशवाणी ! श्रूयताम्।

निहत्य दुष्टां हनुमन् नृशंसां
तमीचरीं प्राणिवराकहन्त्रीम् ।
करोषि मार्गं गतविघ्नबाधं
वयं स्तुमस्त्वां वुधवंद्यधीरम् ॥

भवादृशा ये मनुजाः समर्थाः
धृतौ च दाक्ष्ये धियि किञ्च शक्त्याम् ।
भवन्ति खिन्ना न हि ते कदापि
स्वकीयकार्येषु जना जगत्याम् ॥

(गच्छतो द्वावपि)

तृतीयं दृश्यम्

(त्रिकूटगिरिशिखरस्था लङ्का सुवर्णमयी प्राकार-परिखापरिवेष्टिता नानामनोहरदृश्याभिरामा)

धन्योऽसि केसरिकिशोर महाबलौघ
श्लाघामहे हि नितरां भवदीयशौर्य्यम्।

लङ्काभिधाममितशक्तिमतीं विजित्य
प्राप्तां करोषि च ततः शुभकामनां त्वम् ॥

(इत्येतां व्योमगिरामाकर्ण्य तत्रत्या योद्धारो जनाश्च विस्मयं यान्ति ।)

हनुमान् : दशाननस्य राजप्रासादमारभ्य अन्येषाञ्च बहूनां कुम्भकर्ण-विरूपाक्ष-विद्युज्जिह्व-विद्युन्मालीन्द्रजिज्जम्बूमालि सुमालि-प्रभृतीनां भवनानि मया भ्रमतात्रावलोकितानि; तत्र तत्र न कुत्रापि सीता प्राप्ता । अहमस्म्यतः परमचिन्ताकुलहृदयः । किं कुर्याम् ? दृष्टेष्वप्यसंख्यातेषु सदनेषु नेदृशं निलयं मया प्रेक्षितं यस्य द्वारं, भित्तयश्च सन्ति रामनामाङ्किताः । आश्चर्यमिहापि कश्चिद् भगवद्रामभक्तः ! धन्यं मम भाग्यम् एतद्भवनाधिपतेः सौहृदं कृत्वावश्यमेवाहमिष्टलाभं कर्तुं प्रभवेयम् । अहो राम इति राम इति ब्रुवाणः कश्चिदित एवायाति । ममाननादपि राम इत्याकर्ण्य, मन्ये, सुजनोऽयं भवनाद् बहिरागतः ।

विभीषणः : लङ्कापतेर्भुवनविश्रुतरावणस्य
बन्धुर्विभीषण इति द्विज मामवेतु ।
प्रीत्या भवन्तमतिनम्रतया प्रणौमि
दृष्ट्वा मुदं मम मनो नितरां प्रयाति ॥

ज्ञातुं मदीयहृदयं मतिमन् भवन्तम्
औत्सुक्यवद् बुध भवान् कृपया ब्रवीतु ।
दातुं स्वदर्शनशुभं कुत आगतोऽस्ति
कश्चास्ति विप्रकुलभूषण कस्य सूनुः ?

हनुमान् : पुत्रोऽस्मि विज्ञवरकेसरिणः सुबन्धो
रामस्य दूतहनुमानिति मामवेतु ।
सम्प्रेक्ष्य नन्दति भृशं हृदयं भवन्तं
मे साम्प्रतं सुजनमण्डलवन्दनीय ॥
केनापि रामदयिता विपिने हृतास्ति
तन्मार्गणाय हि ममागमनं मनीषिण् ।
बन्धो विभीषण विदेहसुता भवेत् क्व ?
स्याद् दर्शनं न्वधिगतं क्व सुहृत् तदीयम् ॥
तद्दर्शनाय नितरामहमाकुलोऽस्मि
चान्विष्यतो मम गतः समयश्चिरं ताम् ।
साहाय्यमत्र भवतोऽद्य हि सर्वथेष्टं
नीतेति सेह विदितं कृतमस्ति साधो ॥

विभीषणः : सीता भर्तृवियोगतप्तहृदया
कार्श्यं गतास्तीह सा
दीर्घश्यामकचान् जटामिव
गतांस्त्यक्ताशना बिभ्रती ।
रम्याशोकवने करोति वसतिं
रामं स्मरन्ती सदा
तस्यास्तत्र करोतु दर्शनशुभं
संशोभिते शाखिभिः ॥
राक्षस्यः परुषाः सदैव
जननीं तां भाययन्त्यप्रियाः
सीतां दारुणकल्मषस्थहृदयाः
नैकप्रकारेण हा !

तिष्ठन्ति क्षणदाचराः प्रहरिणो
नक्तन्दिवं शस्त्रिणो
भूत्वा यातु सुधी भवा-
नवहितो मातुः सकाशेऽधुना ॥

हनुमान् : श्रुत्वा मातृदशां नितान्त-
करुणायोग्यामहं साम्प्रतं
यातो दुःखमहद् भवान्
मम सखे चिन्तां न गच्छेन्मयि ।
प्रत्यूहेषु भवत्सु तेष्वपि
भयं नो मानसे मामके
श्रीरामस्य कृपाबलात् सपदि
तां द्रक्ष्याम्यहं मातरम् ॥

जवनिकापातः

चतुर्थं दृश्यम्

(अशोकतरोः शाखायाः एकस्याः पत्रैरात्मानमाच्छाद्य सन्तिष्ठमानो हनुमान्, अधस्ताच्च तस्यानोकहस्याश्रूणि मुञ्चन्ती विषण्णतायां निलीना सीता च दृश्यते ।)

हनुमान् : मातृदुःखमवलोक्य कठोरं
मानसं मम नितान्तविषण्णम् ।
विद्यते मयि बलं हि परन्तु
नास्ति योग्यसमयं परिवीक्षे ॥
मातरं जनकजामहमाप्त्वा
साम्प्रतं ह्यतितरां मुदितोऽस्मि ।
साधितं प्रभुवरस्य सुकार्यं
जीवनं भुवि भृशं मम धन्यम् ॥

मातृदर्शनसहं सुखमेमि
प्राप्य सम्प्रति च मामकचित्तम् ।
मन्यते जगति भाग्यमनोज्ञं
पुण्यशालि नितरां सुकृतीति ॥

(मन्दोदर्यादिमहिषीपरिवृतस्य रावणस्यागमनम्)

रावणः : जनकनन्दिनि, त्वं कस्मान्मत्तो बिभेषि ? त्वं मम प्राणेभ्योऽपि प्रियतरासि । मुधैव सुमुखि, कष्टानि सहसे! किं तेन वनवासिना तपस्विना प्रयोजनम् ? नास्ति तस्मिन् कापि शक्तिः । अन्यथा स त्वामाहर्तुमागच्छेत् मनुष्यास्तु दूरे सन्ति; सुरासुरनागकिन्नरादिकाः सर्वेऽपि मम नामैव श्रुत्वा वेपन्ते । त्रिकूटगिरिस्थलङ्का-दुर्भेद्यदुर्गे पतत्र्यपि कश्चित् प्रवेष्टुं न प्रभवति । रामस्तु शतयोजनव्यापिनमम्भोधिं तीर्त्वा केन विधिनात्रागन्तुं शक्नोति ? अस्ति स तु सर्वथैवासमर्थः । तस्मात् त्वं तत्र मोहं त्यज । त्वं भव मम । मन्दोदर्यादिमहिष्यस्तव सेविकां करिष्यामि । चेत् त्वं मम हितमयं वचो न श्रोष्यसि, खड्गेनाहं तव शिरश्छेत्स्यामि । त्वद्वपुषो मांसं गृध्रा वायसाश्चात्स्यन्ति । किं वा राक्षसात्वां भोक्ष्यन्ते ।

(तानि विषदिग्धशरसमकठोरवचांस्याकर्ण्यापि अभीता अविचलिता सीता तृणं मुखे निधाय नतशिरस्का भूत्वा ब्रूते)

सीता : अधमराक्षस ! त्वं मम शिरश्चन्द्रहासेन यदि छेत्तु-मिच्छसि तदा न तत्र विलम्बं कुरु । त्वद्दत्तयन्त्रणा-सहनाद् वरं मृत्युः । त्वं सारमेय, आत्मानं त्रिभुवन-

विजेतारं मन्यसे। त्वं मम जीवननाथेऽसति मामचूचुरः। अत्र स्वगेह असहायायाः नार्याः पुरो विकत्थसे। त्वं तावदेव प्रलपितुमर्हसि यावच्छ्रीराघवेन्द्रो न लङ्कामुपैति। त्वं प्रत्यासन्नानेहस्येव लङ्कामग्निना दग्धां प्रेक्षिष्यसे। सर्वांश्च निशाचरान् मम स्वामिनः शरैर्निहतानवलोकयिष्यसि। तच्छरेण हतो भूत्वा त्वमपि सत्वरमेव कीनाशनिकेतनातिथिर्भविष्यसि (सीतायाः कठोराणि वचनानि श्रुत्वा तां मारयितुं रावणो धावति परं मन्दोदरी तं धरति)

रावणः : सीते, अद्य तु त्वामहं मुञ्चामि। परं यद्येकमासाभ्यन्तरे मम वचनं न श्रोष्यसि, तदावश्यमेव त्वामहं हनिष्यामि। निशाचर्यः, यूयं सीतां मय्यनुकूलां कर्तुं यतध्वम्। यदि मासाभ्यन्तरे मम वशङ्गततामियं स्वीकरिष्यति, तदा मदीयस्य राज्यस्य शक्रदुर्लभानि सुखानि भोक्ष्यति, अन्यथैकत्रिंशत्तमेऽहनि मानवीमिमां हत्वा प्रातराशत्वेनात्स्यामि।

(रावणो गच्छति)

त्रिजटा : राक्षस्यः, सीतां प्रणमत। न तां यूयं भाययत। मया दृष्टोऽयं स्वप्नः—लङ्का दग्धा। रावणः सकुटुम्बस्तैलकुण्डे स्नाति। महिषे स्थित्वा स यमदिशां गच्छति। स्वप्नोऽयं शीघ्रमेव त्रिचतुर्दिवसाभ्यन्तरे सत्यतां गमिष्यति।

(त्रिजटायाः श्रुत्वा वचो राक्षस्यो भीता भवन्त्यः सीतां प्रणम्य गच्छन्ति)

सीता : त्रिजटे ! त्वमस्यामापदि मम सहायिका भव। नेयं विपत् सह्या।

त्रिजटा : न रुदिहि जानकि, भगवान् राम आश्वेवागत्य रावणं व्यापाद्य त्वां नेष्यति; न दूयस्व।

(त्रिजटा निष्क्रामति)

सीता : हा किं कुर्याम्, केन प्रकारेण स्वप्राणांस्त्यजेयम् ?

(सीतां दुःखितां दृष्ट्वा परमदुःख-चिन्ताकुलो भूत्वा हनुमान् विचार्य रामचरित्रं गातुमारभते; तच्चरित्रं श्रुत्वैव सीताया दुःखं दूरे भवति)

हनुमान् : **दशरथ इति नाम ख्यातसम्राट् जितारि-**
र्विदितमिहिरवंशे पावने योऽवतीर्णः।
सकलभुवनवंद्यस्तस्य राज्ञश्चतुर्षु
महिमगुणबलाढ्यो ज्येष्ठपुत्रोऽस्ति रामः॥
विमलहृदयरामो धीरपुत्रोऽधिगम्य
सपदि पितुरनुज्ञां दण्डकारण्यमागात्।
विपिनमनुगतस्तं लक्ष्मणश्चापि तस्य
शुचिनतलघुबन्धुः शीलसौजन्यसिंधोः॥
व्यधित वसतिमीड्यस्तत्र कश्चिज्जहार
नृपतिजनकपुत्रीं जानकीं तस्य कान्ताम्।
परमशुचमुपेतो मार्गयंस्तां तदानीं
बहुभयविपिनेऽसावृष्यमूकं प्रपेदे॥
स विपुलबलभीमं बालिनं तत्र हत्वा
झटिति नृपमकार्षीन्नाम सुग्रीववीरम्।
विहितमधुरसख्यं धर्ममार्गस्थसौम्यं
सचिवमिममसौ स्वं प्राहिणोत् वीक्षितुं त्वाम्॥

बहुवनगिरिदुर्गान् मार्गयन् मित्रवर्यैः
सह चिरसमयान्ते नैजमित्राणि तानि।
जलनिधितटभागेऽहं परित्यज्य चाब्धि-
मिह जननि समुल्लङ्घ्यागतो हेमलङ्काम् ॥

सीता : (मनसि) किमिदं सर्वं सत्यम् ? स्वप्नं वा पश्यामि ? परं नाहं निद्रायामस्मि। अतः स्वप्नोऽपि न। अहं स्फुटतया शृणोमि वचांस्यतो भ्रमोऽपि न। (प्रकाशम्) यो महाभागो मम जीवननाथस्यामृतोपमं श्रावयति वृत्तं सः प्रकटीभूय मम पुरः कथं नागच्छति ?

हनुमान् : (समीपे उपेत्य, मातृसीतायाश्चरणयोः प्रणमति) मातः, नो कस्माच्चिद् भयादाशङ्किता भूत्वा रुदिहि। अहं करुणामयस्य भगवतो रामस्य चरणयोः शपथं गृह्णन् वदामि, अहं प्रभो रामस्य दासो राज्ञः सुग्रीवस्य च महासचिवः, केसरिणश्च पुत्रोऽस्मि हनुमान्। तत्प्रेषितोऽहं भवती क्वेत्येतद्ज्ञातुमेव सर्वतोऽन्विष्यन् भवतीमिहागतोऽस्मि। एतद्धि अभिज्ञानमङ्गुलीयकं भगवता भवत्यै प्रेषितमस्ति।

सीता : (अङ्गुलीयकं रामनामाङ्कितं प्रेक्ष्य मुदमनुभवन्ती नयनाभ्याञ्च प्रेमाश्रूणि मुञ्चन्ती) हनुमन्, त्वया मम प्राणाः उद्धृताः। त्वं शोकसागरे मज्जन्त्याः मम कृते उत्तरणप्लवः सञ्जातः। वत्स, वद कदापि प्रभुर्लक्ष्मणश्च देवरो मां स्मरतः। प्रभुः परमदयालुरस्ति, स मां कथं विस्मरति। वस्तुतस्तद्दर्शनहेतोः प्राणाः मम शरीरान्न निसृताः। वत्स, कदा सः सबन्धुरागम्य मामस्याः विपद उद्धरिष्यति ? वत्स, त्वं मत्प्राण-

वल्लभस्यानन्यो भक्तः। मम स्वामी निश्चप्रचतया त्वयि विश्वसिति; अत एव तु स मम सविधे त्वां प्रेषितवान्। हनुमन्, त्वया ममापद्वीक्षितास्ति। एतासां क्रूरतमानां राक्षसीनां मध्ये केन प्रकारेण जीवेयम्? मासव्यापिन्यामवध्यां समाप्तायां सत्वरं दुष्टो निशाचरेशो मां हनिष्यति। चेत् प्रभुर्मां जीवन्तीं दिदृक्षति तदा मासाभ्यन्तरेणागम्य राक्षसकुलं संहरेत्। वत्स, त्वं नाथं निवेदय यत् सः सद्यः आगत्य असुरान् निहत्य मामितो नयेत्। वत्स, अपि किं प्रभुर्मां स्मरति कदापि?

हनुमान् : (सविनयम्)

मातः कथन्नु रघुनन्दनतापवह्नि
जातं त्वदीयविरहादभिवर्णयेयम्।
दुःखं तदीयहृदयं नितरामसह्यं
धत्तेऽधिकं त्वयि तदस्ति सदैव लग्नम्॥

त्वामेव सः स्वहृदये सततं निधत्ते
चिन्तावशात् तव न याति कदापि निद्राम्।
त्वं जानकी क्व लपतीत्यसकृन्ममो मे
नो त्वां विनेति लभते न शमं स वक्ति॥

ब्रूते स म्राद्रनयनो नितरां विषण्णः
त्वामन्तरेण जगतः सकलाः पदार्थाः।
दुःखप्रदा मम कृते हृदयस्य पीडां
शंसामि कम्प्रति हि भामिनि तामसह्याम्॥

तस्याम्ब सम्प्रति शृणु त्वमिमां गिरां यत्
प्रेम्णोऽवयाति हृदयं मम तेऽपि तत्त्वम्।

तन्मानसं वसति ते निकटे सदैव
विद्धि प्रिये त्वमियता वचसा रसं मे ॥
(बभूवतुस्तन्नयनेऽश्रुवर्षिणी
तदीय चित्तं नितराञ्च विह्वलम् ।
प्रियस्य संदेशमिमं प्रियं प्रभोः
निशम्य जाता च तदा भृशाकुला ॥)

सीता : कुरुष्व यत्नं मम वत्स तं द्रुतं
व्यथार्णवं येन तरेयमीदृशम् ।
प्रभुः समागम्य नयेदितो हि मां
न चास्ति सह्यो विरहस्तु तस्य मे ॥

हनुमान् : मातः, मा स्म तावत् सम्प्रति चिन्तां कार्षीत् । धैर्यवती भवतु भवती । भवतीहास्त इति ज्ञात्वा यदैवावगमिष्यति विना कमपि विलम्बं सर्वसमर्थो दयाधाम भगवान् रामः सत्वरमागम्य राक्षसान् हत्वा रावणञ्च विजित्य त्वामेतस्मात् स्थानान्नेष्यति ।

सीता : भूयाः सुत त्व ममराजरकीर्तिरम्यः
नाथः क्रियात् त्वयि कृपां भगवान् कृपालुः ।
हे वत्स वीर हनुमन्नवलोक्य धीरं
त्वां रामभक्तमहमेमि मुदं नितान्तम् ॥

(मातुराशिषमाकर्ण्य हनुमान् पुनः पुनः सीतायाश्चरणयोः प्रणमति)

हनुमान् : जातोऽस्मि लब्धमहिमानुपमो भवत्याः
धन्यश्च मान्यसुकृतीह शुभाशिषाहम् ।
जातञ्च जीवनमिदं सफलं मदीयम्
आशीरमोघविदिता जननि प्रशस्ता ॥

मातः क्षुधा मां नितरामिदानीं
संबाधते चेन्मनसा भवत्याः ।
आज्ञा भवेत् पक्वफलान्यदानि
स्वादूनि दृष्ट्वा मधुराणि तानि ॥

सीता : वत्स, त्वं फलानि भुक्त्वा तृप्तो भवेति काङ्क्षाम्यहं परमत्र वलवन्तः शस्त्रपाणयः प्रहरिणो रक्षन्ति उपवनमिदम् ।

हनुमान् : मातश्चेद् भवती मुदादिशति मां तदा, नाहमेतेभ्योऽसुरप्रहरिभ्योऽल्पमपि विभेमि । तच्चिन्ता नाल्पीयस्यपि मयि ।

सीता : वत्स, रघुनन्दनं स्मरन् यदृच्छया फलानि भुङ्क्ष्व ।

(पटक्षेपः)

●

षष्टोऽङ्कः

प्रथमं दृश्यम्

(रावणस्य राजसभा, सिंहासनमध्यास्ते लङ्केश्वरो रावणः; उद्यानराक्षसाः हनुमत्कृतविनाशलीलां रावणस्य सेवायां निवेदयितुमागताः)

अन्यतमो रक्षको राक्षसः : प्रभो ! अलौकिकं सत्त्वमजेयां च शक्तिं बिभ्राणः कश्चिद् विशङ्कटविग्रहो वीरोऽशोकवनं प्रविष्य तत्रत्याननेकवृक्षान्व्यध्वंसयत्; एतावदेव न, स दुस्साहसी अस्मन्मणिनिर्मितचैत्य प्रासादमप्यभनक् । अनेकांश्चास्माकमुद्यानरक्षकान्

राक्षसानवधीत्। सोऽधुना तत्रैव निश्चिन्तो निर्भयश्च भूत्वा सन्तिष्ठते। प्रहरिष्वस्मासु त्रिचतुरा एव वयं येन केन प्रकारेण स्वासून् रक्षन्त इहागन्तुं क्षमाः सञ्जाताः।

रावणः : (क्रुद्ध्यन्) तं धर्तुं प्रहरणवती विशालवाहिनी गच्छेत्।

(पटक्षेपः)

द्वितीयं दृश्यम्

(रावणसभा, रावणो रत्नोद्दीप्तहैमासनमध्यास्ते; तत्पुरस्तस्य मन्त्रिणश्च केचन उपविशन्ति)

वीरः : स्वामिन्, जम्बुमालि-विरूपाक्ष-यूपाक्ष-दुर्भर-प्रघस-भासकर्णाः, कुमारोऽक्षश्च निहतास्तेन दुस्साहसिना। अस्ति सः प्रलयकारिवलभृत् कश्चिददृष्टपूर्वो हि प्राणी।

रावणः : (दुःखी भूत्वा) वत्स मेघनाद, त्वं याहि, तं दुष्टं दुस्साहसिनं जीवन्तमेव धर; न च तं जहि।

मेघनादः : वरम्, यथा भवान् आज्ञापयति। इदानीमेव तं धृत्वा जीवन्तमेव तं भवतः पुर उपस्थापयिष्यामि।

(पटक्षेपः)

तृतीयं दृश्यम्

रावणसभा

मेघनादः : असाधारणोऽयं वनमानुषोऽस्मदीयाननेकवीरान् निजघान। ब्रह्मास्त्रं प्रयुज्य मयायं येन केनापि प्रकारेण वशीकृतः। इदानीं मन्त्रिणां परामर्शमादाय कठोरेण दण्डेन दण्डनीयोऽयमुद्धतः।

रावणः : (रोषानलदग्धो भवन्) प्रहस्त ! पृच्छतु भवानिमं कुत आगतः ? किमागमनप्रयोजनम् ? अशोकोपवनं कथमुत्सादितम् ? युद्धवीरान्, मम पुत्रम् अक्षकुमारञ्च कस्मात् कारणादवधीदयम् ।

प्रहस्तः : कोऽसि त्वम् ? नोद्विग्नो भव । न च विभिहि । कुत आगतः ? केन प्रेषितस्त्वम् ? चेत् त्वं सत्यं वदिष्यसि यास्यसि न क्षतिम् । अहं त्वां मोक्षयिष्यामि ।

हनुमान् : लङ्काधिपते ! यो दशरथकुमारो रामो भगवतः शङ्करस्य धनुर्मृणालमिव वभञ्ज, यो हि खरदूषणौ, त्रिशिरसञ्ज चतुर्दशसहस्रसंख्यकांश्च क्षपाचरान् व्यापादयामास, यो वालिनमपि एकेनैव वाणेन यमलोकं प्रापयामास, तं रामं त्वं न वेत्सि ? त्वं तस्यैव पत्नीं सीतां चौर इव चोरयित्वा नीतवान् । त्वं सम्यग् विचारय च स्वकीयेऽस्मिन् गर्हणीये कार्ये । अहं तस्यैव रामस्य दूतोस्मि । परमप्रतापभाजः पवनदेवस्यास्म्यहं पोतः किष्किन्धापतिना सुग्रीवेण सीतामातुर्मार्गणाय सहस्रशो वीराश्चतसृष्वप्याशासु प्रेषिताः सन्ति । तत्प्रेषित एवाहं सहस्रयोजनसागरमुत्तीर्यागतोऽस्मि । मयात्र माता सीता दृष्टास्ति । त्वं भगवतीं सीतां लङ्कायाः कृते कालरात्रिमेवावगच्छ । सीतां द्रष्टुं यदाहमशोकोपवनं गत आसम्; क्षुधा मामबाधत, अतस्तत्र मया फलानि भुक्तानि । परं तव सैनिकाः प्रहरिणो मां प्रताडयितुं प्रचक्रमिरे । कस्य न स्वशरीरं प्रियम् ? ते मां यदा प्रहर्तुमारेभिरे तदाहमपि तान् प्राहरम् । तन्मारणार्थं मया वृक्षाः शस्त्रीकृताः ।

अतस्ते उत्सादिताः । आगस्तु तव सुतस्यास्ति; तत् त्वं प्रत्यक्षमेव पश्यसि । चेदिच्छसि त्वं स्वकल्याणं, रामं शरणं व्रज । सीतां नतमौलिर्भवन् रामाय, क्षमां याचमानः समर्पय ।

जन्मास्ति ते विधिकुले परमप्रकृष्टे
पौलस्त्यसूनुरसि वेदवुधोऽसि धीमन् ।
देहेन्द्रियादिषु न चासि हि रावण त्वं
किं त्वां वदेयमिह कोविद निर्विकारम् ॥

धीमन् विचार्य नरजन्म पवित्रलक्ष्यं
तद्योजय त्वमधुना शुभकार्यहेतोः ।
नार्याः परस्य हरणं भृशनिन्दनीयं
तस्माद् विरम्य धिषणां हि हरौ निधेहि ॥

भक्तिर्हरावतितरां हृदयं प्रमार्ष्टि
शुद्धा मतिर्भवति कारणमात्मबोधे ।
ज्ञानात् ततोऽनुभवमेति सदात्मतत्त्वं
तस्मिन् दृढे सति हि जीव उपैति मुक्तिम् ॥

हित्वारिभावमयि रावण मान्द्यमेतत्
सेवस्व पूरुषपरं जगदीश्वरं त्वम् ।
सीतां पुरश्च सह बन्धुकलत्रपुत्रैः
कृत्वा प्रयाहि शरणं प्रभुरामचन्द्रम् ॥

रामः कृपालुहृदयो विमलस्वभाव-
स्त्वां क्षंस्यते मम वचः शृणु चेतसा त्वम् ।
लङ्कापते मयि च विश्वसिहि त्वमद्य
राज्यं कुरुष्व गतसाध्वस इत्थमृद्धम् ॥

एवं भवेदिह परत्र च जीवनं ते
कल्याणधाम सफलञ्च यशोऽवदातम् ।
कार्यं कुरु स्वपरमोच्चकुलानुरूपं
त्वं साम्प्रतं श्रुतिविदां वर शौर्यसिन्धो ॥

रावणः : (क्रुद्धो भूत्वा) शठ ! मम पुरस्त्वमनर्गलं प्रलपितुं साहसं कुरुषे। वनवासिनि तापसे रामे किञ्च कपिसुग्रीवे का शक्तिर्मम प्रत्यर्थितां कर्तुम् ? प्रथमं त्वामत्रैव हनिष्यामि ततः सीतां व्यापाद्य, तव रामं सलक्ष्मणं, सुग्रीवं तदीयां सकलाञ्च सेनां यमलोकं प्रापयिष्यामि ।

हनुमान् : पामरराक्षसराज ! मृत्युस्तव मूर्धनि नृत्यति । अत एव त्वमनर्गलं जल्पसि । अहमस्मि भगवतो रामस्य सेवकः । मम पराक्रमस्य तु त्वं मनसि कल्पनामपि कर्तुं न क्षमः ।

रावणः : (सक्रोधमुच्चैः स्वरेण) राक्षसाः, दुष्टमिममिदानीमेव व्यापादयत ।

(विभीषणस्य आगमनम्)

विभीषणः : राक्षसाधिपते, ममात्र सविनयं निवेदनम् । धर्मस्य व्याख्याने, लोकाचरणस्य रक्षणे, शास्त्रीयसिद्धान्तानामवगमने भवानिव नान्यः कश्चित् । मन्युं विहाय विचारयतु क्षणं भवान् । दूता न भवन्ति वध्याः । भवतु सः कीदृगपि । भवति सोऽरातिप्रेषितः । अतः सः स्वस्वामिहितमेवोद्दिश्य वक्ति । भवति सः परवान् । न स भवत्यतो वधार्हः । तं दण्डयितुं कश्चिद् अन्यो दण्डो विचारणीयः ।

रावणः : विभीषण, सत्यं युक्तञ्च तव कथनं दूतोऽवध्य इति। असुरास्तिरस्कुर्वन्त इमं लङ्कायाः मार्गेषु, वीथीषु चत्वरेषु च क्रामयन्तु। ततश्च विधाय लाङ्गूलवन्तं दीपयन्तुलाङ्गूल मग्निना। कुरूपतामित्थं गमितोऽयं स्वामिनं स्वकीयमिहानेष्यति।

(पटक्षेपः)

चतुर्थं दृश्यम्

(अवस्तारे)

हा दग्धाः अग्निना; दग्धगृह-सर्वस्वा वयम् अनाथा इव जाताः। सर्वापि लङ्का दग्धा। अस्मदीयाः पुत्र-कलत्रादिकाः कुटुम्बिनश्चाधुना दीना भूत्वा आर्तनादं विदधतः क्रन्दन्ति, रुदन्ति च। अनेन दशवक्त्रेण तु वयं विनाशिताः। सीतां हृत्वा त्वनेन स्वयमेय स्वमृत्यु-राहूतः। विभीषणस्य भवनं विहाय लङ्काया वासिनां गेहा अग्निना भस्मीकृताः। पश्यत, पश्यत; लङ्कां दग्ध्वा सम्प्रति सोऽशोकोद्यानदिशं गच्छन् दृश्यते।

(जवनिकायाः उन्मीलनम् अशोकवाटिकायां सीता हनुमांश्च दृश्येते)

सीता : वत्स ! त्वामिदानीं सम्प्रेक्ष्य मम मनः प्रकृत्यां स्थित-मभूत्। लङ्कादहनानेहसि भृशमहं चिन्तां गता आसम्। त्वदीयमङ्गं तु नाग्निनादह्यत ?

हनुमान् : मातः, भवदीये परमपावनेऽभयदे करकमले सति मद्रक्षके, क ईदृक् त्रिष्वपि लोकेषु यो मम रोमाप्येकं स्प्रष्टुं शक्नुयात् ? भवत्कृपया ममागमनप्रयोजनं पूर्तिं

सफलताञ्च प्रापद्यत । भवच्चरणारविन्ददर्शन-सौभाग्यमहमविन्दम् । धन्योऽहम् । साम्प्रतं भवती मामनुजानातु । येन प्रभोश्चरणकमलयोः शीघ्रमेव भवत्कुशलं सन्देशञ्च भवदीयं श्रावयेयम् । सर्वसमर्थो भगवान् द्रागेव लङ्कामागम्य राक्षसान् सरावणान् संहरिष्यति ।

सीता : (अश्रूणि मुञ्चन्ती) वत्स, तवागमनान्मम मनः शान्तिमलभत ; मयाऽऽलम्बो लब्धः । सम्प्रति त्वमपि यासि । त्वयि गते पुनस्तदेव दुःखं, तदेव शोकप्रदं दिनं, सैव विपद्घनघटाच्छन्ना निशा । भृशश्रान्तोऽसि त्वम्; दिनमेकं विश्रम्य श्वः प्रयाहि ।

हनुमान् : मातः ! प्रभुकार्यं यावन्न सम्पन्नतां गच्छेत् तावन् मम कृते क्व विश्रामः ? भवत्याः शुभाशीर्मयि वर्तते । येन वेगेनाहमिहागतस्तेनैव रंहसा समुद्रमुल्लङ्घ्य यास्यामि । तत्र मम सहचरा मां प्रवरेण औत्सुक्येन प्रतीक्षन्ते । भवदीयं शुभमुदन्तं श्रुत्वा सर्वे प्राणान् प्राप्स्यन्ति ।

सीता : वत्स हनुमन् ! प्रिय वत्सं लक्ष्मणं ब्रूहि स ममापराधं क्षमेत निवेदय च प्रभुं शीघ्रमेवागमनकृपां कुर्यान्नाथः । (रोदिति)

हनुमान् : मातः ! मा स्म धैर्य्यं त्याक्षीद् भवती । प्रभुर्नितरां सत्वरमागम्य राक्षसान् सर्वान् संहृत्य त्वां नेष्यति । समाश्वसितु भवती प्रभोर्महिमानं संस्मृत्य सान्त्वनां प्राप्नोतु । मातः ! प्रभुः यथाभिज्ञानाङ्गुलीयकं प्रददौ तथैव भवत्यपि कृपया किमप्यभिज्ञानस्वरूप वस्तु प्रददातु ।

सीता : अयमस्ति चूडामणिर्वत्स, किं वदेयम्? सर्वमपि कष्टं त्वयात्र मम विलोकितम्। प्रभोर्दशनायैव मम प्राणाः शरीरे सन्तिष्ठन्ते। भगवतश्चरणयोर्मम प्रणामाञ्जलिं समर्प्य निवेदय तथा, यथा त्वरयैव प्रभुरागन्तुं कृपां कुर्वीत।

वत्स, भगवन्तं स्मरन् गच्छ। स्वस्त्यस्तु ते।

(हनुमान् मातृसीतायाश्चरणयोः पुनः पुनः प्रणमति)

(पटक्षेपः)

पञ्चमं दृश्यम्

(विचित्रकाननश्रीसुशोभित-प्रस्रवणपर्वत शिखरशिलासीनौ रामलक्ष्मणौ; तयोश्च पुरः सुग्रीवाङ्गदादिका उपविशन्ति)

हनुमान् : (श्रीरामलक्ष्मणसुग्रीवाणामग्रे मौलिं सविनयं प्रणतीकृत्य)

हे नाथ यस्य भवतः कृपया समुद्र-
मुल्लंघ्य तां परमदुर्गमदुर्गलङ्काम्।
आलोड्य दर्शनमविन्दमहं हि सीता—
मातुर्नमामि तमहं हनुमान् भवन्तम्॥

प्राप्ता पुण्यवशान्मया जनकजा लङ्कानगर्यां प्रभो
मातुर्दर्शनपावनेन सफलं जातं जनुर्मामकम्।
जाता सा विरहेण तत्रभवतः क्षीणा मनोदुःखिता
रात्रौ किञ्च दिवा सदैव जननी मे व्याकुला रोदिति॥

हत्वा चाखिल राक्षसान् दशमुखं लङ्कापतिं रावणम्
अत्यन्तासहनीयकष्टपतिता सा शीघ्र मानीयताम्।
प्राप्ता स्यान्नहि जीविता रघुपते जाते विलम्बे प्रभो
मासाभ्यन्तर एव राक्षसपतिः प्राणांस्तदीयान् हरेत्॥

सफलताञ्च प्रापद्यत । भवच्चरणारविन्ददर्शन-सौभाग्यमहमविन्दम् । धन्योऽहम् । साम्प्रतं भवती मामनुजानातु । येन प्रभोश्चरणकमलयोः शीघ्रमेव भवत्कुशलं सन्देशञ्च भवदीयं श्रावयेयम् । सर्वसमर्थो भगवान् द्रागेव लङ्कामागम्य राक्षसान् सरावणान् संहरिष्यति ।

सीता : (अश्रूणि मुञ्चन्ती) वत्स, तवागमनान्मम मनः शान्ति-मलभत ; मयाऽऽलम्बो लब्धः । सम्प्रति त्वमपि यासि । त्वयि गते पुनस्तदेव दुःखं, तदेव शोकप्रदं दिनं, सैव विपद्घनघटाच्छन्ना निशा । भृशश्रान्तोऽसि त्वम्; दिनमेकं विश्रम्य श्वः प्रयाहि ।

हनुमान् : मातः ! प्रभुकार्यं यावन्न सम्पन्नतां गच्छेत् तावन् मम कृते क्व विश्रामः ? भवत्याः शुभाशीर्मयि वर्तते । येन वेगेनाहमिहागतस्तेनैव रंहसा समुद्रमुल्लङ्घ्य यास्यामि । तत्र मम सहचरा मां प्रवरेण औत्सुक्येन प्रतीक्षन्ते । भवदीयं शुभमुदन्तं श्रुत्वा सर्वे प्राणान् प्राप्स्यन्ति ।

सीता : वत्स हनुमन् ! प्रिय वत्सं लक्ष्मणं ब्रूहि स ममापराधं क्षमेत निवेदय च प्रभुं शीघ्रमेवागमनकृपां कुर्यान्नाथः । (रोदिति)

हनुमान् : मातः ! मा स्म धैर्य्यं त्याक्षीद् भवती । प्रभुर्नितरां सत्वरमागम्य राक्षसान् सर्वान् संहृत्य त्वां नेष्यति । समाश्वसितु भवती प्रभोर्महिमानं संस्मृत्य सान्त्वनां प्राप्नोतु । मातः ! प्रभुः यथाभिज्ञानाङ्गुलीयकं प्रददौ तथैव भवत्यपि कृपया किमप्यभिज्ञानस्वरूप वस्तु प्रददातु ।

सीता : अयमस्ति चूडामणिर्वत्स, किं वदेयम् ? सर्वमपि कष्टं त्वयात्र मम विलोकितम् । प्रभोर्दर्शनायैव मम प्राणाः शरीरे सन्तिष्ठन्ते । भगवतश्चरणयोर्मम प्रणामाञ्जलिं समर्प्य निवेदय तथा, यथा त्वरयैव प्रभुरागन्तुं कृपां कुर्वीत ।

वत्स, भगवन्तं स्मरन् गच्छ । स्वस्त्यस्तु ते ।

(हनुमान् मातृसीतायाश्चरणयोः पुनः पुनः प्रणमति)

(पटक्षेपः)

पञ्चमं दृश्यम्

(विचित्रकाननश्रीसुशोभित-प्रस्रवणपर्वत शिखरशिलासीनौ रामलक्ष्मणौ; तयोश्च पुरः सुग्रीवाङ्गदादिका उपविशन्ति)

हनुमान् : (श्रीरामलक्ष्मणसुग्रीवाणामग्रे मौलिं सविनयं प्रणतीकृत्य)

हे नाथ यस्य भवतः कृपया समुद्र-
मुल्लंघ्य तां परमदुर्गमदुर्गलङ्काम् ।
आलोड्य दर्शनमविन्दमहं हि सीता—
मातुर्नमामि तमहं हनुमान् भवन्तम् ॥

प्राप्ता पुण्यवशान्मया जनकजा लङ्कानगर्यां प्रभो
मातुर्दर्शनपावनेन सफलं जातं जनुर्मामकम् ।
जाता सा विरहेण तत्रभवतः क्षीणा मनोदुःखिता
रात्रौ किञ्च दिवा सदैव जननी मे व्याकुला रोदिति ॥

हत्वा चाखिल राक्षसान् दशमुखं लङ्कापतिं रावणम्
अत्यन्तासहनीयकष्टपतिता सा शीघ्र मानीयताम् ।
प्राप्ता स्यान्नहि जीविता रघुपते जाते विलम्बे प्रभो
मासाभ्यन्तर एव राक्षसपतिः प्राणांस्तदीयान् हरेत् ॥

मां प्रेक्ष्यागमनोद्यतं च भवते चूडामणिं सा ददौ
ऊचे नाथ पुनः पुनः सविनयं चेन्नो भवान् सत्वरम्।
मां त्रातुं तु सलक्ष्मणो हि करुणासिन्धो समायास्यति
जीवन्तीं न तु लप्स्यते मयि कृता कस्मात् प्रभो
विस्मृतिः ॥

रामः : राजन्! साम्प्रतं विलम्बो नापेक्ष्यते। सेनामादिशतु भवान् लङ्कां प्रस्थातुम्।

सुग्रीवः : यत् प्रभुरादिशति तदविलम्बेनैवानुष्ठीयते। सेनान्यः, भवन्तः स्वां स्वां सेनामादिशन्तु। सा सर्वविधशस्त्रास्त्रैर्युक्ता भूत्वा प्रस्थातुं सन्नद्धा स्यात्।

(पटक्षेपः)

●

सप्तमोऽङ्कः

प्रथमं दृश्यम्

(रावणस्य सभा तत्र विभीषणोऽन्ये च मन्त्रिण उपविशन्ति)

रावणः : मन्त्रिणः! अत्रागम्य हनुमाननेकोपद्रवान् कर्तुं शशाक सीतां च स दृष्टवान्। सर्वैव लङ्का तेनाविला कृता। श्रुतमिदं यत् तापसो विशालां सेनामादाय सागरपारमागतोऽस्ति। इदानीं यदुचितं युक्तञ्च तद् ब्रुवन्तु भवन्तः।

मनस्विनो मन्त्रमूलं विजयं वदन्ति, अतो भवन्मन्त्रं जिघृक्षुरस्मि ।

शास्त्रं विमृश्य सुतरां हृदयेन यत्र
मन्त्रे प्रयान्ति सचिवाः शुभमैकमत्यम् ।
मन्त्रः स एव भणितो बुधमण्डलेन
श्रेष्ठोऽत एव सुधियोऽद्य वदन्तु वै माम् ॥

सेना तटे जलनिधेः समुपस्थितास्ति
सा क्षिप्रमेव महती रिपुतापसस्य ।
सिन्धुं तरिष्यति सुखेन न संशयोऽत्र
जन्यं शिरःस्थितमतः सचिवा विदन्तु ॥

मन्त्रिणः : जिताः समग्राः सुरनागदानवाः
स कस्त्रिलोक्यां भवता न यो जितः ।
नरे जयः साध्यतरो हि वर्तते
भवान् न चिन्तामिह यातु साम्प्रतम् ॥

निकुम्भसुप्तघ्नमहाबलादिकाः
सहस्रशो घस्मरशौर्यदारुणाः ।
प्रचण्डवीर्याः अरिगर्वनाशकाः
जगत्प्रसिद्धाः कुशला रणाजिरे ॥

न मेघनादो जगतीव शौर्यवान्
इहास्ति शूरो रणदारुणो महान् ।
न कुम्भकर्णेन समोऽत्र कोऽपि च
ह्यतोऽद्वितीया भुवि सर्वथा वयम् ॥

विभीषणः : लङ्कापते बलनिधे मम बन्धुवर्य्य
श्रेयोऽस्तु तत्रभवतो विनयेन वच्मि ।

रामोऽस्त्यजेयबलसागरविश्वनेता
सीता तदीयदयिता कृपया प्रदेया ॥
यावत् पुरीं न महती हरिवाहिनीमा-
माक्रम्य घोरपरुषा तरसा रुणद्धि ।
रामो न यावदिषुभिः कुरुते प्रहारं
तावद् भवान् जनकजां प्रददातु तस्मै ॥
शम्भोर्मृणालमिव तेन धनुर्विभग्नं
बाली हतश्च निहताः खरदूषणाद्याः ।
रामोऽस्ति भानुसदृशोऽनुपमः प्रतापे
बन्धो भवान् झटिति यच्छतु तस्य भार्याम् ॥

रावणः : सीतां न दास्यामि कदाप्यबुद्धे
राज्यस्य चात्रैव सुखानि यासि ।
तं तापसं मन्द विकत्थसे त्वं,
तत्रैव गच्छ त्वमितोऽधुनैव ॥

(रावणः पादेन विभीषणं प्रहरति)

विभीषणः : पितेव बन्धो मम मान्य एव
कृतः प्रहारो भवताङ्घ्रिणा चेत् ।
न चास्त्ययुक्तं सुकृतं हि तन्मे
परन्तु सीतार्पणमेव भद्रम् ॥

प्रयामि रामं शरणं कृपालुं
तमीचरेन्द्राहमितस्त्विदानीम् ।
निवेदये सादरमेतदेव
शुभं न सीतार्पणमन्तरेण ॥

(पटक्षेपः)

द्वितीयं दृश्यम्

(रामो, लक्ष्मणो, हनुमान्, सुग्रीवोऽङ्गदादिकाश्चोपविशन्ति)

सुग्रीवः : प्रभो ! लङ्केशस्य रावणस्यानुजो विभीषणो भवन्तं शरणं प्रपन्नोऽस्ति । आज्ञा चेद् भवेत् स भवतः सेवायामुपस्थाप्येत ।

रामः : **शृणोतु सुग्रीव मम स्वभावं**
जनो य आयाति भयार्तचेताः ।
त्यजामि तं नो शरणप्रपन्न-
मसून् समर्प्यापि स मेऽस्ति रक्ष्यः ॥

(सुग्रीवहनुमदादीनां विभीषणं सादरमाहर्तुं गमनम्; द्वित्रिक्षणानन्तरं तैः सह विभीषणस्यागमनम्)

सुग्रीव : **विभीषणो रावण-बन्धुरेषः**
भवन्तमीड्यं नतमस्तकः सन् ।
नमस्करोति प्रभुलोकपूज्यं
सबन्धुसौमित्रिकृपालुचित्तम् ॥

विभीषणः : **विभीषणोऽयं भवतोऽङ्घ्रिपद्मं**
नतो भवन् नौत्यनुगेषु चेमम् ।
कुले वसन्तं रचनीचराणां
प्रभोऽधुना स्वीकुरुतां दयालो ॥
उदारभावं शरणागतेषु
निशम्य वात्सल्यमयञ्च चित्तम् ।
समागतोऽयं शरणं भवन्तं
करोतु दासेऽत्र कृपां स्वकीयाम् ॥

रामः : **छलादिशून्यं सरलं विनीतं**
लङ्केश्वर त्वामवलोक्य चेतः ।
प्रसन्नतां याति जनो यदैव
मदुन्मुखो याति भृशं मदीयम् ॥
न साम्प्रतं त्वद्धृदयेऽस्ति काङ्क्षा
परन्तु मद्दर्शनमस्त्यमोघम् ।
जलं हनूमन् जलधेरिदानीं
द्रुतं भवानानयतु प्रधीन्द्रः ॥

हनुमतः सागरोदकमाहर्तुं गमनम्, ततश्च तस्य समुद्रजलमाहृत्यागमनम्; रामो विभीषणमभिषिञ्चति सहर्षम् सर्वे 'जयतु जयतु नाथ' इति वदन्तो हर्षं प्रकटीकुर्वन्ति)

रामः : हनुमन् ! साम्प्रतमहं भगवन्तं शङ्करं पूजयितु मिच्छाम्यतस्तदर्थमायोजयतु भवान् युक्ततमायोजनम् ।

हनुमान् : यत् प्रभुराज्ञापयति ।

(पटक्षेपः)

तृतीयं दृश्यम्

(भगवतः शङ्करस्याखिलकल्मषहारिणी हृदयहारिणी भव्या प्रतिमा विराजते; रामो गङ्गादिसहितसमुद्रजलचन्दनपुष्पनैवेद्यादिना पूजयति भगवन्तमुमावल्लभम्। सर्वे 'जयतु जयतु वृषभध्वज इत्युच्चैर्वदन्तो घण्टाशब्दं कुर्वाणाः शङ्खञ्च धमन्ति सहर्षं; स्तुवन्ति भगवन्तं शम्भुञ्च सर्वे—

जटाकुञ्जे गङ्गा विहरति मुदा यस्य च शशी
भृशं भाले भाति त्रिभुवनपतेर्व्यालनिवहः ।

नितान्तं ग्रीवायां विलसति तनौ चर्म करिण-
श्चकास्त्युद्दीप्तं सज्जयतु स उमावल्लभशिवः ॥
जगत् त्वामाश्रित्याखिलमपि च लब्ध्वा ह्यभिमतं
शुभं यात्युत्थानं भवति सुखितं जीवनपथे ।
हितं सर्वेषां त्वं समुदमनिशं नाथ कुरुषे
नमामः शम्भो त्वां प्रणतनिटिलाः मञ्जुलमृजुम् ॥

ददासि त्वं ज्ञानं परमसुखदं येन मनुजो
जनुर्लक्ष्यं ज्ञात्वा सपदि मनसा तत्र यतते ।
घृणां कृत्वा पापे निखिल जगतो वैभवमपि
परित्यज्य प्रीत्या त्वयि निजमनो योजयति सः ॥

त्वमेवासौ शम्भो सकलजगतीं योऽवति सदा
त्वमेवेमां सृष्टिं रचयति शिव प्राणिशरणम् ।
निलीनः संसारस्त्वयि भवति चान्ते भवपते
नमामस्त्वां रामेश्वरमतितरां शङ्कर वयम् ॥

विपत्सु त्वां शम्भो स्मरति जगतीवर्तिमनुजो
विलोक्य त्वं दीनं चरणपतितं तं मृदुमनाः ।
दयार्द्रस्वान्तः सन् सपदि निखिलागांसि भगवन्
प्रभो तस्य क्षान्त्वा भवजलधितश्चोद्धरसि तम् ॥

(पटक्षपः)

चतुर्थं दृश्यम्

(नेपथ्ये)

समुद्रं तरीतुं सेतोर्बन्धः संवृत्तः। सेनान्य आदि-
श्यन्ते यत् ते स्वां स्वां वरूथिनीं यथाक्रमं सेतुद्वारेण

समुद्रस्य परं पारं प्रयातुमाज्ञापयन्तु । परपारेऽनीकिनी स्वस्वस्कन्धावारे किञ्चिद् विश्रम्य, आह्निकेभ्यः कार्येभ्यः कृत्स्नतया निवृत्ता भवेत् । वाहिन्यो नायकाश्च नायकाधिराजस्यादेशमवाप्य स्वां स्वां चमूं लङ्का दुर्गं रोद्धुं सन्नद्धां तत्काल एव कुर्युः । दुर्गस्य समन्तान्निरोधस्तेनैव विधिना कृतो भवेद् यथा निर्देशपत्रं निर्दिशति । निर्देशपत्रे निर्दिष्टेऽनेहसि वाहिनीपतयो निर्दिष्टे स्वकीयेऽयने स्वस्वसेनया सह कृपया सर्वथैव सर्वविधोपादानान्विता भूत्वा सन्तिष्ठन्ताम् । प्रमुखसेनाध्यक्षानुसारेण सेनाधीशाः स्वस्वसेनां दुर्गं रंहसा रोद्धुमाज्ञापयन्तु ।

सेनानायकाधिराजो यदादिशति तत् सादरं तत्क्षण एव पालनीयं भवेत् । विजयतां विजयतां विजयतां भगवान् रामो विजयतां विजयतां विजयतां नायकाधिराजो लक्ष्मणः ।

एषः संग्रामधीरो रिपुकुलहननामोघशौर्य्यप्रदीप्तः
तेजोदीप्त्या समिद्धोऽवनिविततयशावर्चसाराध्यमानः ।
धानुष्केषु प्रसिद्धः सकलबलभृतामग्रणीः कौशलेशः
सीताजान्यप्रमेयो जगति विजयतां रामचन्द्रो महीयान् ॥

यूनां राष्ट्रस्य गर्वः शुचिमतिसुभगो मातृचेतः प्रमोदस्तेजोदीप्तः प्रकृष्टो रणनिपुणभुजः शौर्य्यसिन्धुर्मनोज्ञः ।
ओजश्चाञ्चल्यचार्य्यैनिखिलबलजुषां मण्डले चाद्वितीयो
भ्रातृज्येष्ठानुगामी जयतु गुणनिधिर्लक्ष्मणो नायको नः ॥

(अवस्तारस्योन्मीलनम्)

सुग्रीवः : महाराज ! अस्मदीया जगद्विदितपराक्रमाः वीरवरेण्याः नायकाः स्वस्वायनेषु नितान्तावहिततया सुदृढतया च सन्तिष्ठन्ते । तैः स्वस्वसैनिकसमरशौण्डाः लङ्कादुर्गं रोद्धुमादिष्टाः । सेनायाः सर्वथा समन्ताल्लङ्कायां प्रभावः संस्थापितोऽस्ति । सकला पुरी सम्प्रति भयाद् वेपमाना दृश्यते । शत्रोः सेना अस्मत्सेनायाः पुरः सञ्जातास्ति त्रस्ता । सा भृशाभिभूता किंकर्तव्यविमूढा प्रतीयते । अस्मत्सेनायाः समराजिरे साम्मुख्यं कर्तुं सा सर्वथैवासमर्था विलोक्यते ।

लक्ष्मणः : स्वसेनां सेनानायकाः आज्ञापयन्तु तत्क्षणं योद्धुम् । अस्मत्सैनिकोद्भटाः प्रहरणैश्छिन्दन्तु शत्रुसैन्यस्य सेनाचराणां शिरांसि ।

(पटक्षेपः)

नेपथ्ये

(सेनानायकाः उच्चैः रामो विजयतेतमाम्, लक्ष्मणो विजयतेतमामिति ब्रुवन्तिः सेनाश्चः जयतु, जयतु इति गगनभेदिना स्वरेण व्याहरन्त्यः योद्धुं प्रवर्तन्ते)

(अवस्तारस्योन्मीलनम्)

[रामलक्ष्मणसुग्रीवहनुमदङ्गदादिकाः शिविरे निषण्णाः प्रेक्ष्यन्ते]

रामः : राजन् सुग्रीव, बन्धो लक्ष्मण, वत्स हनुमन्, अङ्गदनीलादिकाश्च वीराः अस्मत्सेनानायकेभ्योऽस्मदीयायाः सेनायाः युद्धक्षेत्रे वीरतायाः उत्साहप्रदं परमाशासञ्चारकञ्च वृत्तान्तं निशम्य वयं प्रसन्नताममितां विन्दामः ।

अस्मदीयया वीरसेनया शत्रोः सेनायाः सहस्रशः प्रचण्डोद्भटभटाः विनाशिताः परमस्मत्सेनायाश्च कतिपये योग्यतराः शूर सैनिकाः वीरतापूर्वकं युध्यमानाः स्वर्गमवाप्नुवन्; स्वर्गगतानां वीरप्रवराणां वीरतां शत्रुवीराश्च मुहुः प्रशंसन्तोऽश्रूयन्त । सम्प्रत्यस्माकमिदं कर्तव्यं यद् वयं रिपोः प्रख्यातप्रख्याततरान् दारुणपराक्रमान् वीराग्रगण्यान् निहत्य स्वकीयस्यारेः साहसं मनोबलमुत्साहं युद्धमदञ्च पातयेम ।

लक्ष्मणः : बन्धो । इदमेव करणीयमिदमेव युक्तरम् । वयमपि स्वयमेव रणाजिरेऽवतीर्य शत्रुं विगलितमदं कुर्याम । तस्य साहसं चूर्णयेम, तस्य मनोवलं क्षणुयाम, तस्योत्साहंच तृणुयाम ।

सुग्रीवः : शत्रोः शूराः प्रहस्त-दुर्मुख-दंष्ट्र-निकुम्भवज्रहनु-महापार्श्वाकम्पानादिकाः सन्त्युद्भटभटाः अतः प्रथमं सर्वं एवैते निपातनीयाः ।

हनुमान् : नीलः प्रहस्तदुर्मुखौ हन्तु अंङ्गदो वज्रदंष्ट्रं निकुम्भञ्च क्षणुताम्, भवान् राजा सुग्रोवो वज्रहनुं हिनस्तु; अहमकम्पनं महापार्श्वञ्च हनिष्यामि ।

नीलः : समुचितोऽयं प्रस्तावः ।

अङ्गदः : नातः परस्तादेते प्रहस्तादयः स्वजीवितं निधातुं क्षमाः ।

हनुमदादिकाः : ।वजयतां विजयतां श्रीरामः ।

(पटक्षेपः)

पञ्चमं दृश्यम्

लक्ष्मणः : प्रभो ! यास्माभिर्योजना अद्यतनस्य युद्धस्य निर्धारिता तस्यां भवतोऽनुग्रहेण वयं पूर्णतया सफलतां लब्धवन्तः

नीलेन प्रहस्तदुर्मुखौ, अङ्गदेन वज्रदंष्ट्रनिकुम्भौ, राजा सुग्रीवेण वज्रहनुः, भवदीयेन वत्सेन हनुमता अकम्पनो महापार्श्वश्च व्यापादिताः । एतेषां वधेन शत्रु र्भृशं शोकाकुलः सञ्जातोऽस्ति । अस्ति स त्रस्तः । शृण्वन्तु साम्प्रत मस्मदीयाः सेनानायकाः—श्वो धूमाक्षं सम्पातिः, देवान्तकं द्विविदः, त्रिशिरसं मैन्दः, अतिकायं सुषेणः, प्रजङ्घं वीरबाहुः, शोणिताक्षं सुबाहुः, यूपाक्षं नलः, कुम्भं पनसः, मकाराक्षञ्च प्रघसो हिनस्तु । अस्मदीयाः सेनानायकाः स्वकीयां स्वकीयां सम्यक् सञ्चालनं कुर्वन्तु उक्तानां शत्रुसेनानायकानां निपातन-मिष्टं मन्यन्ताम् । भवतु च यथावसरं शङ्ख-भेरी-मृदङ्गपणवानां निःस्वनः ।

(पटक्षेपः)

षष्ठं दृश्यम्

(नेपथ्ये)

हा हा, अस्मदीया मुख्यसेनानायका उद्भट प्रथित-पराक्रमाः धूमाक्ष-देवान्तक-त्रिशिरोऽतिकाय-प्रजङ्घ-शोणिताक्ष-यूपाक्ष-कुम्भमकराक्षा निहताः शत्रुपक्षेण । किं करवाम, क्व गच्छाम । साम्प्रतं नास्ति मनागपि जयाशा जीवनाशा च । अनेन रावणेन तु राक्षसानां सकलानि कुलानि विनाशं प्रापितानि । इदानीं तु मेघ-नादकुम्भकर्णावेवावशिष्येते, रावणश्च स्वयम् । सम्प्रति एत एव युद्धक्षेत्रेऽवतरिष्यन्ति ।

(नेपथ्योन्मीलनम्)

(रामलक्ष्मणसुग्रीवविभीषणहनुमदादिका आसीना दृश्यन्ते)

रामः : लक्ष्मण, साम्प्रतमहमिच्छामि त्वं श्वो मेघनादं जहि अहञ्च स्वयं कुम्भकर्णं हनिष्यामि ।

लक्ष्मणः : युक्तमेवेदम्, जयतु जयतु महाराजः ।

हनुमत्सुग्रीवौ : विजयताम्, विजयतां कोशलेशो राघवेन्द्रो रामः ।

(पटक्षेपः)

सप्तमं दृश्यम्

(नेपथ्ये)

हन्त, भगवता रामेण महाभयङ्करो राक्षसाधमः कुम्भकर्णो व्यापादितः, परं दुःखमिदं मेघनादेन लक्ष्मणो दारुणया परमकठोरया च शक्त्या प्रहृतस्तस्मात् सोऽचेतनतां नीतोऽस्ति सर्वास्मदीया सेनानायकाः, सेनाः, विभीषण-सुग्रीव-जाम्बवदङ्गदादिकाः सन्ति भृशविषण्णाः शोकाकुलाश्च । हनुमानिदानीं परमखिन्नः संस्तमचेतनं प्रभुलक्ष्मणं भगवतो रामस्य सविधे आहरन् दृश्यते ।

(अवस्तारस्योन्मीलनम्)

(श्रीरामः शोकोद्विग्नचित्तः सन् विलपति; तस्य पुरोऽचेतनतां गतो लक्ष्मणो भूम्यां सुप्त इव दृश्यते । हनुमद्-विभीषण-सुग्रीव-नीलनलाङ्गदद्विविदादिकाः सर्वेऽश्रूणि मुञ्चन्तः परमविषादे निमग्नाः सन्तिष्ठन्ते ।

रामः : **अयि दैव मम प्रियोऽनुजो**
विपिनो योऽजनि मे सहायकः ।
नितरां सहते स्म हेतुना
ममकष्टान्यनिशं महान्ति हा ॥

सततं मम सेवने मनो
न्यदधात्पूर्णतया भवन् दृढः ।
न निशां न च वासरंविलो-
कितवांस्त्वं मम बन्धुलक्ष्मण ॥
परिहाय सुखानि सद्मनः
परिमुच्यापि च राज्यसम्पदः ।
बहुकष्टयुतं त्वमागतो
विपिनं हन्त ममैव हेतुना ॥
परमस्त्युचितं न संङ्कटे
परुषे भीषणशत्रुपातिते ।
गमनं तव साम्प्रतं विहाय
तु मामेककमत्र संयुगे ॥
न कदाप्यभवो निपीडितं त्वं
मिमं राममपि क्षमोऽनुज ।
कथमीक्षितु मद्यसङ्कटे क्षमसे
सुप्तिमिमां त्यज प्रिय ॥

(एतदन्तराले विभीषणो हनुमता सह सुषेणवैद्यस्य गेहं याति, अति सत्वरमेव सुषेणमादाय तावागच्छतः; रामो वैद्यमुपस्थितं प्राप्य तं नमति तूष्णीञ्च भवति सः शोकार्दितः)

सुषेणः : श्रीमन् विभीषण ! कमपि सत्वरं क्षणमप्येकं न वहाय हिमाचलं सञ्जीवनीमाहर्तुं प्रहिणोतु; तदौषधं गृहीत्वा स इह भानूदयात् प्रागेव निवर्तेत। सूर्योदये जाते तु औषध-प्रयोगो व्यर्थतां गच्छेत् । तदौषधं निपीय क्षणानन्तरमेव लक्ष्मणः प्राप्तचेतनो भवेत् ।

(निशम्यैतत् हनुमान् हिमनगेन्द्रादौषधमादातुं मनोगतिरिव चचाल; गच्छताल्पिष्ठेन समयेन नेपथ्ये वायुयानस्य शब्द इव शब्दो जायते; आलोकं समन्ताद् विकिरन्तीं सञ्जीवनीमादाय हनुमान् प्रविशति; वैद्यः सुषेणो द्रागेवौषधं पाययति, लक्ष्मण औषधे पीते सति, तत्क्षणे उत्तिष्ठति, सर्वत उल्लासप्रवाहो महान् प्रवहति; सेनानायकः सैनिकाश्च भूयांसः परमहर्षोल्लास पूर्वकं शङ्ख-भेरीमृदङ्गपणवादिकानां निःस्वनेन सम्पूर्णमपि गगनं दिशाश्च सर्वा गुञ्जिताः कुर्वन्ति; सर्वेऽपि विभीषण-सुग्रीव-हनुमदङ्गदादिकाः परमानन्दं प्रकटीकुर्वन्तो 'हर्षो हर्षो हर्ष' इत्युच्चै सच्चारयन्तो 'जयतां जयतां रामलक्ष्मणा' वित्युदीरयन्ति; रामो लक्ष्मणमुरसा सगाढ-स्नेहं परिष्वजमानस्तस्य शिरो जिघ्रति; सर्वेऽपि विभीषणसुग्रीवहनुमत् प्रभृतयः सेनानायकाश्च लक्ष्मणं परिष्वजन्ते; 'जयतु जयतु रामो जयतु लक्ष्मण' इति उच्चैर्ब्रुवन्ति ।)

जवनिकापातः

अष्टमं दृश्यम्

(विभीषण-सुग्रीव-हनुमदादिकाः भगवद्रामलक्ष्मणयोः पुरः नतमस्तकाः सन्तस्तिष्ठन्ति)

सुग्रीवः : अस्माकं साम्प्रतं द्वावेव मेघनादरावणौ हन्तव्यौ स्तः। मया विभीषणप्रदत्तसम्मत्यनुसारेण सेनायाः उद्भटोद्भट परमप्रकृष्टशौर्यजुषो रणधीराः कुशला नायकाः अयनेषु समुचितेषु नियतीकृताः सन्ति । सुरेश्वरेणेन्द्रेण रथो भवत्सेवायां प्रहितोऽस्तीति मातलिर्माम-

सूचयत्। अतः या आज्ञा सम्प्रति पालनोयास्ति कृपया सा दातव्या।

रामः : सुग्रीव, इदानीमहं युद्ध्वा संग्राममुपसंहर्तुं कामः अतोऽद्य मम रावणस्य च, लक्ष्मणस्य मेघनादस्य च मध्ये युद्धं प्रवर्तेत।

लक्ष्मणः : प्रभो, अहमद्य मेघनादं निहत्यैव भवतः पुर उपस्थितो भविष्यामि।

रामः : एवमस्तु। अहमप्यद्य वसुधामिमां रावणविहीनां विधास्यामि। सुग्रीव, शङ्खान् धमन्तु सेनान्यः वादित्राणि च भेरीपणवादीनि भवन्तु वादितानि।

(जवनिकापातः)

(नेपथ्ये शङ्खभेरीमृदङ्गढक्कादितूर्य्याणां गगनव्यापी स्वनो भवति; 'रामो जयतु जयतु; लक्ष्मणो जयतु जयतु' चेत्युच्चैर्जयशब्द उत्तिष्ठति)

नवमं दृश्यम्

(नेपथ्ये)

लोका यस्य भयात् त्रयोऽपि
नितरां बिभ्युश्च सर्वे सुराः
नागा दानवमानवा अपि
जिता येन स्वशौर्यश्रिया।
रामस्तं रजनीचरेश-
मवधील्लङ्केश्वरं रावणं
तस्मादद्य सुखेन भीति-
रहिताः सर्वे गृहे शेरते॥

यस्माद् वीरभयङ्करात् सुविदिता-
च्छौर्यार्णवात् सर्वदा
वेपन्ते स्म सुरासुराश्च सकला
भीता प्रधावन् दिशः ।
धीरः शक्रजितं जघानद समरे
तं राक्षसं लक्ष्मणः
प्रीयन्ते सदनेऽत एव निखिलाः
कान्तायुताः साम्प्रतम् ॥
मर्यादापुरुषोत्तमो वसुमती-
कष्टापहर्ता प्रभुः
वेदर्षिद्विजपूजनस्थितमनाः
सन्नीतिसम्पोषकः ।
सीतावल्लभवंद्यचारु-
चरितो लोकैकरक्षाव्रतः
रामो राजमणिः सदा
विजयते रामं नमामो वयम् ॥

(जवनिकायाः उत्थितिः)

(सर्वेऽपि विभीषणसुग्रीवहनुमदादिकाः भगवतो रामस्य लक्ष्मणस्य च श्रीचरणारविन्देषु जयतां जयतामिति वदन्तः शिर स्वकीयं नमयन्ति)

राम : वीरवराः ! भवतां सुग्रीवहनुमदादिधन्यचरितानां वीरवरेण्यानां शुभसाहाय्यात् संयुगे दशाननो जितः । भवत्सु सर्वेष्वपि रणवन्धुषु कैः शब्दैर्धन्यवादान् प्रकाशयेयं, कृतज्ञताञ्च प्रकटीकुर्याम् ?

लक्ष्मण, दशग्रीवस्य सञ्जाते सत्यन्त्येष्टिसंस्कारे त्वं लङ्कानगर्यां प्रविश्य राजभवनं नगरीञ्च लङ्कां सर्वविधै-रलङ्करणैः रत्नैर्मणिभिर्दुकूलैः फलैः पुष्पैः पत्रैर्नारिकेलैः पताकाभिश्च विभूषयितुमादिश। अहं पितुराज्ञावशात् स्वयं नगरीमध्ये न गमिष्यामि। सानन्दं सोल्लासञ्च विभीषणं राजसिंहासनेऽभिषिञ्च। गायकाः गायन्तु; नर्तक्यो नृत्यन्तु; तूर्यवादित्रधरा वादित्राणि वादयन्तु; सर्वेऽपि समुदं सोत्साहमभिषेकोत्सवं सम्भावयन्तु।

लक्ष्मणः : यदादिशति भवान्; तत्सर्वमपि सहर्षमनुष्ठितं यथा-विधि स्यात्।

रामः : लङ्कापते बन्धो विभीषण! अहं भवन्तं भूयो भूयः सभाजयामि। भवान् अभिवर्धताम् अभिवर्धताम्, उत्कर्ष-मुत्कर्षञ्च दिने दिने लभताम्, सदैव प्रजानामभ्युदये स्वकीयं मुख्यं धर्मं मन्यताम्। सम्पन्ने सत्यभिषेक-महोत्सवे रत्नमणिप्रभृतिबहुमूल्यवस्तूनां वर्षा कर्तव्या, जाते च सति मङ्गलमये महसि सीतात्रानेतव्या। सम्प्रति भरतहितेन मयातिशीघ्रम् अयोध्या गन्तव्या। भरत-बन्धोस्तपस्त्यागः प्रीतिश्च मां भृशमयोध्यां प्रस्थातुं नुदन्ति। वत्स हनुमन्, राज्याभिषेकविषयके शुभकार्ये त्वमात्मानमिदानीं प्रवर्तय, येन मङ्गलमयं कार्यमिद-मुचितरीत्या सम्पद्येत।

हनुमान् : प्रभो तथैव सर्वं कार्यं सम्पन्नतां गच्छेद् यथा भवाना-दिशति।

रामः : राजन् सुग्रीव! भवान् सर्वाण्यपि कार्याणि अभिषेक-

पराणि निरीक्षतां, येन सर्वमपि मनोज्ञं भवत् समाचीनतया दृश्येत ।

सुग्रीवः : प्रभो ! तेनैवोत्साहेन मनोयोगेन सहर्षं सर्वमभिषेककार्यं भवेत् येन भवदीयं हृदयं प्रीयेत ।

रामः : सर्वेऽपि सेनानायकाः सेनाश्च सम्प्रति मङ्गलोत्सव एतस्मिन् समुदं सोल्लासं प्रवर्तन्ताम् ।

सेनानायकानां सेनानाञ्च प्रतिनिधिः---

प्रभो ! एतस्य मङ्गलमयस्य राज्याभिषेकस्य सर्वाण्यपि कार्याणि युक्तया सुन्दरतया विधातुं भवदादेशमवाप्य वयं प्रयामः । जयतु जयतु भवान् । जयतु जयतु अस्माकं लङ्केश्वरो विभीषणः !

(पटक्षेपः)

दशमं दृश्यम्

(अभिषिक्तो विभीषणो राजसिंहासनमध्यास्ते । लक्ष्मणसुग्रीवहनुमदादिकाः सेनानायकाश्च स्वस्वासने निषीदन्ति । जनानां सम्मर्दो 'जयतु जयतु राजा विभीषणो लङ्काधिपति' रित्येतैः शब्दैः सादरं सभाजयति नवं लङ्केश्वरम् ।

ब्राह्मणाः : (उच्चैः स्तुवन्ति)

रामस्यानुचरो हृदोज्ज्वलतरस्तेजस्वितालिङ्गितः
विश्वं रञ्जयति प्रियो बलनिधिः श्रीमान् प्रजावत्सलः
सर्वत्रैव शुभं यशश्च तनुते लङ्कापतिर्नूतनः
संसारेऽत्र विभीषणो विजयते नव्यावदातश्रिया ॥
यस्मिन् स्वां करुणां स्वयं रघुपतिश्चक्रे कृपालु प्रभुः
सन्मन्त्रं पवनात्मजो हि हनुमान् यस्मै ददौ सादरम् ।

सुग्रीवोऽप्यथ लक्ष्मणो भगवतो भक्तिञ्च यस्यामलां
श्लाघेते स विभीषणो विजयते लङ्काधिराजस्त्वयम् ॥

(पटक्षेपः)।

(जवनिकायाम्)

(भगवान् सूर्यवंशविभूषणं सीतावल्लभः सबन्धू रामचन्द्रो विजयते। अस्मासु लङ्कापुरीवासिषु कृपामयमानसः कृपां सदा निदधातु। विमानेन पुष्पकेण स्वनगरीं राजधानीमयोध्यां विभीषणसुग्रीवहनुमदङ्गदादिभिः सेनानायकैश्च कतिपयैः सह सीतालक्ष्मणसहायं भगवन्तं रामं प्रतिष्ठमानं सादरं वयं नमामो नमामो नमामः—

श्रीरामं शरणं समग्रजगतां सीतां विदेहात्मजां
बन्धुं लक्ष्मणविश्वगीतचरितं सुग्रीववातात्मजौ।
लङ्केशञ्च विभीषणं बलवतः सेनापतीन् सादरं
लङ्कावासिजनाः नमन्ति भवतोऽयोध्यापुरीं गच्छतः ॥

(पटक्षेपः)

●

अष्टमोऽङ्कः

प्रथमं दृश्यम्

(नन्दीग्रामे पर्णशालायाः अलिन्दे तपस्वी भरतो निषीदति तस्य च पुरः शत्रुघ्नो बन्धुः सन्तिष्ठते)

भरतः : बन्धो शत्रुघ्न! 'अस्मद्भ्राता रामो रावणं हत्वा लङ्कातः सीतालक्ष्मणसहायो विभीषणसुग्रीवहनुमदादिभिः सह पुष्पक विमानेनागच्छति। सः प्रयागे महर्षिभरद्वाजस्य दर्शनं कृत्वातितरां शीघ्रमयोध्यां स्वचरणकमलाभ्यां पावनीकरिष्यति' इत्येष शुभोदन्तोऽधुनैव

वायुनन्दनाद्धनुमतः प्राप्तोऽस्ति । तस्मात्कारणात् आकाशवाण्या सर्वस्यामपि राजधान्यां कोसलेषु च हर्षप्रदा वार्ता प्रसारणीया । वन्धो, अविलम्बेनैव समस्तपुरी सर्वविधतयालङ्कार्या ।

शत्रुघ्नः : अहो हर्षो हर्षः। एषोऽहं स्वयमेवाकाशवाणीव्यवस्थां करोमि ।

(पटक्षेपः)

(अवस्ताराभ्यन्तरे)

(तूर्य्याणां निस्वनः, शङ्खानाञ्च शब्दो भवत्युच्चैः। 'राजा राघवो विजयते, राजा राघवो विजयते' इत्येष गगनव्यापी दिग्दिगन्तगामी शब्द उत्तिष्ठति । सर्वापि राजधानी तरलया परमाभिरामया रमया राजते । रत्नमणिदुकूलादिमहर्घवस्तुभिः फलपुष्पपत्रादि विविधा वदातोपादानैर्देदीप्यमानास्ति सा । सर्वेऽपि पन्थानः सर्वाश्च प्रतोल्यश्चन्दनादिसौरभैः सुवासिता सन्ति । सर्वत्र हृदयहारिणी लक्ष्मीः नृत्यति । प्रकाशोऽद्भुत एव विभाति ।

(अवस्ताराद्वहिः)

गुरुवसिष्ठविश्वामित्रादिमहर्षयो हि भरतशत्रुघ्नौ मन्त्रिणोऽधिकारिणः पौराश्च सानन्दं रामे लक्ष्मणे च मिलन्ति । रामलक्ष्मणसीताः, विभाषणसुग्रीवहनुमददादिका महर्षि .सिष्ठप्रभृतिश्रीचरणारविन्देषु, मातृणाञ्च पदपङ्कजेषु स्वकीयानि शिरांसि सादरं नमयन्ति)

अवस्तारनिपातस्तदभ्यन्तरे च श्री रामलक्ष्मण-सीताः स्वराजप्रासादं यान्ति । यद् राजभवनं विभीषण-सुग्रीवादिकानां कृते निवासाय नियतीकृतं तत् तद् राजभवनं ते प्रयान्ति ।

जयतु जयतु महाराजो राम इत्येष शब्दः पुनः पुनः भवति ।

(नेपथ्ये)

आनन्द उल्लासश्च । श्वो रामाभिषेकमहासमारोहः परमानन्दपूर्वकं सम्पत्स्यते इत्येतन्मङ्गलमयं निवेदनं सहर्षं सर्वेषु दीयते ।

द्वितीयं दृश्यम्

(सीतया सह रामः सिंहासनमध्यास्ते । भरतलक्ष्मण-शत्रुघ्नाः हनुमांश्च उभयतः सन्तिष्ठमानाश्चामर व्यजनानि शनैः शनैरुद्धूनयन्ति । सर्वे चर्षिमहर्षिमुनि-साधुतपस्विज्ञानिप्रभृतयः, विभीषणसुग्रीवप्रभृतिनृपतयः, मन्त्रिणोऽमात्याः, उच्चाधिकारिणः, सेनापतयः, पौरर्षभाश्च स्वस्वासनं विभूषयन्ति । ब्राह्मणा वेदध्वनिं कुर्वन्ति)—

ओ३म् ऋचो अक्षरे परमे व्योमन्यस्मिन् देवा अधिविश्वे निषेदुः । यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते
(ऋग्वेदे)

देवानां भद्रा सुमतिर्ऋजूयतां देवाना७

रातिरभि नो निवर्तताम् । देवाना ७ सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे ।

स्वस्ति न इन्द्रो वृद्धश्रवाः, स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ (यजुषि)

शंनो देवाः सविता त्रायमाणः शं नो भयन्तूषसो विभातीः । शं नः पर्जन्यो भवतु प्रजाभ्यः क्षेत्रस्य पतिरस्तु शम्भुः । (ऋग्वेदे)

(नर्तक्यो नृत्यन्त्यो गायन्ति)

अनन्तशक्तिवन्दितम्
असीमगौरवार्चितं
यशःस्तुतं गुणस्तुतं
प्रबुद्धशुद्धमानसं
विनाशिताघराक्षसं
समग्रदोषनाशकं
समस्तशोकशोषकं
सहर्षमद्य जानकीप्रियं
वयं नमाम ईशराघवं
वयं नमाम ईशराघवम् ॥

(नर्तकीनां गमनम्)

वसिष्ठः : कल्याणानन्दसीमा दशरथ-
तनुजो मेघवर्णाभिरामः
क्वाचित् साकेतकीर्तिर्भव-
विपिनगतिक्लान्तिहारिप्रणामः ।

श्रीसौंदर्यप्रभाभृद्
धृतजनकसुतासादरापाङ्गधामा
दिक्षु प्रख्यातभूमा दिविषद-
भिनुता देवता रामनामा ॥

विश्वामित्रः : विश्वेशो रघुनाथमङ्गलमयः
कल्याणवर्षाकरः
धर्मत्राणपरो विकाररहित-
स्तेजःस्वरूपोतमः ।
ज्ञानानन्दशिवाप्रमेयविभवो
विद्याभिदीप्तः प्रियः
आदित्यान्वयभूषणं विजयते
श्रीरामचन्द्रोऽधिपः ॥

हनुमान् : मत्वा येन तृणाय राज्यमखिलं
त्यक्तं, मुदा पालयन्
आज्ञां पूज्यपितुश्चतुर्दशसमा-
श्चक्रेऽधिवासं वने ।
योऽन्यायस्थबलाढ्यबालिन-
महन् सुग्रीवसाहाय्यकृत्
सञ्जातश्च विभीषणं विहितवान्
लङ्काधिपं तं नुमः ॥

विभीषणः पाति स्मर्षिजनान् प्रयाय
विपिनं हत्वा खिलान् राक्षसान्
निर्विघ्नां व्यदधात् तपोवनभुवं
विद्याश्रमाणाञ्च यः ।

गत्वा ज्ञाननिधीन् मुनींश्च
निकषा तेषां कठोरं तपो-
ऽकार्षीत् सः सफलं दयामयमनाः
संस्तूयते राघवः ॥

सुग्रीवः : विश्वामित्रमुनेर्महाभुजबलो
यागानगौप्सीन्मुदा
हत्वा विघ्नकरं सुबाहुमुदधार्षीत्-
तामहल्यामृषेः
कोदण्डञ्च पिनाकिनो द्रुततया
भङ्क्त्वा विदेहात्मजां
यो रामः परिणतीवान् सविनयं
तं राममीडे प्रभुम् ॥

भरतः : रामं लोकमनोऽभिरामचरितं
मायामनुष्यं हरिम्
नेत्राम्भोजमुरोविशाललिताभा-
भास्वरं बन्धुरम् ।
श्रेष्ठप्रौढबलं समस्तजगतां
यो मङ्गलं शाश्वतं
चारुस्मेरमुखं शरासनधरं
तं शासनस्थं भजे ॥

लक्ष्मणः : बाल्ये यः प्रथमं स्वामातृनिवहं
प्रीतं व्यधात् सादरं
क्रीडाभिश्च सदैव बन्धुनिचयं
हृद्याभिरामोदयत् ।

विद्यादातृगुरून् हि पूज्य-
चरणान् संसेव्य योऽतूतुषत्
तं रामं नतमस्तकः सविनयं
वन्दे जगद्रञ्जनम् ॥

शत्रुघ्नः : रामो वक्षसि रावणस्य
समरे हन्ति स्म नो सायकैः
सीता चेतसि तस्य हन्त
कुरुते वासञ्च तस्यामहम् ।
मय्यास्ते भुवनावली च
निखिलापि स्थावरो जङ्गमः
चिन्तेयं कुरुताच्छुभं रघुपतेः
श्रेयोऽनिशं नः प्रिया ॥

जनप्रतिनिधिः : दीनानामभिरक्षको
जनकजानाथो जगत्पालकः
श्रीरामः शरणागतेषु सदयो
धर्माध्वगामिप्रियः ।
कारुण्यामृतसागरः पितृवचो-
रक्षानदीष्णः प्रभुः
क्षोणीभारतमीचराभिहनने
धैर्य्योदधिर्नूयते ॥

(अक्षतानां क्षेपणं राम-ग्रीवायां पुष्पस्रजामासजनम्; 'जयतु जयतु महाराजाधिराजः श्रीराम' इत्युच्चैः सतूर्यस्वनमुद्घोषः)

(पटक्षेपः)

नवमोऽङ्कः

प्रथमं दृश्यम्

(महर्षिवसिष्ठस्याश्रमः । तत्र महर्षिविश्वामित्रप्रभृति-ऋषयो भगवान् रामः सस्वसकलबन्धुः, मन्त्रिणोऽमात्या राज्याधिकारिणो, विभीषण सुग्रीवौ, हनुमान् अन्ये च प्रमुख पौरा विराजन्ते)

महर्षिवसिष्ठः : गतेऽहनि यदाहं भगवतो रामचन्द्रस्य राजप्रासादमधिष्ठित आसं, महाराजाधिराजो भगवान् रामचन्द्रो हनुमतोऽयोध्यायामेव स्थायित्वेन निवासश्चेद् भवति तदा साकेतः कोसलदेशस्तत्रत्य शिक्षाजगच्च निखिलं स्वकीयसौभाग्यमेव महन्मन्येरन् इति विचारं प्रकटीचकार। एतं महनीयं विचारमहं सहर्षं पर्यपूपुषं; महर्षिविश्वामित्रश्च सुदृढ़शब्दैस्तं विचार मन्वमूमुदद् ; अत्राहमद्य लङ्कापतेः श्रीविभीषणस्य किष्किन्धाधिपतेः श्रीसुग्रीवस्य चेताधिष्ठितत्वात् तयो विचारश्रवणसदवसरमधिगमिष्यामीति महान् हर्षः

बिभीषणः : गुरुदेवो महर्षिरस्मिन् विषये ममापि विचारं श्रोतुमाकाङ्क्षतीत्येतदहं स्वकीयं सुकृतत्वं मन्ये अहं तच्चरणाम्भोजयोर्महाराजाधिराजश्रीरामचन्द्रस्य पादारविन्दयोः स्वमौलिं सप्रश्रयं प्रणमयन्निवेदयामि "अस्त्यस्मदीयः पूज्यो हनुमान् ज्ञानिनामग्रणीः स यदि भगवत्प्रस्तावितविचारस्वीकरणेन अस्माननुगृह्णीयात् तदा वयं सर्वेऽपि अस्मान् धन्यान् मंस्यामहे ।

सुग्रीवः : लङ्काधिपादरणीयेन विभीषणेन यद् व्याहृतं तदहं सहर्षमनुमोदयामि । अस्मच्छ्रद्धास्पदहनुमतो महनीयस्य प्रथितस्य सर्वागमनिगमव्यापिनः पाण्डित्य-स्यावदातप्रकाश इतः समयात् प्रागेव प्राप्त आनन्दश्च तत्सकाशाल्लब्धः; केन प्रकारेण तमानन्दमप्रकाशं वर्णयेयम् अहं हृदा कामये यन् मान्यो हनुमान्, यत् पदमनुग्रहीतुं प्रार्थितस्तदीयज्ञानार्णवतात ऊनतर मेव परं तत् स्वीकुर्यात् तत्पदं, स्वाधिष्ठानेन स गरिमाणं च नयेत् ।

महर्षिवसिष्ठः : ज्ञानभानो पवननन्दन । साम्प्रतमहं भगवान् रामश्च द्वावप्यावां कामयावहे यदिमं प्रस्तावं भवान् स्वकीयेन विचारप्रकाशेण प्रकाशयतु ।

हनुमान् : भगवन् गुरुदेव, महर्षिविश्वामित्र, अन्ये सर्वे पूज्या ऋषयो विद्वांसः सुहृदश्च । चेद् भवन्तः कृपालवः सर्वे सेवकेऽस्मिन्नदृशीं कृपां निदधति तदाहं मां सौभाग्यवन्तं मन्ये । परं भगवद्सेवायामहं कार्यमेतत् प्रत्यवायत्वेना प्यवगच्छामि । तद्विधस्य कार्यस्य सम्पादनं मानसं कदापि स्वकीयाभीष्ठविन्दोरन्यत्रापि आक्रष्टुमीष्टे । मन्येऽहं तां स्थितिं स्वां महतीं पुरोभागितामेव—

श्रीरामे करुणामये
प्रियतमे श्रेयस्करे रक्षके
मात्सर्यच्छललोभमोह-
शठतादम्भादिशून्यं मनः ।
सम्यग् येन कृतं रतं, जगति
यः सर्वेषु च प्राणिषु

स्वस्नेहं निदधाति साम्यचरित-
स्तस्यैव धन्यं जनुः ॥
अस्यस्मिन् रमते मदीयहृदयं
नो क्वापि चैतद् गुरो
नित्यं रामपदाब्जयोर्विदधतः
सेवामिदं जीवितम् ।
गच्छेदाशिष मद्य यच्छतु
भवान् मत्प्रार्थनेयं गुरौ
मां मान्ये भवति प्रभौ हि
नयतां पारे भवन्तौ भवात् ॥

रामः : सङ्केतेन गुरोरवाप्य
हनुमन् आज्ञां मदीयं मनः
वक्तुं काङ्क्षति को न वेत्ति
भवतो भक्तिं मनोज्ञां शिवे ।
ज्ञानादित्य इहास्ति भूमिभुवने
श्रेष्ठो गुणानां निधिः
विद्यानामत एव धाम कुरुतां
पूर्णाभिलाषं सुधीः ॥
वेद व्याकरणादि शास्त्रकुशलो
ऽध्यात्मेऽद्वितीयो महान्
कष्टानां हरणे नितान्तनिपुणो
विख्यातशौर्योदधिः ।
व्यक्तित्वं भवतोऽद्भुतं हि
हनुमंल्लोकाभिलाषं भवान्

मत्वा चासनगौरवं
प्रिय सुतोत्तुङ्गं करोतु स्वयम् ॥
राज्यं मां जनताञ्च विज्ञजगतीं
पूज्यप्रधीमण्डलं
पुष्णन् ज्ञानवतां गणञ्च सचिवान्
सम्मोदयन् मन्त्रिणः ।
साहाय्यं विदधद् गुरो
र्मुनिवरश्रीमद्वसिष्ठस्य च
भानोर्वंशमिमं भवानतितरां
कीर्त्या करोत्वन्वितम् ॥

हनुमान् : एतच्चेदनुमन्यते समुचितं
भक्त्यां कृपाम्भोनिधे
कुर्वाणो भवतोऽङ्घ्रिवारिज-
युगास्याराधनं श्रीपते !
यामाज्ञां प्रददाति तां गुरुवरो
नाथश्च वात्सल्यवान्
प्रीत्या मूर्ध्नि दधत् स्वजन्म सफलं
श्रीमन् करिष्याम्यहम् ॥

(गुरुर्वसिष्ठः श्रीरामोऽन्ये च प्रमुखप्रमुखतराः सादरं रत्नमणिभूषणदुकूलयुग्म-नारिकेल-गन्ध-पुष्पस्रजादिकान्युपायनीकुर्वन्ति; कौशल्यादिमातरः सीता, लक्ष्मण-भरतशत्रुघ्नाः विभीषणसुग्रीवावन्ये च विज्ञोत्तमाः अक्षतान् सपुष्पान् विकिरन्ति हनुमतो मौलौ। सर्वेऽपि पौरा मन्त्रिणोऽधिकारिप्रभृतयो 'जयतु जयतु मारुतिः

ज्ञानशेवधिः सीतारामचरणाम्बुजभक्तोऽस्माकमुपास्यो विश्वकल्याणपथस्थितो हनुमान् अञ्जनानन्दनः'-इति सोल्लासं वदन्ति)

सर्वे रामानुग्रहभाजनं त्रिभुवनश्लाघ्या-
ञ्जनानन्दनः
सर्वत्र श्रुतगीतचारुचरितो
योगश्रियाराधितः ।
विद्या शेवधि बुद्धिमानससरो-
हंसोऽद्वयानन्दभृत्
प्राणिश्रेष्ठगतिर्भवैकहितकृद्
वातात्मजो नम्यते ॥

भरतवाक्यम्

भवन्तु रामचरणभक्तिभाविताः
भरन्तु भारतमहनीयतां जनाः ।
भवव्यथां हरतु वृषध्वजोऽनिशं
भजन्तु संस्कृतमिह सर्वमानवाः ॥

(पटक्षेपः)

शुभं भूयात् !

'भाति मे भारतम्' : काव्यदर्शनम्

[डा० शिवदत्त शर्मा चतुर्वेदः एम०ए०, पीएच०डी०, साहित्याचार्यः
प्रवक्ता, साहित्य-विभागः, प्राच्यविद्याधर्मविज्ञानसंकायः,
काशीहिन्दूविश्वविद्यालयः, वाराणसी]

भारतकविसहृदयसमाजे नवीनां संस्फूर्तिं सम्प्रसारयत् "भाति मे भारतम्" काव्यं धुर्यकवेः श्रीरमाकान्तशुक्लमहाभागस्यावर्जयतितरां सचेतसां चेतः। "एकस्य तिष्ठति कवेर्गृह एव काव्यम्" इत्यवधूयाभाणकमिदं काव्यमद्य संस्कृतकविसम्मेलनश्रोतृसहृदयगृहेषु, बालेषु बालासु, नारीषु नरेषु, वृद्धेषु सिद्धेषु सङ्गीतलहरीं विलासयति समर्पयति च प्रेरणापूरितं निर्मलमानन्दममन्दम्।

"तया कवितया किं वा किं वा वनितया तया
पदविन्यासमात्रेण न घूर्णयति यच्छिरः"

इति सत्यस्पष्टा कविता-प्रभावानुभवधोरणी सम्पूर्यतेऽद्य नितरां "भाति मे भारतम्" संज्ञास्पदेन गीतिकाव्यरत्नगुम्फेन। गीतिकाव्यरत्नमालाया एतस्या प्रभादीप्त्या प्रत्येकपदविन्याससमकालमेव सहृदयशिरोघूर्णनं सहस्रशो जनानां दृष्टचरमनेकत्र विशिष्टेषु निखिलभारतीय-संस्कृतकविसम्मेलनेषु। विगतवर्षे वाराणस्यां संजाते विश्वसंस्कृतसम्मेलनाङ्गभूते[1] विशिष्टे संस्कृतकविसम्मेलने, विद्वत्-प्रकाण्डकविपरिषन्मध्ये संश्रावितमिदं काव्यं श्रीरमाकान्तशुक्लमेव यत्र तत्र सर्वत्र चर्चितं कृतवत्।

संस्कृतभाषाऽद्य सर्वसाधारणाद् दूरे जातेति न तिरोहितम्, संस्कृत-कविताऽपि च तादृशमेव स्थानं सर्वसाधारणे धारयति, परं यदा

---

१. विश्वसंस्कृतसम्मेलनम् २१ अक्टूबरतः २६ अक्टूबरपर्यन्तम् काशी-हिन्दूविश्वविद्यालये ई० १९८१ सत्रे नियोजितं वाराणस्याम्।

सर्वविधाऽवर्जनगुणगौरवसमन्वितः श्रीरमाकान्तशुक्लसदृशः कविर्मञ्चे "भाति मे भारतम्" सदृशं काव्यमादाय समायाति तदा तावत्कालपर्यन्तं तूपर्युक्तं धारणाद्वयमपि दूरं प्रयातीति नैकशो निभालितम्। देशेऽस्मिन् अनेकदशवारं काव्यस्यास्य पाठः सञ्जातः, सहस्रशश्च सहृदयाः श्रोतारो भारतप्रेरणाप्रपूरितस्वान्ता अपि नूतनां भक्तिधारां स्वान्ते धारितवन्तस्तदिदं श्रुत्वेति न न्यूनं साफल्यं सत्कवेरस्य श्रीमतो डॉ० रमाकान्तशुक्लमहाभागस्य।

सर्वपुरातनसभ्यताशोभासमुच्छालितमिदं भारतं वेदच्छन्दस्सु प्रगीतम्, रामायणे वर्णितम्, महाभारते चित्रितम्, पुराणेषु चर्चितमद्यावधि चानेकसहस्रनानाभाषाप्रवीणकविवृन्दवर्णनसम्पूजितं कां वा वर्णनशोभां नाङ्गीचकार! भारतवर्णनपराः सर्वेऽपि विविधाः सन्दर्भा यदि संकलिताः स्युस्तर्हि नैकग्रन्थ (जिल्द)-प्रपूरणं जायेत। को वा भवेत् तादृशो लब्धवाग्देवीप्रसादः कविर्येन स्ववाक्पुष्पैर्भारतं न प्रपूजितं स्यात्। केचित् कथाप्रवाहप्रसङ्गेषु भारतवर्णने मोदं लब्धवन्तोऽपरे स्वमनोऽनुकूलमहाकाव्यसंसारे संचरणशीला महाकवयः समुचितेऽवसरे भारतवर्णनाय समुत्सुकाः सञ्जायन्ते। कैश्चिन्मुक्तकमालाभिर्वर्णितं भारतमपरैः समस्यापूर्तिसन्दर्भे चर्चितम्, येनाऽपि यत्रावसरो लब्धः स्यात्सुकविना तेन तत्रैव स्वप्रियतमं भारतं शब्दचित्रेऽवतारितमिति सर्वत्रावलोकयितुं सुकरम्।

अद्य श्रीरमाकान्तशुक्लमहोदय इव निकटपूर्वमप्यनेके विश्वविश्रुता महाकवयो विद्वांसश्च केवलं भारतवर्णनमेवोद्देश्यीकृत्य काव्यानि सिद्धप्रसिद्धानि नानाभाषासु संस्कृतेऽपि च निर्मिवन्तो येषु हिन्दीभाषायां राष्ट्रकवेः श्रीमैथिलीशरणगुप्तस्य "भारत-भारती" संस्कृते च कवितार्किकचक्रवर्तिनां श्रीमहादेवशास्त्रिणां "भारतशतकम्" स्वान्तं नितान्तं सन्तोषयति। तादृशे विपुलतरेऽस्मिन् भारतवर्णनसन्दर्भे श्रीरमाकान्तशुक्लस्य कृतिरियमद्भुतामनन्यसाधा-

रणीं दीप्तिभावहतीति किमेतन्नास्त्यनन्यसामान्यं साफल्यं कविवरेण्यस्यास्य ।

स्रग्विणीति गीतिमयेन छन्दसाऽरचितमिदं "भाति मे भारतम्" गीतिकाव्यं स्वीयसंज्ञाघटकीभूतेन "मे" इति शब्देन न केवलं कविमेव निर्दिशत्यपितु सर्वानपि पाठकान् श्रोतृवृन्दांश्चात्रान्तर्भावयत् साधारणीकरणव्यापारस्य नाम्न्येव प्रादुर्भावं सूचयति । भारतं सर्वेषामपि विद्यते निवासिनां भक्तिभाजां च, तं प्रति सर्वेऽपि—"मे भारतमिति" वदेयुः । तामेव सार्वजनीनां भावनां कविरपि संज्ञयाऽनया प्रकाशयति तामेव च विश्वजनीनां भावनां प्रारम्भिकेऽपि पद्यद्वये सुप्रसन्नां प्रकाशयन् कविर्वदति—

भारतं वर्तते मे परं सम्बलं
भारतं नित्यमेव स्मरामि प्रियम् ।
भारतेनास्ति मे जीवनं जीवनं
भारतायार्पितं मेऽखिलं चेष्टितम् ।।
भारताद् भाति मे भूतलं भूतलं
भारतस्य प्रतिष्ठास्ति मे मानसे ।
भारतेऽहं प्रपश्यामि विश्वेश्वरं
भारत ! क्षोणिशृङ्गार तुभ्यं नमः ।।

गीतकाव्यस्यास्यावलोकनेन भारतस्य न केवलं भौतिकं रूपं मानसे समुल्लसत्यपितु सर्वविधालौकिकचमत्कारचारु किमप्यलौकिकं रूपं कविराविष्करोति, तत्र भौगोलिकं रूपं नितान्तमेकदेशभूतमास्ते भौतिकं स्वरूपं यद्यपि राष्ट्रस्य मूलतत्त्वरूपेण स्थितं भवति तद् विना राष्ट्रभावनाया भक्तेरेव चाऽधारविरहितत्वात् परं भूगोलापेक्षया इतिहासदृष्ट्या यत्र नितरां पुरातनत्वं विद्योतते तत्र भौतिकसुषमया सहैव भावनाप्राधान्यं समुन्मेषमासादयति, तेन संस्कृतिः सभ्यता च पुष्पिता पल्लविता भवति, तद्भूगोलावलम्बिनि समाजे, भावना-

प्रधानतयैव च देशस्य स्वरूपं हृदये प्रेरणां संचारयति, न केवलं भौतिकेन रूपेण। अत एव प्रथम एव पद्ये भारतस्य विश्वविश्रुतं भावनाप्रधानं स्वरूपमाविष्कुर्वन् कविर्निगदति—

विश्वबन्धुत्वमुद्घोषयत्पावनं
विश्ववन्द्यैश्चरित्रैर्जगत्पावयत् ।
विश्वमेकं कुटुम्बं समालोकयद्
भूतले भाति मेऽनारतं भारतम् ॥१॥

अग्रिमेषु च पद्येष्वपि अहिंसादिप्रमुखभावनातत्त्वानां भारत-प्राणभूतानां शोभनं चित्रमुद्भासितं दृश्यते।

भारतभूमिः प्रकृतिदृष्ट्या सर्वशोभामयी विद्यते यस्यां स्वत एव काव्यानि विलसन्ति, तादृशीमनुपमां प्रकृतिसुषमामनेकैश्छन्दोभिः-कविवर्णयति—

कोकिलैः कूजितं षट्पदैर्गुञ्जितं
केकिभिर्नृत्यपारङ्गतैर्नादितम् ।
सारिका-कीर-वादप्रवादैर्युतं
भूतले भाति मेऽनारतं भारतम् ॥४०॥

मेघमालाकुलं विद्युदुद्द्योतकं
काशहासान्वितं सर्षपश्रीयुतम् ।
पक्वगोधूमसस्यैश्च सम्पूरितं
भूतले भाति मेऽनारतं भारतम् ॥४२॥

श्यामलानोकहश्रीसमृद्धान्तरं
पद्मनेत्रैस्सरोभिस्समालोकितम् ।
निर्झरैः श्वेतफेनैस्समृद्धाञ्चलं
भूतले भाति मेऽनारतं भारतम् ॥४३॥

हंसकारण्डवैस्सारसैर्वर्तकैः
क्रौञ्चकाकैः पिकैः खञ्जरीटैः शुकैः ।
तित्तिरैष्टिट्टिभैः श्येनगृद्ध्रैश्चितं
भूतले भाति मेऽनारतं भारतम् ॥४४॥

नितरां गेयशब्दमालासमाहितानीमानि प्रकृतिचित्राणि सहज-सौन्दर्यसमर्पकाणि, सहृदयचेतसि सुगन्धं विस्तारयन्ति ।

नदीनां (६, ३५), पर्वतानां (१०), तीर्थानां (२८-२६), पादपानां (६२) केरल-कश्मीर-प्रयाग-पूर्वाञ्चल-गुर्जर-वङ्ग-पञ्चनद-महाराष्ट्र-तमिल - मध्यप्रदेश - कर्नाटक-राजस्थान-आन्ध्र-नागालैण्ड-मालव-कुरुक्षेत्र-प्रभृतिप्रदेशानां (४६-५०) नितान्तं मनोमोहकानि चित्राणि गेयशब्दावल्यां "भाति मे भारतम्" काव्ये सुषमामनुपमा-मुल्लासयन्ति ।

देशस्यास्य गौरवपूर्णं साहित्यं कस्य वा मनीषिणः समावर्जकं न भवति, यदाधारेणाद्यापि देशस्यास्य गुरुत्वमक्षुण्णं तिष्ठति । दार्श-निककाव्याध्यात्मचिन्तनरुचिरस्य तादृशस्यालौकिकस्य साहित्यभाण्डा-गारस्य गौरवगीतानि गायन् कविरयमनेकेषु छन्दस्सु तथा प्रस्तौति यथा पाठकश्रोतॄणां मनांसि श्रद्धामयानि सञ्जायन्ते —

वेदभाभासितं सत्कलालासितं
रम्यसङ्गीतसाहित्यसौहित्यभूः ।
भारतीवल्लकीझङ्कृतं झङ्कृतं
भूतले भाति मेऽनारतं भारतम् ॥६॥

यत् त्रयीसांख्ययोगादिमार्गैर्युतं
जीवनं मुक्तमाकर्तुमाकांक्षति ।
शीलसन्तोषसत्यादिभी रक्षितं
भूतले भाति तन्मामकं भारतम् ॥७॥

दर्शनज्ञानचारित्र्यसम्मेलनं
यत्र मोक्षस्य मार्गं भणन्त्यागमाः ।
ज्ञानमास्ते च भारः क्रियां वै विना
भूतले भाति तन्मामकं भारतम् ॥८॥

मूलरामायणं पम्परामायणं
कम्बरामायणं जैनरामायणम् ।
कृत्तिवासादिरामायणं श्रावयद्
भूतले भाति मेऽनारतं भारतम् ॥२५॥

योगवासिष्ठगीतामहाभारतै-
ग्रन्थरत्नैश्च तैस्तैः प्रबुद्धं तथा ।
मानसं बीजकं सूरसिन्धुं दधद्
भूतले भाति मेऽनारतं भारतम् ॥२६॥

गद्यपद्याञ्जितं श्रव्यदृश्याञ्जितं
गीतनृत्याञ्जितं लोकवेदाञ्जितम् ।
सप्रसादं समाधुर्यमोजोऽन्वितं
भूतले भाति मेऽनारतं भारतम् ॥२७॥

वृत्तेष्वेतेषु दिङ्मात्रमपि व्यञ्जनयाऽवशिष्टानामुपरि शोभाविशेषं विनिक्षिपतीव ।

भारतस्य समादृतं वैशिष्ट्यमस्ति—

"यद्धि भिन्नं सदप्यस्त्यभिन्नं सदा" (५ श्लो०)

"अस्ति यस्मिन्ननेकत्व एकस्थितिः" (६७ श्लो०)

तादृशस्यैकत्वस्योपरि कविरयं न सामान्यतया सावधानोऽपितु तस्यैकत्वस्य विविधानि रूपाणि सविशेषमवतारयति (४, ४१, ४५, ४६, ६१) विविधभाषाणां (२३), पर्वणाम् (३२) समाजसम्मेलनानां (३०), प्राचीनजातीनां (४६) सम्यगालोचनं कुर्वन् विभिन्नत्वप्रदर्शनपुरस्सरं सर्वेषामेतेषां भारतान्तर्भूतत्वं तेन च भारतस्य विराट्स्वरूपमवतारयति ।

प्रायशो वर्णनप्रसङ्गेषु पारम्परिककवयः राष्ट्रस्य नवीनोपलब्धीनां विषय उपेक्षामेव धारयन्तो विलोक्यन्ते। परं साहित्यं समाजस्य प्रतिविम्बभूतं भवतीत्यद्यत्वे नवधारानिष्णाताः संस्कृतकवयो राष्ट्रस्य विज्ञानधारितां सर्वजनमनस्तोषणकरीमिमां नवसमुन्नतिं न तमामुपेक्षन्ते। "भाति मे भारतम्" काव्यस्य प्रणेता श्रीमान् रमाकान्तशुक्लमहाशयस्तु तत्र सविशेषं चमत्कृतिमुल्लासयति। नवीनोपलब्धिचित्रणमेतस्मिन् काव्ये तावदभूतपूर्वमेव, यथा—

भाखड़ाबन्ध-दामोदरीयोजना-
बाणगङ्गाफरक्कादिभिः सिञ्चितम्।
ब्रह्मपुत्रादिसन्दर्शिताम्बुच्छटं
भूतले भाति मेऽनारतं भारतम्॥११॥

विद्युदुत्पादने तैलसंशोधने
इन्धनान्वेषणे लौहनिष्पादने।
यन्त्रनिर्माणकार्ये च पूर्णक्षमं
भूतले भाति मेऽनारतं भारतम्॥१२॥

रोगजालं चिकित्सालयस्थापनै-
रौषधोत्पादनैः शल्यशोधैस्तथा।
नूतनाभिश्चिकित्साभिरुन्मूलयद्
भूतले भाति मेऽनारतं भारतम्॥१३॥

आर्यभट्टं वियन्मण्डले स्थापयद्
पोखरणभूमिगर्भेऽणुशक्तिं किरत्।
शान्तिकार्येष्वणुं प्रेरयत्सन्ततं
भूतले भाति मेऽनारतं भारतम्॥१४॥

रोहिणीं प्रक्षिपद् भास्करं साधयद्
आत्मनीनैरमोघैर्मितैः साधनैः ।
युद्धपोतांश्च सिन्धूरसि स्थापयद्
भूतले भाति मेऽनारतं भारतम् ॥१५॥
रेलनौकाविमानैर्बसैर्मोटरैः
कारटेम्पूशकट्यादिभिर्यानकैः ।
यच्चरैवेति नित्यं समुद्घोषयद्
भूतले भाति तन्मामकं भारतम् ॥१६॥
यद् बरौनी - भिलाई - बुकारोस्वनैः
स्वोन्नतिस्यन्दनोत्थं शुभं घर्घरम् ।
दिक्षु विस्तारयद् वीक्ष्यते सर्वदा
भूतले भाति तन्मामकं भारतम् ॥१७॥

एतेनोच्चतरसुषमाविवरणेन भारतस्य नूतनजागर्तिचित्रमेव समुन्मिषितं जायते सचेतषां चेतसि ।

यद्यपि काव्यस्यैतस्य चित्ते तादृशं विद्यतेऽनुरञ्जनं यत् पुनः पुनरास्वादनाय प्रेरयति, पुनः पुनरालोकितं सदेतत्काव्यं वारं वारं कामप्यभिनवामेव लेखनप्रेरणां प्रेषयति, भारतं प्रत्यतन्द्रितं प्रेम मानसे जागरयति, तथाऽपि पूर्णरूपेणैकदैवैतादृशस्य काव्योत्तमस्याकलनं मादृशस्य कृते नितान्तं कठिनतरम् । वीरतासंपूरित-श्रीरमाकान्तशुक्लमहोदयं परितः संस्कृतसहृदसयमाजस्याशा प्रसरति यदयं प्रारम्भ एव । आगामिनि काले लोकोत्तरयाऽनया प्रतिभया श्रीमानयं कविः काव्यसौगन्ध्यं नूनं विस्तारयत्विति जगदीश्वरसविधे भावप्रवणा प्रार्थना विद्यतेऽस्मादृशानाम् ।

अथ कैश्चन पद्यैरालोच्यते 'भाति म भारतम् :—

श्रीरमाकान्तशुक्लस्य काव्यं नवं 'भाति मे भारतं' शुभ्रचित्राञ्चितम् ।
शब्दधाराप्रवाहेण रोमाञ्चितं भावनागुम्फितं सर्वमोदावहम् ॥१॥
शुभ्रव्यक्तित्वधाराऽभिरामं परं हृत्तरंगेषु दोलायमानं कथम् ।
सा प्रतीक्षाऽस्ति काचित् प्रपूर्णीकृता मेघदूतोत्तरं या विवृद्धिं गता ॥२॥
कुत्र सौख्यं समस्तं मिलेत्पूर्णतः ? कुत्र तृप्तिः समासादनीया भवेत् ?
प्रश्नजातस्य सर्वस्य तत्रोत्तरं "भाति मे भारतम्" "भाति मे भारतम्" ॥३॥
नैकगोष्ठीषु देशस्य सम्यक्श्रुतं सत्कवीनां समाजेषु यच्चर्चितम् ।
यत् श्रुतं श्रोतृवृन्दे परं तुष्टिदं तादृशं विद्यते "भाति मे भारतम्" ॥४॥
विश्वविद्वत्समाजस्य सम्मेलने काशिकायां रमाकान्तसंश्रावितम् ।
श्रोतृविद्वत्समूहे भृशं नन्दितं दिव्यमोदान्वितं "भाति मे भारतम्" ॥५॥
को नु ब्रूतेऽद्य यत् प्राक्तनं संस्कृतम् ? नो नवं संस्कृतं नो नवस्फूर्तिदम् ?
यो मृतं संस्कृतं वा समुद्घोषयेद् तन्मुखे मुद्रणं "भाति मे भारतम्" ॥६॥
या प्रवृत्तिर्नवा भारते दृश्यते तस्य सर्वस्य दृश्यावलिः प्रस्तुता ।
प्राक्तनं गौरवं सम्यगाम्रेडितं रम्यकाव्येऽत्र तद् "भाति मे भारतम्" ॥७॥
ये पठन्त्यद्य तेषां नवस्फूर्तिदं संस्कृतेऽपि प्रसादस्य[1] काष्ठा परा ।
सत्वरं यन्मनोबुद्धिसन्तर्पणं तादृशं सौख्यदं "भाति मे भारतम्" ॥८॥
सत्कवेरोजपूर्णैः स्वरैर्भूषितं श्रोतृवृन्देषु रोमाञ्चसञ्चारकम् ।
पाठकाले "पुनः"[2] शब्दसम्पूजितं तादृशं विद्यते "भाति मे भारतम्" ॥९॥
संस्कृतेऽद्यापि काव्यं नवं रच्यते ? यद्भवेत्सर्वसाधारणे विश्रुतम् ?
सर्वथानूतनैर्भावसार्थैर्युतं ? तत्र सिद्धोत्तरं "भाति मे भारतम्" ॥१०॥
राजधान्यामिहाऽविष्कृतंभूरिशो भाग्यमालाभिरास्ते परं मण्डितम् ।
सद्यशोवर्षकं सत्कवेर्नित्यशो भूरिभाषाङ्कितं "भाति मे भारतम्" ॥११॥

---

१. प्रसादगुणस्य

२. कविसम्मेलनेषु श्रोतृभिरेतत्पठनावसरे 'पुनः' 'पुनः' इति ध्वनिः क्रियते ।

मातृभूभक्तिसाम्राज्यसन्देशदं मातृभूभक्तवीरस्मृतिस्फूर्तिदम् ।
भावसौगन्ध्यसारेण सम्पूरितं दिव्यतामण्डितं "भाति मे भारतम्" ॥१२॥
नव्यसंयोजनावर्णनैर्मण्डितं शुभ्रविज्ञानधारासमासेवितम् ।
चिन्मयैकान्तमित्रत्वमासादयत् द्योतते मानसे "भाति मे भारतम्" ॥१३॥
,कान्त'वाङ्मञ्जरीसेवितं सर्वशो व्यञ्जनाभिर्नवाभिः समाराधितम् ।
चित्रसौगन्ध्यचुञ्चुद्विरेफैः परं विद्भिरासादितं "भाति मे भारतम्" ॥१४॥
श्रीरमाकान्तशुक्लोऽभिनन्द्यो न कैर्येन नव्यं नवस्फूर्तिदं निर्मितम् ।
काव्यमारात् प्रभाभास्वरं सुस्वरं नित्यमानन्ददं 'भाति मे भारतम्" ॥१५॥

भाति मे भारती भारतेऽनारतम्

(आचार्य वेदानन्द झा[1])

(१)

ऋक्कलाऽलङ्कृता सामभिर्झङ्कृता
द्विर्यजुर्गुम्फिताऽथर्वणा गर्विता ।
सम्भृताऽऽरण्यकैः सूत्रिता सूक्तै-
र्भाति मे भारती भारतेऽनारतम् ॥

(२)

पद्यपद्मावलीमूलनालीकृता
हृद्यमालीकृता वाग्मिवाल्मीकिना ।
संहृता संहिता सन्तता व्यासतो
भाति मे भारती भारतेऽनारतम् ॥

(३)

हासिनी भासतो लासिनी कालिदा—
सोपमाकल्पनावल्लरीलास्यतः ।
भासिनी भारवेर्भव्यभावाब्जतो
भाति मे भारती भारतेऽनारतम् ॥

(४)

मानिनी माघतो हर्षिणी हर्षतः
स्रग्विणी श्रीमुरारिप्रसूनौघतः ।
पञ्चबाणेन बाणेन वाणीकृता
भाति मे भारती भारतेऽनारतम् ॥

---

१. साहित्य-व्याकरण-न्याय-वेदान्ताचार्यः, प्राचार्यः श्रीमोतीनाथ-संस्कृत-महाविद्यालयः, रमेशनगर, नयी दिल्ली-११००१५

(५)

वल्लकीरागिणी गीतगोविन्दतो
मत्तमातङ्गिनी ह्लादिनी भूतितः ।
शाङ्करी किङ्करी दण्डिनी दण्डितो
भाति मे भारती भारतेऽनारतम् ।।

(६)

शृङ्गिभृङ्ग्यादिभिर्वन्दिता नन्दितो
नन्दिकेशादिभिर्नारदेनेडिता ।
रासलीलाऽऽप्लुता कृष्णगीताऽमृता
भाति मे भारती भारतेऽनारतम् ।।

(७)

कोकिलालापिनी कीरगीरञ्जिनी
किङ्किणी शिञ्जिनी वेणुसंनादिनी ।
साधिका साधिता राधिकाऽऽराधिता
भाति मे भारती भारतेऽनारतम् ।।

(८)

ताण्डवप्रस्खलन्निक्वणत्कङ्कण--
प्रोल्लसद्घोषढक्काडमर्वञ्जिता ।
रञ्जिता मञ्जुमञ्जीरतालोत्करै-
र्भाति मे भारती भारतेऽनारतम् ।।

(९)

ज्ञान - विज्ञान - सत्काननश्रीलस--
त्काव्यकुन्दोद्भवत्सान्द्रमोदेरिणी ।
भानुबोधोन्मिलत्कञ्जभृङ्गैर्भृता
भाति मे भारती भारतेऽनारतम् ।।

व्यवधानम्

(अध्यापकः केशवचन्द्र दाशः)[1]

जीविकायाः अस्थायिस्वीकृतिः,
अस्थायिगृहस्य ऋणपरिशोधः,
दिनमदिनयति, श्रावणि, रे.........
तव मम व्यवधानमधिकं भवति,
संध्यादीपे स्फुटति ते वेदनायाः छाया ।
श्रावणि !, परितस्तु कीटाः चर्वन्ति चरणम्
स्थातुं स्थानमिह कुत्र ?
अद्यापि सरणिमतिक्रमते सर्वदा मार्जारी
शनिश्च मां भ्रमयति देशदेशान्तरे
तीर्थमयं भवति मुहूर्त्तम् ।
रजनी आयाति, श्रावणि.........
काले काले इयं हि सभ्यता—
अमा-पूर्णिमाः निर्झरन्ति एकस्मिन् शयने
निजोत्तापं न जानाति कल्पतरुः,
मकरः गिलति सर्वं, ततो वमति रत्नानि
पलातकचिह्नेषु संस्कृतिः प्राचीना भवति ।
पितामहः आर्द्रयति वाल्यवसनं ते
नयनवारिभिः, श्रावणि रे.......
जीवनस्य व्यापकता नास्ति,
यदि वा जीवनस्य मूल्यं स्यात्

---

१. एम० ए०, एम० फिल०, संस्कृतविभागप्राध्यापकः, जी० एम० ईव० कालेजः, सम्बलपुरम्-७६८००४ (उड़ीसा)

निधिभवने न्यासीकृत्य तदेकदा
अहं चिराय जीवेयम्
मद्वंशजाः दुःखं न लभेरन् ।
श्रावणि रे………! कथमवगमिष्यसि ?
यदि वृक्षे न सन्ति विहगाः
पादपोऽयं श्रीहीनो भवति—
अद्य गङ्गानदी न चिरप्रवाहा
मैत्रेयी न महनीया
शन्नोदेवी जघने च तिलचिह्नमस्पृषी भवति,
सम्मुखे दण्डायमानाऽत्र
भारतीयता नः क्रीतदासी इव ।
श्रावणि रे………, पर्णं तत् झरितम्………
गृहमिह कुरुक्षेत्रम्
कर्मशाला हिंस्रमाला
अहं च निष्पक्षजटायुः
अवगाह्य रक्तमांसे तव
निजकृते नीरव उद्धवः ।
नयनं न मुद्रितं, श्रावणि रे………,
अङ्गुलीनामन्तराले तथापि पश्यामि
व्यवधानं यावन्न विगतम्
तावत्कालपर्यन्तं केवलम्
प्रधावनम्—प्रधावनम्
निरन्तधावनम्………

देववाणी-परिषद्वार्ता

(१) स्वातन्त्र्यभावनायै संस्कृतमध्येतव्यम्

देववाणी-परिषदा 'आर-६, वाणी विहार, नयी दिल्ली-११००५९' इतिस्थाने १४-८-८२ तारिकायां आयोजिते एकस्मिन् भव्यसमारोहे कुमायूँविश्वविद्यालयस्य संस्कृतविभागाध्यक्षेण डा० हरिनारायण-दीक्षितेनोक्तं यत् राष्ट्रियभावनाभरितस्य संस्कृतसाहित्यस्याध्ययनम् स्वातन्त्र्यभावस्य परिरक्षणार्थं राष्ट्रैक्यभावस्य चपोषणार्थ-मत्यन्तभावश्यकमस्ति । देववाणी-परिषदस्तत्त्वावधाने 'गुडविल पब्लिक स्कूल' प्रभृतिभिः संस्थाभिः भारतस्वातन्त्र्यपर्वणि सांस्कृतिक-कार्यक्रमोऽप्यायोजितः। परिषदा राष्ट्रियभावभरितानां ध्वन्यङ्कितानां काव्यांशानां श्रावणमपि समनुष्ठितम् ।

(२) देववाणी-परिषदः संकल्पना-दिवसः

देववाणी-परिषदा २१-८-१९८२ ई० तारिकायाम् 'आर-६, वाणी विहार, नई दिल्ली' इति स्थाने स्व सप्तमः संकल्पना-दिवसः संस्कृतदिवसरूपेण सम्मानितः । स्मरणीयं विद्यते यदगस्त-मासस्य एकविंश्यां कारिकायां, सप्तवर्षाणि पूर्वं, परिषदः संविधानं पञ्जीकरणार्थं प्रस्तुतमासीत् ।

अस्मिन्नवसरे भाषभाणेन मुख्यातिथिना वयोवृद्धसंस्कृतसाहित्य-कारेण आचार्यरमेशचन्द्रशुक्लेनोक्तं यत्संस्कृतं नाम भारतस्य अनितरसाधारणम् अक्षय्यं धनमस्ति यद्विश्वकल्याणाय समर्पितम् तिष्ठति । तत्र संकीर्णता-विघटनकारित्वादीनां भावाः नैवादृताः । आवश्यकतास्ति यदेतेन अस्माकं परिचयो भवेत् ।

परिषदो महासचिवेन डा० रमाकान्तशुक्लेन सूचितं यत्परिषदा-स्मिन् वर्षे डा० सुलेखचन्द्रशर्मलिखितस्य 'साधारणीकरण और समा-नान्तर चिन्तन की पूर्वपीठिका' इत्याख्यस्य, केरलीयसंस्कृतकवि श्रीओट्टूरउण्णिनम्बूदिरीपादकृतभक्तिकाव्यस्य 'राधाकृष्णरसायनस्य', आचार्यरमेशचन्द्रशुक्लप्रणीतस्य 'अभिनवहनुमन्नाटकस्य' किञ्च

रमाकान्तशुक्लसम्पादितस्य 'अर्वाचीनसंस्कृतसाहित्यपरिचयस्य' प्रकाशनमनुष्ठितम् येषां शीघ्रमेव विमोचनोत्सवा आयोजयिष्यन्ते। तेनेदमपि विज्ञापितं यत्परिषदा अस्मिन् वर्षेऽपि अखिलभारतीयसंस्कृत कविसम्मेलन-अक्षरश्लोक-नायट्समारोहाणामायोजनं विधास्यते, किं च छात्राणां कृते विविधाः प्रतियोगिता आयोजयिष्यन्ते।

अस्मिन्नवसरे सांस्कृतिककार्यक्रमोऽप्यायोज्यत यत्र अनेकासां शिक्षणसंस्थानां छात्राभिः सहभागित्वं निर्व्यूढम्। श्रीजयवीरसिंह-श्रीमती कंचनशर्मा-मा० कन्हैयालाल गुप्त-श्री के० एम० शर्ममहाभागैः संस्कृतप्रचारप्रसारार्थं स्वविचाराः अभिव्यक्ताः। कु० अनिता चौधरी 'भाति मे भारतम्' नाम काव्यात् कानिचित् पद्यानि प्रास्तावीत्।

समारोहेऽस्मिन् 'गुडविल चिल्ड्रन पब्लिक स्कूल, वाणी-विहार'-'सीमा माडल स्कूल, उत्तमनगर' - 'कमल पब्लिक स्कूल उत्तमनगर'-'मोतीनाथ संस्कृत महाविद्यालय, रमेशनगर' प्रभृति संस्थानां प्राध्यापिकाश्छात्राश्च समुपस्थिता आसन्।

समारोहास्याध्यक्ष्यमाचार्यवेदानन्दझामहाभागैः कृतम्। तैः संस्कृतस्य शुद्धोचारणार्थं ये ये प्रयत्नाः विद्वद्भिः कृतास्तेमामुल्लेखपुरस्सरं संस्कृतस्य महत्त्वं प्रतिपादितम्। तैः 'वर्धते विषवल्लरी' 'भाति मे भारती भारतेऽनारतम्' इति शीर्षके कविते ऽपि प्रस्तुते। समारोहस्य समापनं मोतीनाथसंस्कृत-विद्यालयच्छात्रगणकृतवैदिकशान्ति-पाठेनाभूत्।

(३) 'राधाकृष्णरसायन'स्य प्रकाशनोत्सवः

देववाणी-परिषदा पावरटी (केरल) स्थ-गुरुवायूरकेन्द्रीयसंस्कृत-विद्यापीठस्य बालूशेरी(केरल)स्थ- कालिकट आदर्शसंस्कृतविद्यापीठस्य च सहयोगेन १७-९-१९८२ तारिकायां पूर्वाह्णे ८.०० वादन-वेलायां गुरुवायूर (केरल) स्थ-'रुक्मिणीमण्डपे' महाकविश्रीओट्टूर-उण्णिनम्बूदिरीपादविरचितस्य भक्तिकाव्यस्य 'राधाकृष्णरसायनस्य'

प्रकाशनोत्सवः समायोजितः । स्मरणीयं विद्यते यद् देववाणी-परिषदा सद्य एव 'राधाकृष्णरसायनस्य' प्रकाशनमनुष्ठितम् । ग्रन्थप्रकाशनानन्तरमचिरादेव श्रीओट्टूरउण्णिनम्बूदिरीपादा भारतस्य महामहिमराष्ट्रपतिना सम्माननीयत्वेनोद्घोषिताः । अष्टसप्ततिवर्षदेशीयानां श्रीनम्बूदिरीपादानां दिल्ल्यामुपस्थितिस्तदसौविध्यकरी आसीदतो गुरुवायूर एव तद्ग्रन्थप्रकाशनोत्सवेन साकं तेषामभिनन्दनसमारोहोऽप्यायोज्यत ।

अस्मिन्नवसरे ग्रन्थं विमोचयता केरलराज्यमुख्यमन्त्रिणा श्री के०करुणाकरन्महाभागेनोक्तं यत्केरलस्थसंस्कृतकवेः 'मलयालम्' लिप्यां लिखितस्य भक्तिकाव्यस्य देवनागरीलिप्यां सर्वप्रथमं प्रकाशनं कृत्वा दिल्लीस्था देववाणी-परिषद् इदं तथ्यं पोषयामास यत्संस्कृतेऽद्यापि काश्मीरतः कन्याकुमारीपर्यन्तमैक्यकारित्वं कियत्या चारुतयावतिष्ठते ।

अवसरेऽस्मिन् केन्द्रीयशिक्षामन्त्रालये उपपरामर्शदातृभिः डा० सी०आर० स्वामिनाथन्-महाभागैः, गुरुवायूरकेन्द्रीयविद्यापीठप्राचार्यडा०चक्रधरविजल्वान - कालिकट - आदर्शसंस्कृतविद्यापीठाध्यक्षश्री टी० एम० बी० नेडुंगाडि-प्राचार्य श्रीके०चन्द्रशेखरन्-श्री पी० सी० वी० एलयत् श्री वैश्रवणम् रामन् नम्बूदिरीपाद-श्री आञ्जम माधवन् नम्बूदिरीपादप्रभृतिविद्वद्भिः श्रीओट्टूरउण्णिनम्बूदिरीपादानां समभिनन्दनं कृतम् । देववाणी-परिषत्पक्षतः श्री नम्बूदिरीपादेभ्य ऊर्णोत्तरीयं समर्पितमभूत् । परिषन्महासचिवेन डा० रमाकान्तशुक्लेन एकोत्तरसहस्ररूप्यकात्मकः सत्कारराशिः कवये दीयमानत्वेनोद्घोषितः । तेन राधाकृष्णरसायनस्य केचन श्लोका अपि सस्वरं पठिताः येषां कैरल्यामनुवादो डा० स्वामिनाथनमाहाभागैः प्रस्तुतः ।

(रमाकान्तशुक्लः)

अर्वाचीनसंस्कृतम्

(R. N. 34554/79)

❋

१. प्रकाशन का स्थान : नयी दिल्ली

२. प्रकाशन की आवधिकता : त्रैमासिक

३. मुद्रक तथा प्रकाशक का
नाम, राष्ट्रीयता तथा पता : डा० रमाकान्त शुक्ल
(देववाणी-परिषद्, दिल्ली-कृते)
भारतीय
६, वाणी विहार, नई दिल्ली-११००५९

४. सम्पादक का नाम,
राष्ट्रीयता तथा पता : डा० रमाकान्त शुक्ल
भारतीय
६. वाणी-विहार, नई दिल्ली-११००५९

५. उन व्यक्तियों के नाम और पता
जो इस पत्रिका के मालिक या
साझेदार हैं अथवा जो इसकी
सारी पूंजी के एक प्रतिशत से
अधिक के हिस्सेदार हैं। :देववाणी-परिषद् दिल्ली
६, वाणी-विहार, नयी दिल्ली-११००५९

मैं, डा० रमाकान्त शुक्ल, यह घोषणा करता हूँ कि उपर्युक्त विवरण मेरी पूरी जानकारी और विश्वास के अनुसार सही है।

डा० रमाकान्त शुक्ल

महासचिव, देववाणी-परिषद्, दिल्ली

प्रकाशक

नियमाः

१. 'अर्वाचीनसंस्कृतम्' त्रैमासिकं पत्रं जनवरी-अप्रैल-जुलाई-अक्टूबर-मासानां प्रत्येकं १५ दिनांके प्रकाशितं भविष्यति ।

२. अस्मिन् प्रायः शतवर्षाभ्यन्तरे रचिताः संस्कृतरचना अवलम्ब्य संस्कृते, हिन्द्याम्, आंग्लभाषायां वा निबद्धाः शोधपूर्णाः समालोचनात्मका वा लेखाः प्रकाशिताः स्युः । विशेषाङ्केषु मौलिकरचनानां प्रकाशनमपि भवेत् ।

३. प्रकाशनाय लेखाः/रचनाः सुवाच्याक्षरैः पत्रस्यैकतो लिखिता वा टंकिता वा स्युः ।

४. रचनानां प्राप्तिसूचना प्राप्तिसमकालमेव प्रहीयते । तासां प्रकाशनं तु यथावसरं परीक्ष्य पश्चादेव सम्भवेत् । अतो लेखकमहोदयाः प्रस्तोष्यमाण एवाङ्के स्वकृतीनां प्रकाशनाय साग्रहा न भवेयुः ।

५. अप्रकाशितायाः सत्याः स्वकृते परावर्तनमिच्छन्तः सज्जनाः यथापेक्षं पत्रालयीयमुद्रिकाः (*Stamps*) प्रेषयेयुः ।

६. पत्रस्य वार्षिकं शुल्कं भारते विंशतिरूप्यकात्मकं विदेशेषु च पञ्चडालरात्मकं पौण्डद्वयात्मकं वा विद्यते । तच्च पूर्णमेव पूर्वतः प्रदेयं भवति । वी० पी० द्वारा प्रेषणस्य न नियमः । चैकादिकेन (*Cheques*) 'देववाणी-परिषद्, दिल्ली'–अंकितेन भाव्यम् । शुल्कमधोदत्ते सङ्केते प्रेषणीयम् :

महासचिवः, देववाणी-परिषद्, दिल्ली,
६ वाणी विहारः, नयी दिल्ली-११००५९ ।

७. समालोच्यपुस्तकानां प्रत्येकं द्वितयी प्रेषणीया ।

८. विज्ञापन-शुल्कमित्थमस्ति-प्रतिपूर्णपृष्टम् (एकवारम्) रु० ३००-०० (चतुर्वारम्) रु० ५००.०० ।

९. पत्रव्यवहारे स्वकीया ग्राहकसंख्याऽवश्यमुल्लेखनीया ।

Arvācīnasaṃskṛtam (Qly) **R.N. 34554/79**

देववाणी-परिषदा प्रकाशिताः ग्रन्थाः

१. अर्वाचीनसंस्कृतमहाकाव्यविमर्शः (प्रथमखण्डः) रु० १५.००
(सं० : डा० रमाकान्तशुक्लः)
२. " " " (द्वितीयखण्डः) रु० ३०.००
३. " " " (तृतीयखण्डः) रु० ३०.००
४. कर्णभूषणम् (डा० सी० आर० स्वामिनाथन्) रु० ५.००
५. भाति मे भारतम् (डा० रमाकान्तशुक्लः) रु० ४०.००
६. श्रीकृष्णचरितम् (डा० रमेशचन्द्रशुक्लः) रु० ३०.००
७. सुगमरामायणम् " " रु० ३५.००
८. हरविजयस्य साहित्यिकमध्ययनम् रु० ६०.००
(डा० कृष्णकान्तशुक्लः)
९. श्रीमदप्पयदीक्षितचरितम् रु० २०.००
(डा० हरिनारायणदीक्षितः)
१०. भारतस्वातन्त्र्यसंग्रामेतिहासः (डा० र० च० शु०) रु० ३५.००
११. सदाशयसमुच्चयः (टी० वी० परमेश्वरअय्यरः) रु० १५.००
१२. आभाणकमञ्जरी (" ") रु० १५.००
१३. मेघदूत : एक विश्लेषण (डा० देवीदत्त शर्मा) रु० २०.००
१४. रघुवंश : एक विश्लेषण (" ") रु० २०.००
१५. अभिज्ञानशाकुन्तल : एक विश्लेषण (") रु० २०.००
१६. कालिदास की कला और संस्कृति (भाग २) रु० ६०.००
(लेखक: डा० देवीदत्त शर्मा)
१७. जय भारतभूमे ! (डा० रमाकान्तशुक्लः) रु०. [illegible]०.००
१८. अर्वाचीनसंस्कृतसाहित्यपरिचयः (") रु० ३०.००
१९. राधाकृष्णरसायनम् रु० ४०.००
(श्री ओट्टूर उण्णि नम्बूदिरीपादः)
२०. साधारणीकरण और समानान्तर चिन्तन
की पूर्वपीठिका (डा० सुलेखचन्द्रशर्मा) रु० ५०.००
२१. अभिनवहनूमन्नाटकम् (डा० रमेशचन्द्रशुक्लः) रु० २०.००
२२. भट्टनायक और अभिनवगुप्त की साधारणीकरण-
विषयक अवधारणा (डा० सुलेखचन्द्र शर्मा) रु० ५०.००

प्राप्तिस्थानम्

'देववाणी-परिषद्, दिल्ली', ६ वाणी-विहारः, नयी दिल्ली-५९